॥ बोधायनश्रौतसूत्रम् ॥

1995. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 197. Substance—Paper. Size—10×4 inches. Sheets—17. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bodhāyana. Paśubandha only.

Beginning, end and subject—Same as No. 1994.

Remarks :—The Ms. is old and is in a fairly good condition. The paper is of Indian manufacture.

॥ बोधायनश्रौतसूत्रम् ॥

1996. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 198. Substance—Paper. Size—9¾×4½ inches. Sheets—16. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bodhāyana. Paśubandha only.

Beginning, end and subject—Same as No. 1994.

Colophon :

इति बोधायनपशुसूत्रं सम्पूर्णम् ।

Remarks:—The Ms. is old and is in good condition.

॥ बोधायनश्रौतसूत्रम् ॥

1997. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 199. Substance—Paper. Size—10×4 inches. Sheets—13. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bodhāyana. Paśubandha only.

Beginning, end and subject—Same as No. 1994.

Colophon:

इति पशुसूत्रं सम्पूर्णम् ॥

इदं पुस्तकं आलूरकरराजम्भट्टेन लिखितम् ॥

रेणुकादेव्यै नमः ॥ इदं पुस्तकं मोरव्यासस्य ॥

Remarks:—The Ms. is old and is in a fairly good condition. The scribe is Ālūrakara Rājambhaṭṭa. The Ms. belonged to one Moravyāsa.

॥ बोधायनश्रौतसूत्रम् ॥

1998. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3753 b. Page 18. Right column. Substance—Paper. Size—10⅜ × 5 inches. Sheets—20 (6-25). Lines—9 to a Page. Script—Devanāgarī No. of Granthas —335. Author—Bodhāyana. Cāturmāsya only.

Beginning:

वैश्वदेवहविर्भिर्यक्ष्यमाणो भवति फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यां नक्षत्रप्रयोग इत्येक आहुरुदगयन आपूर्यमाणपक्षस्य पुण्याहे प्रयुञ्जीतेति स उपकल्पयते त्रेणीं शललीं लोहितायसस्य च क्षुरं चतुष्टयानि पुरोडाशकपालानि चतस्रश्चरुस्थालीस्तावन्ति मेक्षणानि द्वयं पयः पृषदाज्याय च दधि हविरातञ्चनाय च त्रेधा बर्हिः सन्नद्धं तदेकधा पुनः सन्नद्धं प्रसूमयं प्रस्तरमित्यथोपवसथीयेऽहन्निष्टहविषमारम्भणीयामिष्टिं निर्वपति वैश्वानरं द्वादशकपालं पार्जन्यं चरुं सा प्रसिद्धेष्टिः सन्तिष्ठते । अथास्यैतदहर्विश्वेभ्यो देवेभ्यो वत्सा अपाकृता भवन्ति वैश्वदेवं पयो दोहयित्वोपवसति सान्नाय्यस्य वावृता तूष्णीं वाथ प्रातर्हुत-

ग्निहोत्रे पुरापां प्रणयनात् गार्हपत्य आज्यं विलाप्योत्पू-
य स्रुचि चतुर्गृहीतं गृहीत्वा पञ्चहोतारं मनसानुद्रुत्याहव-
नीये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यथ पृष्ठ्यांस्ती-
र्त्वापः प्रणीयाग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सा-
वित्रं द्वादशकपालं सारस्वतं चरुं, पौष्णं चरुं, मारुतं
सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमिति
हविष्कृता वाचं विसृजते ॥

End :

अथातश्चतुर्षु मासेषु शुनासीरीयहविर्भिर्यक्ष्यमाणो भवति
स उपकल्पयते त्रेणीं शलल्ीं लोहितायसस्य च क्षुरं पञ्च-
तयानि पुरोडाशकपालानि पञ्चचरुस्थालीस्तावन्ति मे-
क्षणानि पृषदाज्याय दर्वीत्यथास्यैतां रात्रिं वायवे वत्सा
अपाकृता भवन्ति प्रातर्वायव्यं पयो दोहयति सान्नाय्यस्य
वावृता तूष्णीं वाथ प्रातर्हुतेऽग्निहोत्रे पृष्ठ्यांस्तीर्त्वापः
प्रणीय निर्वपत्याग्नेयमष्टाकपालामिति पञ्च सञ्चराण्यैन्द्रा-
ग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं
द्वादशकपालं वायव्यं पयस्सौर्यमेककपालमिति त्वचं पुरो-
डाशं पुरोडाशानां ग्राहयित्वा श्रपयित्वाभिवास्य प्राक-
त्याप्येभ्यो निनीय स्तम्बयजुर्हरति इदमेव प्रसिद्धं पौ-
रोडाशिकं+शीर्ष्णस्तद्वतं तत्सत्यं० राध्यासमिति पुरस्ता-
देवाग्रेऽथदक्षिणतोथ पश्चादथोत्तरतोथोपरिष्टात्सन्तिष्ठन्ते
शुनासीरीयहवींष्यनुवत्सरीणां स्वस्तिमाशास्त इत्याशा-
स्ते ॥ १७ ॥

Colophon :

Sheet No. 10. इति प्रथमं पर्व ॥

Sheet No. 11. द्वितीयोऽध्यायः ॥

Sheet No. 25. चातुर्मास्यानि समाप्तानि ॥

Subject: Bodhāyanaśrautaśūtras. Cāturmāsya Prakaraṇa. Sixth (Fourth) Praśna. 1-17 (1-18) Khaṇḍas.

Remarks:—The Ms. is in good condition. It is full of scriptorial errors. At the end of the fourth Khaṇḍa is given the Parva division — 'प्रथमं पर्व' and at the end of the fifth Khaṇḍa the Adhyāya division is given—

'इति द्वितीयोऽध्यायः ॥'

After the colophon there is an index giving the beginnings of each Khaṇḍa in reverse order, as follows:—

"अथातश्चातुर्मास्येषु शुनासीरीयहविर्भिर्यक्ष्यमाणो भवति त्र्यंबकं यजामहे यावद्देवाध्वर्युश्चेष्टति उपहूतायामिडायां सोमाय पितृमते स्वधेति । अथेध्मांत्समिधमादधान आह शरदमेव प्रसिद्धम् ॥ महापितृयज्ञं करिष्यन्नुपकल्पयते ॥"

"अथातश्चतुर्षु मासेषु उपहूतायामिडायाम् ॥ मोषूण इन्द्र ॥ अथ प्रोक्षणीभिरुपतिष्ठति । अथातश्चतुर्षु मासेषु वरुणप्रघासम् ॥ अथाध्वर्युप्रदक्षिणमावृत्या अथेध्मात्समिधं इदमेव प्रसिद्धं पौरोडाशिकं वैश्वदेवहविर्यक्ष्यमाणो भवति ॥"

The other work contained in this Ms. is Bodhāyanaśrautasūtra (Kāṭhaka).

॥ बोधायनश्रौतसूत्रम् ॥

1999. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3722. Page 24. Left column.

Substance—Paper. Size—10½ × 4¾ inches. Sheets—26.

Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —335. Author—Bodhāyana. Cāturmāsya only.

Beginning, end, colophon and subject—Same as No. 1998.

Remarks :—The Ms. is in very good condition. At the end of this Ms. there is an index giving the beginnings of each Khaṇḍa.

॥ बोधायनश्रौतसूत्रम् ॥

2000. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3789*b. Page 8. Right column. Substance—Paper. Size—11 × 4¼ inches. Sheets—26 (97-122). Script—Devanāgarī. No. of Granthas—250. Author—Bodhāyana. Pravargya only.

Beginning :

हरिः ॐ प्रवर्ग्यꣳ सम्भरिष्यन्नुपकल्पयते खादिरीमौदुम्बरीं वैणवीं वैकङ्कतीं वाभ्रिं व्याममात्रीं वारत्निमात्रीं वोभयतःक्ष्णूं मृदञ्च भावितां करणीयां कृष्णाजिनं वराहविहतं वल्मीकवपामूतीकस्तम्बं वादारस्तम्बं वा छागापयोऽश्मकपालानि शर्करा अवाञ्जनपिष्टा अजलोमानि सूनामाधिकरणीं कर्तारं कुशलं वेणुकाण्डं मदतीरित्यथामावास्येन वा हविषेष्ट्वा नक्षत्रे वा पूर्वाꣳ शान्तिमुपयन्ति नमो वाच इत्यथाग्रेण शालां धनुर्मात्रे वेद्यै गर्तं खानयति ॥

End :

प्रवर्ग्यवति सोमे दधिघ(घ)र्मं भक्षयति(न्ति)भूर्भुवः सुवर्मयि त्यादिन्द्रियं महदित्येतेनानुवाकेनाथ घोरास्तनूरनुदि-

शति + तमनुव्याहरेत् ब्रह्मणा त्वा अपामीत्यथ यं द्वेष्टि तस्य दक्षिणं द्वार्बाहुमनुप्रचालयेदुत्तुद शिमिजावरीति स योऽन्य एतेभ्यो वाश्येत तस्मा उभयत आदीप्तमुल्मुकं क्षिपेदुत्तुद शिमिजावरीत्यथ यद्युक्तून्वाभिव वातो वा· यातमनुपन्त्रयते भूर्भुवः सुवो भूर्भुवः सुवो (भूर्भुवस्सुवो) सुवोऽधायि (सुवोऽधायि) सुवोऽधायी सुवोधायीत्यथ यद्य[प्र]वृत्तः शालां प्रपद्येताभिर्गीर्भिर्यदतो न ऊनमित्ये· तया प्रपद्येत यद्यु वै प्रवृत्त एतयैव ॥ १८ ॥

Colophon :

इति बौधायनसोमसूत्रप्रकरणं समाप्तम् ॥

Subject: Bodhāyanaśrautasūtras. Pravargya and Pravargya-prāyaścitta only. Seventh (Ninth) Praśna. 1-18 Khaṇḍas.

Remarks :—The Ms. is in very good condition. The other work contained herein is Bodhāyana Agniṣṭoma Kāṇḍa. The last three (19-21) Khaṇḍas (Avāntaradīkṣā) of this Praśna are not found in this Ms.

॥ बोधायनश्रौतसूत्रम् ॥

2001. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3790 b. Page 18. Right column. Substance—Paper. Size—10⅜ × 4⅞ inches. Sheets—24 (83 to 106). Lines— 12 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Bodhāyana. Pravargya only.

Beginning, end, colophon and subject—Same as No. 2000.

Remarks :—The Ms. is in a very good condition.

॥ बोधायनश्रौतसूत्रम् ॥

2002. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 200. Substance—Paper. Size—10×4½ inches. Sheets—10. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—160. Author—Bodhāyana. Pravargya Praśna only—incomplete.

Beginning:—Same as No. 2000.

End:

अथ गार्हपत्यमुपातिष्ठन्ते(ते) त्वमग्ने गृहपतिर्विशामासि विश्वासां मानुषीणां शतं पूर्भिर्यविष्ठ्य(ष्ठ) पाह्यꣳहसः समेद्वा(द्धा)रꣳ शतꣳ हिमारत(स्त)न्द्राविणं हार्दि(वान) मिहैव रातयः सन्त्वित्यन्तर्हिते प्रतिप्रस्थाता वेदे पत्नी(त्नीं) वाचयति त्वष्टि(ष्टी)मतीते सपेय(ये)त्यान्तादनुवाकस्येत्येतस्मिन्काले प्रतिप्रस्थाता दक्षिणं रौहिण(णं) जुहोत्यहर्ज्योतिः केतुना जुषतां सुज्योतिर्ज्योतिषां स्वाहेति ॥

Colophon: Nil.

Subject: Bodhāyanaśrautasūtras. Pravargya only. Seventh (Ninth) Praśna. 1-8 Khaṇḍas.

Remarks:—The Ms. is old and is in good condition. This Ms. breaks off in the 8th Khaṇḍa of the Pravargya Praśna.

॥ बोधायनश्रौतसूत्रम् ॥

2003. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3789 a. Page 18. Right column. Substance—Paper. Size—11×4½ inches. Sheets—97 (1-97). Lines—8 to a Page. Script—Devanāgarī. No.

of Granthas—1550. Author—Bodhāyana. Somaprakaraṇa only.

Beginning :

श्रीगणेशाय नमः ॥ ॐ ॥

अग्निष्टोमेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनञ्च कृष्णविषाणञ्च वासश्च मेखलां च सैषा पृथ्वी वेणी कार्या भवति त्रिवृदेकतः पाशा द्वाविंशतिं च दर्भपुञ्जीलानि नवनीतं चाञ्जनं च सतूलां च शरेषीकामौदुम्बरं दण्डं चमसं च व्रतप्रदानं स्थालीं सशिक्यां समेक्षणामेतानि त्रयोदश यजमानस्तावन्त्येव पत्नीमभितो भवन्ति कुम्भञ्च कुरीरञ्च वासश्च योक्त्रं चापरिमितानि दर्भपुञ्जीलानि नवनीतं चाञ्जनञ्च सतूला च शरेषीका मृन्मयः पात्रः शङ्कुश्च स्थाली सशिक्या समेक्षणा जुष्टे देवयजने शाला कारिता भवति पुरो हविषि देवयजने याजयेदित्येतेषां यज्ञोषयते प्राचीनवंशा दिक्ष्वतीकाशा दक्षिणतो वर्षीयसी तस्यै चतस्रो द्वारः कुर्वन्ति प्राचीं दक्षिणां प्रतीचीमुदीचीं दक्षिणतो व्रतश्रपणागारं कुर्वन्ति पश्चात्पत्नीशाना(ल)मथ यदि दूरे तीर्थं भवत्युत्तरेण शालां द्वौ कटपरिवारौ कुर्वन्ति पूर्वं यजमानाय परं पत्न्यै तयोः प्राची द्वारौ कुर्वन्ति ॥

End :

अथारण्योरग्नीत्समारोह्योदवसाय मथित्वाग्नीन्विहृत्याग्नेयमष्टाकपालमुदवसानीयामिष्टिं निर्वपति + सिनीवाल्यै चरुं कुह्वै चरुं धात्रयेव(ले) पुरोडाशं द्वादशकपालमन्वाहार्यमासाद्य वत्सतरीं ददाति सा प्रसिद्धेष्टिः सन्तिष्ठते·

थारण्योरग्नीत्समारोह्य स्वान्यग्न्यायतनान्यध्यवसाय म-
थित्वाग्नीन्विहृत्य सायं प्रातरग्निहोत्रे प्रतिजुहोति स-
न्तिष्ठतेऽग्निष्टोमः सन्तिष्ठतेऽग्निष्टोमः ॥ १३ ॥

Colophon: Nil.

Subject: Bodhāyanaśrautasūtras. Agniṣṭoma. 8—11 (6—8) Praśnas.

8th Praśna.	अग्नीषोमीयम्.	(32 khaṇḍas)	sheets	1
9th ,,	प्रातःसवनम्.	(20 ,,)	,,	38
10th ,,	माध्यन्दिनसवनम्.	(8 ,,)	,,	70
11th ,,	तृतीयसवनम्.	(13 ,,)	,,	80 to 97.

Remarks:—The Ms. is in good condition. The other work contained herein is Pravargyakalpa (7th Praśna).

॥ बोधायनश्रौतसूत्रम् ॥

2004. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3790a. Page 18. Right column. Substance—Paper. Size—$10\frac{5}{8} \times 4\frac{5}{8}$ inches. Sheets—83 (1-83 out of 106). Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1550. Author—Bodhāyana. Somaprakaraṇa only.

Beginning, end, colophon and subject—Same as No. 2003.

Remarks:—The Ms. is in very good condition. This Ms. contains also Bodhāyana pravargya Kalpa.

॥ बोधायनश्रौतसूत्रम् ॥

2005. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 201. Substance—Paper. Size—$10 \times 4\frac{1}{2}$ inches. Sheets—30. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—475. Author—Bodhāyana.

Incomplete.

Beginning—Same as No. 2003.

End :

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोर्हस्ता-
भ्यामादद इत्यादायाभिमन्त्रयतेऽभ्रिरसि नारिरसीति ।

अथाग्नीध्रमाहाग्नीदेहीमं यूपावटं खनोपरसम्मितं प्राक्
पुरीषमुद्वपताच्चतुरङ्गुलेनोपरमति खनतादिति तं स खनति
वा खा(नयति वा यावदेवात्राध्वर्युश्वेष्टति तावदेष प्रति-
प्रस्थातौदुम्बरीं स्थुणां यजमानेन सम्मायाधस्तात्परिवास-
यत्यच्छिन्नो रायस्सुवीर इति + तां परस्तादर्वाचीं प्रो-
क्षति ॥ २६ ॥)

Subject : Bodhāyanaśrautasūtras. Eighth (sixth) Praśna. 1-26 Khaṇḍas.

Remarks:—The Ms. is in a very good condition. This Ms. abruptly ends in the middle of the 26th Khaṇḍa of the 8th Praśna.

॥ बोधायनश्रौतसूत्रम् ॥

2006. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 202. Substance—Paper. Size—9¾ × 4⅝ inches. Sheets—40. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Bodhāyana. Agnicayana only.

Beginning :

हरिः ॐ ॥ शुभमस्तु ॥

उखां(खाः) सम्भरिष्यन्नुपकल्पयतेऽश्वञ्च गर्दभञ्च

तयोरेव रशने मौञ्ज्यौ वा कुशमय्यो वाग्निञ्च ब्राह्मण-सम्पन्नां मृदञ्च भावितां करणीयां वल्मीकवपां कृष्णाजिनञ्च पुष्करपर्णञ्च योक्त्रमुदकुम्भं हिरण्यमर्मकपालानि शर्करा अवाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि वेश्यं सप्तदशं सूनामाधिकरणीमुखाकृतं कुशलमित्यथामावास्येन वा हविषेष्ट्वा नक्षत्रे वाग्रेण शालां शम्यां(म्या)न्यासे गर्भं खानयति तद्भावितां मृदमवलेपयति समां विलेन करोति तदुपासादयति कृष्णाजिनञ्च पुष्करपर्णञ्च योक्त्रमुदकुम्भं हिरण्यमित्यथ विपुवति स्फ्येनोद्धृत्यावोक्ष्य वल्मीकवपां निदधाति ॥

End:

सर्वसंस्थां पशोः कुर्वन्त्यथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णां स्रुचमग्नेर्विमोकं जुहोतीमं स्तनमूर्जस्वन्तं जापयामी(धयापामि)त्यथैनमुपतिष्ठते येऽग्नयः पुरीष्या इत्यथैनमाप्तिभिरुपतिष्ठते आपं त्वाग्ने मनसेति नवभिरनुच्छन्दसमथोदवसानीयया यजतेऽथ देविका हविर्भिर्यजतेऽथ त्रैधातवीयया यजतेऽथ सौत्रामण्या यजते संवत्सरं न कञ्चन प्रत्यवरोहति न शीर्षमांसं खादति न वयस्यं(सां)मांसं नाग्निं चित्वा रामामुपेयात्काभिचिद्ध(द्व)र्षति धावेद्यदि धावेदुपावर्तेताभ्यमेवाभ्युपावर्तेत इति ब्राह्मणं ॥

Colophon:

इत्यग्निः समाप्तः । श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥

इत्यग्निचयनसूत्रम् ॥

Subject: Bodhāyanaśrautaśutras. Agnicayana. 14th (10th) Praśna. 1-60 Khaṇḍas.

Remarks:—The Ms. is in good condition. On the title Page is given—'गङ्गाधरदीक्षितस्येदं पुस्तकम्' i. e. the Ms. belonged to one Gaṅgādhara Dīkṣita.

॥ बोधायनश्रौतसूत्रम् ॥

2007. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 203. Substance—Paper. Size—10¼×4 inches. Sheets—48. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Bodhāyana. Agnicayana only.

Beginning, end and subject—Same No. 2006.

Colophon:

इति अग्निः समाप्तः ॥

इत्यग्निचयनसूत्रम् ॥

इदं पुस्तकं शामभट्टानां ॥ मह्यार्पणमस्तु ॥ श्रीरस्तु ॥

Remarks:—The Ms. is in good condition. On the title page is given 'इदं पुस्तकं शामभट्टस्य वेंकटभटाचे वाड्याश आले' i. e. the Ms. belonged to Śāmabhaṭṭa.

॥ बोधायनश्रौतसूत्रम् ॥

2008. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3800. Page 18. Right column. Substance—Paper. Size— 10⅜×5 inches. Sheets—23. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—420. Author—Bodhāyana. Agnicayana. Incomplete.

Beginning—Same as No. 2006.

End:

अथाग्निं सर्वतोमुखं चिनुते गायत्रीं पुरस्तादुपदधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्ये तथादेवतं कृत्वा सूददोहसः करोति

* * *

सम्प्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिक्लृप्त्याभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या गायत्र्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाश्च आसन् प्राणदा इत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां चरति एतावदेवैतदहः कर्म क्रियते वसन्त्येतां रात्रिम् ॥ ३६ ॥

अथ द्वितीयेऽहन्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचर्यास्यथ... ॥

Subject: Bodhāyanaśrautasūtras. Agnicayana. Fourteenth (Tenth) Praśna. 1-36 Khaṇḍas.

Remarks:—The Ms. is in good condition. The Ms. breaks off in the beginning of the 37th Khaṇḍa of the Cayana kalpa.

॥ बोधायनश्रौतसूत्रम् ॥

2009. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3794. Page 18. Right column. Substance—Paper. Size—10 × 4⅞ inches. Sheets—13. Lines—9 to a Page. Script—Devanāgarī. No of Granthas—250. Author—Bodhāyana. Vājapeya only.

Beginning :

श्रीगणेशाय नमः ॥

वाजपेयेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनं सुवर्णरजतौ च रुक्मौ बस्ताजिनं शतमानँ हिरण्यं सप्तदश सौवर्णानि कृष्णलानि हिरण्यपात्रं मधोः पूर्णमौदुम्बरँ रथचक्रँ सप्तदशारँ सप्तदशफलकां च सी(भि)निं यूपं च तूपरं चतुरश्रिं सप्तदशारत्निं गोधूमकलापीमुष्णीषं नैवारं सप्तदशशरावं सप्तदशोषपुटान्सप्तदश वायव्यानि सप्तदश पृथुबुध्नानुपयामान्सतं च वालं च सप्तदश निष्कान्सप्तदश वसनानि सप्तदश वासोभारान्सप्तदश रथान्सप्तदश दुन्दुभीन्सप्तदश हस्तिनः सप्तदश दास्यः सप्तदशानाँसि युक्तानि सप्तदश गवां शतानि वयसोवयसो वा सप्तदश सहस्रं वा तस्मिन्हि सर्वाणि वयाँसि भवन्ति ॥

End :

अभ्येनमाह्वयते होता प्रत्याह्वयते अध्वर्युः शँसति प्रतिगृणाति प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतँ होतृचमसमनूद्यच्छन्त इतरानुपोद्यच्छन्ते चमसानथाश्रावयत्योश्रावयास्तु श्रौषडुक्थशा यज सोमानामिति वषट्कृते जुहोति तदेतान्प्राजापत्यान्सह जुह्वति वषट्कृतानुवषट्कृते द्विर्जुहोति तथैव द्विर्द्विः सर्वांश्चमसान्जुह्वति + समानमत ऊर्ध्वँ सन्तिष्ठते वाजपेयो वाजपेयेनेष्ट्वा प्रत्यवरोहणीयेनाग्निष्टोमेन चतुष्टोमेन यजेत सन्तिष्ठते वाजपेयः सन्तिष्ठते वाजपेयः ॥ १३ ॥

Colophon : Nil.

Subject : Bodhāyanaśrautasūtras. Vājapeya. Fifteenth(11th)

praśna. 1—13 Khaṇḍas.

Remarks: The Ms. is in good condition. An index of Paṭalas is given after the colophon, as follows:—

'वाजपेयेन यक्ष्यमाणो भवति । अथ वै भवति सावित्रं जुहोति । अथातो महारात्र एव बुध्यन्ते । अथैष्मात्समिधमाददान आह । अथ प्रतिप्रस्थाता पत्नीमुदानयति । अथ सावित्रꣳ हुत्वा प्रसर्पति माध्यन्दिनाय । अथ याचति नैवारम् । अथाहाभिसर्पं यजमान । अथ याचति नैवारम् । (तद्बुद्धा प्रतिगृह्योपावरोहति । सम्पृचस्थ सं मा भद्रेण पृङ्क्ति ।) अमाय त्वेति पुरस्तात् । अथ सावित्रꣳ हुत्वा प्रसर्पन्ति तृतीयसवनाय' ॥

॥ बोधायनश्रौतसूत्रम् ॥

2010. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 204. Substance—Paper. Size—10×4½ inches. Sheets—11. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Bodhāyana. Vājapeya only.

Beginning end, and subject—Same as No. 2009.

Remarks:—The Ms. is old and is in good condition. It is partly damp in appearance. The paper is rough and is of Indian manufacture.

॥ बोधायनश्रौतसूत्रम् ॥

2011. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3796. Page 18. Right column. Substance—Paper. Size—10×4½ inches. Sheets—11.

Lines—12 to a Page. Script—Devanāgarī. No. of Granthas —320. Author—Bodhāyana. Rājasūya only.

Beginning:

ॐ राजसूयेन यक्ष्यमाणो भवति पुरस्तात्फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्या आमावास्येन वा हविषेष्ट्वा दीक्षते तस्यैका तिस्रो वा दीक्षास्तिस्र उपसदः सप्तरथां प्रसुतः सन्तिष्ठत एवं(ष) प्रायणीयोऽग्निष्टोमश्चतुष्टोमः सहस्रदक्षिण उदवसानीयान्तोऽथाष्टमेह्न्यानुमत निर्वपति हविष्कृता वाचं विसृजते समानं कर्माधिवपनादभ्युष्य दक्षिणार्धे गार्हपत्यस्याष्टौ कपालान्युपदधात्येकं प्रतिप्रस्थातोत्तरतो नैर्ऋताय हविः पेष्यै प्रयच्छन्नाह प्राचश्च प्रतीचश्च श्यव-श्रातयन्ती पिण्ढीति स ये प्राञ्चः शम्याया अवशी-यन्ते तानध्वर्युः समुप्य संयुत्यानुमतं श्रपयत्यथ ये प्र-त्यञ्चः शम्याया अवशीयन्ते तान्प्रतिप्रस्थाता समुप्य संयुत्य नैर्ऋतं श्रपयित्वा(त्या)ददत एतन्नैर्ऋतमुपस्तीर्णाभिघारितं कृष्णं वासः कृष्णतूषमन्तमागारादेकोल्मुकमुदपात्रमित्ये-तत्समादाय गार्हपत्ये स्रुवाहुतिं जुहोति ॥

End:

प्रसिद्धोऽभिषवः प्रसिद्धं ग्रहा गृह्यन्ते समानं कर्माव-भृथात्प्रसिद्धोऽवभृथ उदयनीय(ये)ष्ट्येष्ट्वा मैत्रावरुणीं वशा-मुपाकरोति तस्यैव प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते यानि कानि च लोमानि व(वा)पा(प)यते सन्तिष्ठतेति एष प्रतीचीनस्तोमः केशवपनीयोऽतिरात्र(त्रः) सहस्रद-क्षिण उदयनीयान्तोऽथ मध्यमां शालामध्यवसाय मथि-त्वाग्नीन्विहृत्य व्युष्टये द्विरात्राय दीक्षते तस्यापरिमिता

दक्षिा द्वादशोय(पस)दस्तया राजानं क्रीणाति (यथा मन्यते) द्विरात्रस्य मे सतोऽमावस्यायै उपवसथीयेहन्पू- र्वमहः सम्पत्स्यत उत्तरम्मिन्नुत्तरमिति सन्तिष्ठते व्युष्टिद्वि- रात्रोथोत्तरां(र्ष्यां) शालामध्यवसाय मथित्वाग्नीन्विहृत्यो- दयनीयायामग्निष्टोमाय दीक्षते तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः सन्तिष्ठत उदयनीयोऽग्निष्टो- मथतुष्टोमः सहस्रदक्षिण उदयनीयान्तोऽथ देविकाहंवि- र्भिर्यजतेऽथ त्रैधातवीयया यजतेऽथ सौत्रामण्या यजते राजसूयोऽर्धसप्तदशैर्मासैः सन्तिष्ठते राजसूयः सन्तिष्ठते राजसूयः ॥ २३ ॥

Colophon :

इति बौधायनराजसूयप्रश्नः समाप्तः ॥

Subject . Bodhāyanaśrautasūtras. Rajasūyakalpa. Sixteenth (twelfth) Praśna. 1—23 (1-20) Khaṇḍas.

Remarks :— The Ms. is in good condition. This Ms. is full of scriptorial errors.

॥ बोधायनश्रौतसूत्रम् ॥

2012. BODHĀYANASRAUTASŪTRAM.

Burnell's Catalogue No. 3797. Page 18. Right column. Substance—Paper. Size—10 × 4¾ inches. Sheets—20. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—320. Author—Bodhāyana. Rājasūya only.

Beginning, end, colophon and subject—Same as No. 2011.

Remarks :—The Ms. is in good condition.

॥ बोधायनश्रौतसूत्रम् ॥

2013. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3798. Page 18. Right column.
Substance—Paper. Size—10 × 4¾ inches. Sheets—8. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—140. Author—Bodhāyana. Dvādaśāha only.

Beginning :

श्रीगणेशाय नमः ।

द्वादशाहेन यक्ष्यमाणो भवत्येको वा बहवो वा (य)द्येको दक्षिणावता यजते यदि बहवोऽमावास्या एव षड्‌हेनोपरिष्टाद्दीक्षते(न्ते) गृहपतेररणेः(ण्योः) सञ्जानते पृथग्वा ते यदि गृहपतेररणेः(ण्योः) सञ्जानते मथित्वा गार्हपत्यमाहवनीयमुद्धरति ग्रामाद्धृतश्रपणमाहरन्ति यद्यु वै पृथक् सञ्जानते गृहपतिरेव प्रथमो मन्थते तदेवेतरे पर्युपविश्य मथित्वा माथित्वैव गार्हपत्यं सन्निवपन्ति तस्मादेकवद्धृतादाहवनीयमुद्धरन्ति ग्रामाद्धृतश्रपणानाहृत्य सन्निवपन्त्यथ यदि पश्चादपर आगच्छति मथित्वैव गार्हपत्येऽर्धं निवपत्याहवनीयेऽर्धं ग्रामाद्धृतश्रपणमाहृत्याप्यजेत्युपो एनं पूर्वेषु कर्मसु ह्वयन्तेऽथातः पवनस्यैव मीमांसा गृहपतिमेवाध्वर्युः प्रथमं पवयत्यथ होतारमथ ब्रह्माणमथोद्गातारं प्रतिप्रस्थाताऽध्वर्युं पवयति प्रस्तोतारं प्रशास्तारं ब्राह्मणाच्छंसिनमाग्नीध्रः प्रतिप्रस्थातारं पवयत्यच्छावाकं नेष्टारं पोतारं सदस्यमुन्नेताऽग्नीध्रं पवयति ग्रावस्तुतं सुब्रह्मण्यं प्रतिहर्तारमात्मानमन्ततस्ते चेद्धूयुरध्वर्युर्वात्र सर्वस्य पवयिता

म नः सर्वान्पवयत्विति स एवैनान्सर्वान्पवयत्यापि वा-
न्योन्यं पवयति(न्ति) यद्यधीयन्तो भवन्ति ॥

End:

तदु वा आहुर्द्वादशा(श) दीक्षा द्वादशोपसदो द्वादशाहं प्र-
सुताः कथमस्यैतान्यहान्यनीष्टान्यहान्वा(न्या)प्रीता[ति]नि
पशुमन्ति भवन्तीति तिस्र एकादशिनो(न्यो)ऽग्नीषोमीयो
वैश्वदेवोऽनूबन्ध्याः षट्त्रिंशतमेते पशवः षट्त्रिंशतमेतान्यहा-
न्येवमस्यैतान्यहानीष्टान्या प्रीतानि यण्णु(पशु)मन्ति भव-
न्तीति तदु वा आहुर्यद्द्वादशदीक्षो द्वादशोपसदो द्वादशाहं
प्रसुतः कथं द्वादशाहेन संवत्सर आप्यत इति द्वादश पौर्ण-
मास्यो द्वादशाष्टका द्वादशामावास्या एतानि नवे (ह वै)
संवत्सरस्य वर्षिष्ठान्यहान्येतान्यनुसंवत्सर आप्यते मासो(?)
(समाप्तो) द्वादशाहः समाप्तः संवत्सरकाम एवं द्वादशाहेन
संवत्सर आप्यत एवं द्वादशाहेन संवत्सर आप्यते ॥ १२ ॥

Colophon:

द्वादशाहसूत्रं समाप्तम् ॥ श्रीशिवार्पणमस्तु ॥

श्रीगोपालाय नमः ॥

Subject: Bodhāyanaśrautasūtras. Dvādaśāha Kalpa.
Ninteenth (16th) Praśna. 1—12 Khaṇḍas.

Remarks:—The Ms. is in very good condition. This Ms. is full of scriptorial errors.

॥ बोधायनश्रौतसूत्रम् ॥

2014. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3784. Page 18. Right column.

Substance—Paper. Size—10×4¾ inches. Sheets—11. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Bodhāyana. Atirātra, Aptoryāma and Ekādaśinī only.

Beginning:

श्रीगणेशाय नमः ॥

ॐ अतिरात्रं करिष्यन्नुपकल्पयते चतुरोऽस्त्रि(ति)रात्नपशूनरुणपिशङ्गमश्वमौदुम्बरं षोडशिपात्रं चतुस्रक्ति ज्यायसो-ऽभृणान् ज्यायस एकधनान् दीक्षते रोहिण्या पिङ्गलैकहायन्या सोमं क्रीणाति द्वादशोपसदः प्रसिद्धेन कर्मणोपवसथादथ वसतीवरीः परिहृत्य पयांसि विशिष्योपवसन्त्यथातो महारात्र एव बुध्येते(ध्यन्ते) ॥

End:

अथ वै भवतीष्टं वपया भवत्यनिष्टं वशयाथ पात्नीवते न प्रचरतीति स यत्रैकादशिन्या अनुबन्धस्येष्टं वपया भवत्यनिष्टं वशया तज्जघनेन गार्हपत्यमौपसदायां वेद्यां स्तम्बयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं त्रिर्यजुषा तूष्णीं चतुर्थं पूर्वं परिग्राहं परिगृह्णाति ॥

* * * *

आज्येन दिशो जुहोति पृषदाज्येन वनस्प(तिमाज्यस्य) स्विष्टकृतमाज्यस्येडामवद्यति पृषदाज्येनानूयाजान्यजति सोत्रैव पत्नीः संयाज्यात्रैव समिष्टयजुर्जुहोति सन्तिष्ठते पात्नीवतः ॥

Colophon:

इति बौधायनीये एकादशिनीसूत्रं समाप्तम् ॥

Subject: Bodhāyanaśrautasūtras. (Seventeenth Praśna).

a. Atirātra. 1—4 (1—10)Khaṇḍas.

b. Āptoryāma. 1 Khaṇḍa.

c. Paśvekādaśinī. 5—7 (11—16)Khaṇḍas.

Remarks:—The Ms. is in good condition. The Ms. is full of scriptorial errors.

॥ बोधायनश्रौतसूत्रम् ॥

2015. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 205. Substance—Paper. Size—10¼×4 inches. Sheets—14. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Bodhāyana. Kāṭhakapraśna only.

Beginning:

श्रीगणेशाय नमः ॥

ॐ सावित्रं स्वर्गकाममिश्चिन्वीत पशुबन्धे चेष्टीयते पञ्चो तारं हुत्वा यूपाहुतिं हुत्वा यूपं सयजुषं कृत्वा वेदिं विमिमीते वेदिस्तृतीये यजतेति विज्ञायते तस्याः सौमिकं मानमेतावदेव नानासौमिकात्प्रक्रमात्तृतीयोंऽशः प्रक्रमः स्यात्तेन वेदिं विमिमीते पदाक्ष्णया पार्श्वमानी पदं तिरः पशुमानेन तयोर्यः कर्णसम्मितः प्रक्रमः स इष्यते पदाद्वा नवमस्त(द)क्ष्णया तयोस्तु यः कर्णसम्मितः सप्रक्रमार्थः । तेन मेया सौमिकी वेदिरग्नीनन्वादध्याद्व्रतमुपेयादिध्मा बर्हिः सन्नद्धः स्तम्बयजुर्हरति इदमेव प्रसिद्धं पौरो०(डाशिकं त्रिर्यजुषा तूष्णीं चतुर्थं पूर्वं परिग्राहं परिगृह्णाति करणं जपत्युद्धन्त्युद्धतादाग्नीध्रस्त्रिर्हरति) ॥

End:

आपो न बिभत्स्यात् (बीभत्स्या) यथाब्राह्मण(मेक)·काम(ः) सर्वकामो वा आपो वा इदं सर्वमिति ब्राह्मणं वि·ज्ञायते ब्रह्म वा आपो यद(दा)प उपधीयन्ते ब्रह्म वै त आत्मा धत्ते (तदात्मन्धत्ते) ब्रह्मणः (सायुज्यं॰) सलो·कतामाप्नोति (य) एतमग्निं चिनुत इति सन्तिष्ठत अ(रु)रु·णकेतुकः सन्तिष्ठत अ(रु)रुणकेतुकः ॥

Colophon:

अरुणकेतुसूक्तं सम्पूर्णम् ॥

इति बोधायनसावित्रादिचयनसूत्रम् ॥

इदं पुस्तकं शामभट्टस्य ॥

Subject: Bodhāyanaśrautasūtras. Kāṭhakapraśna (19th Praśna) which contains the following:

1 सावित्रः ॥ 4 समस्तः ॥

2 नाचिकेतः ॥ 5 वैश्वसृजः ॥

3 ब्रह्मचित् ॥ 6 आरुणकेतुकः ॥

Remarks:—The Ms. is old and is in good condition.

॥ बोधायनश्रौतसूत्रम् ॥

2016. BODHĀYANAŚRAUTASŪTRAM.

Not noticed by Dr. Burnell.

Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{3}{4}$ inches. Sheets—7. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Bodhāyana. Sāvitracayana only.

Beginning—Same as No. 2015.

End :

उपहूयमानायामिडायां उपमगृह्णन्ति ग्रहमुपहूतायामिडायामग्नीध आदधाति षडवत्तं प्राश्नन्ति मार्जयन्ते इडोपहूतं ग्रहं यजमानो भक्षयति ॥

दक्षिणानां काले दक्षिणाः सवनीयस्य पूष्णो मृत्युग्रहः न सत्रे दक्षिणा नीयन्ते नाचिकेत एव मृत्युग्रहस्स्यादित्येतदपरं अग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्याऽमिक्षया वेति तस्यै सायमग्निहोत्रे हुते सायन्दोहः प्रातरग्निहोत्रे हुते प्रातर्दोहः पशुपुरोडाशेन सह श्रपणं असमुदिते चर्या सन्तिष्ठते सावित्रः सन्तिष्ठते सावित्रः ॥ ६ ॥

Colophon: Nil.

Subject: Bodhāyanaśrautasūtras. Sāvitracayana. (Ninteenth Praśna) 1-6 (1—5) Khaṇḍas.

Remarks:—The Ms. is in good condition.

॥ बोधायनश्रौतसूत्रम् ॥

2017. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3753 a. Page 18. Right column.

Substance—Paper. Size—10⅜ × 5 inches. Sheets—6 (1-6). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—85. Author—Bodhāyana. Kāṭhakapraśna—incomplete.

Beginning:

अथ नाचिकेतस्य प्रसिद्धं क्षेत्रकरणं यथा सावित्रस्यैतावदेव नाना नात्र लेखा भवन्त्यथ याजुर्षीकपदधाति

लोकोसि स्वर्गोऽसीति अञ्जलिनैकाविंशति यथा निपतन्ति तास्त(त्र त)त्रोपदधाति तदेतदन्यत्रापि प्रकीर्णानां उपधानस्य निदानं यदि प्राङ्कः पञ्च पुरस्तात्पञ्च दक्षिणतः पञ्च पश्चात्पञ्चोत्तरत एकां मध्ये अथ यदि त्रिवृत् सप्त पुरस्तात् तिस्रो दक्षिणतः सप्त पश्चात्तिस्र उत्तरतः एकां मध्ये अथ यथूर्ध्वाः पश्चात् कोट्यां(ट्याः) प्रभृत्यूर्ध्वा(:) स्वयमातृण्णावकाशादथ यदि प्राची स्वयमातृण्णावकाशात् प्रभृति प्राची स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वं स यदीच्छेत् तेजस्वी यशस्वी ब्रह्मवर्चसी स्यादि(मि)ति प्राञ्चाहोतुर्धिष्ण्यादुत्सर्पेदित्याहवनीयसकाशाद्येयं प्रागाद्यशस्वती सा मा प्रोर्णोतु तेजसा यशसा ब्रह्मवर्चसेनेति * * सन्तिष्ठते नाचिकेतस्सन्तिष्ठते नाचिकेतः ॥ ६ ॥

End :

लोकम्पृणयैव द्वितीयामन्याः प्रथमचिती(ति)वत् पुष्करपर्णादय उत्तरतो लोकं प्र(पृ)णयापवर्गे(र्गो) दीर्घदारुभिर्मध्यं कृत्वा पृष्टां दिवीतीपुरीषव्यूहनं अन्त्येष्टकोर्ध्वं व्रतकृद्विपहोमोऽनुशंसनान्तेग्निप्रणयनं हूयमानायां वैश्रवणयज्ञो ब्राह्मणं(णेन) व्याख्यातोऽमकामस्य वा सर्वकामस्य वा पर्वणि पर्वणि वैश्रवणयज्ञः सोत्तरवेदिषु क्रतुषु चिन्वीतेति यथा ब्राह्मणं तस्यैतद्व्रतमिति यथाब्राह्मणम्भिमताश्च व्रतसमुच्चयाः आपोन बीभत्स्या[त] यथाब्राह्मणमेककामस्सर्वकामो वा आपो वा इदं सर्वमिति ब्राह्मणं विज्ञायते ब्रह्म वा आपो यदाप उपधीयन्ते ब्रह्म वै ता आ(दा)त्म(न्) यश्चे ब्रह्मणः सायुज्यं सलोकतामाप्नोति य एतमग्निं चिनुत इति

सन्तिष्ठत आरुणकेतुकः सन्तिष्ठत आरुणकेतुकः ॥

Colophon: Nil.

Subject: Bodhāyanaśrautasūtras. Kāṭhakapraśna (19th Praśna) containing Nāciketacayana, Brahmacit, Samasta, Vaiśvasṛja and Āruṇaketuka.

Remarks:—The Ms. is in good condition. The other work contained in this Ms. is Bodhāyana Cāturmāsya Kalpa.

॥ बोधायनश्रौतसूत्रम् ॥

2018. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3749. Page 20. Left column. Substance—Paper. Size—10 × 5½ inches. Sheets—49. Lines—11 to 15 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Bodhāyana. Dvaidhasūtras only.

Beginning:

श्रीलक्ष्मनृसिंहाय नमः ॥ श्रीगणेशाय नमः ॥

उपवसथ इति कथमु खल्पवस(थं) इति जानीयात् । सन्ध्यस्वी(स्वि)[क]देवोपपाद्ये(द्यो)[त]थो(थ) मू(पू)रि णा-(नाद)र्शीति साधु खलु सन्ध्यः साधु खलु सन्धेरुपपादनं ननु खलु सन्ध्यः ॥ सूपपादय (यत्पौर्णमासीं यजते तस्य चेदुपसथोस्तमित आदित्ये) इव सर्वेषां त्वेव सन्ध्यः स ह स्माह बोधायनो यत्रैतदुपवसथो(त) अस्तमित आदित्ये पुरस्ताच्च-न्द्रमा लोहिती भवन्निवोदी(दि)या तमप्युवसथं विजानीया-दित्यत्रो ह स्माह शालिकी(लीकि)रातिपन्नः खल्वेष भवति स सन्ध्यं वैवोपयादयिषेत् पूर्णा वाभियजेत तस्य चेदुप-

वसतोऽस्तमित आदित्ये पुरस्ताच्चन्द्रमा लोहितीभवन्निवो-
दी(दि)यादरं(दारम)ताग्निहोत्रेणेत्युक्त्वा पार्वणेन प्रक्रामेत्
सस्थिते पार्वणेऽग्निहोत्रं जुहुयादिति नु खलु पौर्णमास्या-
मथामावस्यायामिति स ह स्माह बोधायनो दृश्यमान
एवोपवसेन्न दृश्यमानं ए(इत्ये)वश्चैव खलु कुर्यादिति शा-
लीकिरस्मि त्वमपि दृश्यमान उप(व)सथो यत्रैव तद्रात्री-
[त्रि]भिरुपपन्नोऽणुश्चन्द्रमाः परिनक्षत्रमुपव्युषं भवति ॥

End :

बृहस्पतिमवे दाक्षिणानां होम इत्यनुसवनं दक्षि-
णानां जुहुयादिति बोधायनो माध्यन्दिने सवने दाक्षिणा
नि जुहुयाद्दामीत्येवेतरयोः सवनयोः ब्रूयादिति शालीकि
र्हिरण्येन घृतमुत्पुनातीति मन्त्रं निरुप्तमेतत्कृतं स्यादिति
बोधायनस्तूष्णीक इति शालीकिरनुभृते वेद्यै दक्षिणत आ-
हवनीयस्य बृहतस्स्तोत्रं प्रत्याभिषिञ्चतीति सूत्रं बोधायनस्य
कृष्णाजिनमप्यन्यत्राभिषिञ्चेदिति शालीकिः * *

श्वेतमश्वं ददाति श्वेतां वडबां ददाति अश्वमसितश्चं
ददाति गर्भिणीं वडबां ललामं ददात्यनुसूत्रं (नडुहं छत्रं)
ददाति त्रयस्त्रिंशतं निष्कान्ददाति सोपदण्डं (चमसं)
ददाति हिरण्मयं चमसं ददाति) राशिकृतं धान्यं
ददाति नखकृतं धान्यं ददातीत्येतानि च नित्यानि च
दद्यादिति बोधायन एतान्येवेति शालीकिरेतान्येवेति
शालीकिः ॥ १८ ॥

Colophon :

दशमोऽध्यायः ॥ द्वैधश्चतुर्थः प्रश्नः ॥ समाप्तः ॥

बोधायनाचार्येभ्यो नमः ॥

Subject : Bodhāyanaśrautasūtras. Dvaidhakalpa. (20-23 Praśnas). The following table will show the division of the four praśnas into Adhyāyas and Khaṇḍas :

No.	Subject.	Praśna	Adhyāya.	Khaṇḍa.	Sheets.
1	दर्शपूर्णमासौ.	I	1—5	1—15	1
2	अग्न्याधेयम्.	„	?	16—18	10
3	पुनराधेयम्.	„	2	19—26	12
4	पशुबन्धः.	„	8—10	27—33	15
5	चातुर्मास्यम्.	II	1—2	1—6	19
6	अग्निष्टोमः.	„	3—10	7—26	22
7	अग्निकल्पः.	III	1—6	1—12	32
8	वाजपेयः.	„	7	13—15	38
9	राजसूयः.	„	8—10	16—21	39
10	इष्टिकल्पः.	IV	1—4	1—8	41
11	द्वादशाहः.	„	5—10	9—18	45

Remarks :— The Ms. is in a fairly good condition, though the last few sheets are worn out.

॥ बोधायनश्रौतसूत्रम् ॥

2019. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 2525. Page 20. Left column. Substance—Paper. Size—10½ × 4⅜ inches. Sheets—90, Lines—9 to a Page. Script—Devanāgarī No. of Granthas —1600. Author— Bodhāyana. Dvaidhasūtras only.

Beginning, end, colophon and subject—Same as No. 2018.

Remarks :—The Ms. is in a good condition. This Ms. is recent and a copy of No. 2018.

॥ बोधायनश्रौतसूत्रम् ॥

2020. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 206. Substance—Paper. Size—10 × 4 7/10 inches. Sheets —90(1-41 and 1-49). Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Bodhāyana. Dvaidhasūtras only.

Beginning, end, colophon and subject—Same as No. 2018.

Remarks :— The Ms. is in a very good condition. It is full of scriptorial errors. After the colophon the Pariśiṣṭa treating of Sarvatomukha is given, as follows :—

'अथातः सर्वतोमुखं व्याख्यास्यामः । चिन्वीत सर्वतोऽग्निमिति बोधायनो न चिन्वीतेति शालीकिः । अत्रोहस्माह मौद्गल्यः पूर्वस्मिन्नेवाग्निचयः ॥

* * * * *

प्राञ्च एवावभृथमन्वेयुरिति गौतमोऽरण्योस्समारोहे इति सूत्रं शालीकेरत्रोह स्माह बोधायनो गृहपतिरेवारण्योः समारोपयेतत इतरे यथार्थं गच्छेयुः ॥ इति श्रीद्वैधसूत्रं सम्पूर्णम् ॥

॥ बोधायनश्रौतसूत्रम् ॥

2021. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3799. Page 19. Right column.
Substance—Paper. Size—10¾ × 5 inches. Sheets—10.

Lines—8 to a Page. Script— Devanāgarī. No. of Granthas—180. Author—Bodhāyana. Karmānta Kalpa only.

Beginning:

ॐ श्रीगणेशाय नमः ॥ हरिः ॐ ॥

ॐ पश्चातयेन कल्पमवेक्षेत च्छन्दसा ब्राह्मणेन प्रत्ययेन न्यायेन संस्थावशेनेति । छन्दसेति यद्वोचाम यथान्यायं प्रणीयि(?) (इ)दंपूर्वमिदमुत्तरामित्यथापि मन्त्र एव स्वयं कर्म प्रब्रूते कर्मानुवादी भवति यथैतद्भवति प्रेयमगाद्धिषणा बर्हि रच्छोर्वन्तरिक्षमन्विहि देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोर्हस्ताभ्यामग्नये जुष्टं निर्वपामीति यच्छन्दसा न शक्नुयात्कल्पयितुं ब्राह्मणेन तच्च कल्पयिषेत् ब्राह्मणमुहैवैना मन्त्रा न प्रज्ञातान्विदधाति दमनेन करोति दमनेनेति यथापि भवतीषे त्वोर्जेति शाखामाच्छिनत्ति वायवस्थोपायवस्थेति वत्सानपाकरोत्यथाप्यमन्त्राणि कर्माणि विदधाति यथैतद्भवत्यष्टासु प्रक्रमेषु ब्राह्मणोऽग्निमादधीतैकादशसु राजन्यो द्वादशसु वैश्य इत्येवं व्यवस्थावसंयोगात् ॥

End:

अथ पौर्णमासवैमृधाभ्यामिष्ट्वाऽऽमावास्यमेव ततः कांक्षे चेदमावास्यायां सद्यस्कालममावास्यां तमथ सारस्वतौ होमौ जुहुयाच्चैवर्चमुपसन्दध्यादेवं पूर्णदर्वे(?) एवं वास्तोष्पतीयेकथन्नु खलु पूर्णाहुतिं जुहुयादग्नये पृथिव्यै वायवेऽन्तरिक्षाय सूर्याय दिवे वरुणायाग्नः स्वाहेति जुहुयादथेदं तूष्णीमग्निहोत्रमग्निसंस्कारार्थं द्र(ह?)ष्टं भवति तदाज्ये-

नैव जुहुयादवाचीनमवमृज्योर्ध्वमुन्माष्टर्युभे एवं स्ये(?)सायं
प्रातरग्निहोत्रे प्रतिजुह्वा मन्यते औपवसतिकायै रात्रेरथ
सामिधेनीरनुवक्ष्यन् दश होतारं व्याख्याय व्याहृतीरुक्त्वा-
थाहिङ्कुर्यादथानुब्रूयादेतदत्रानुपूर्व्यं भवति कथन्नु खल्व-
ग्न्याधेये सोम इति पूर्णाहुत्यन्तं कर्म कृत्वा शालामध्यवस्ये-
दीक्षणीयमाग्नेयोऽष्टाकपालोऽनुवर्तेत प्रायणीयमैन्द्राग्ना-
श्चादित्यश्च चरुरातिथ्यामग्नये पवमानाय पुरोडाशोऽष्टा-
कपालोग्नीषोमीयस्य पशुपशुपुरोडाशमग्नये पावकायाम-
शुचये प्रातस्तननीयानन्वारम्भेष्टिरपि वा सर्वाण्येवाग्न्या-
धेयिकानि हवींषि परिनिष्ठाप्य शालामध्यवस्येदुदवसानी-
यायामन्वारम्भेष्टिरिति ॥ १७ ॥

Colophon :

नवमोऽध्यायः ॥

Subject : Bodhāyanaśrautasūtras. Karmānta Kalpa (24-26 Praśnas). 1-9 Adhyāyas. 1-17 Khaṇḍas.

Remaaks:—The Ms. is in good condition. After the colophon the following is given:—

'अथेदं पुनराधेयं कियन्नु खलु पुनराधेयं भवतीत्यग्नीनाधाय पापीया-
नभूवमस्माशिषि पुत्रो मे मत इत्येतस्मिन्स्त्वे......' ॥

॥ बोधायनश्रौतसूत्रम् ॥

2022. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 207. Substance—Paper. Size—7¼ × 4¼ inches. Sheets—16. Lines 17 to 19 a Page. Script—Deva-

nāgarī. No. of Granthas—700. Author—Bodhāyana. Prāyaścitta sūtras only.

Beginning :

अथातो मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः । सर्वत्रोपरिष्टान्मन्त्रकृतं यद्यवस्ताभिपतेद्ब्रह्मप्रतिष्ठा मनस इत्येतया प्रतिष्ठाप्यैतयैव स्रुवाहुतिं जुहुयाज्जुत्वा वा प्रतिष्ठापयेज्जुत्वानन्तरं कर्म कुर्यादेवं वम्भेष्वतिक्रान्तं कर्म नाद्रियेत यद्यर्थलुप्तं भवति सर्वत्राश्राविताप्रत्याश्रावितवषट्काराणामत्युक्तानुक्तहीनेष्वाश्रावितप्रत्याश्रावितमित्येतया स्रुवाहुतिं जुहुयात् सर्वत्र देवतोच्चारणेषु भागिनीं देवतामनुच्चारयित्वा योऽन्यामुच्चारयेद्यद्वो देवा अतिपातयानीत्येतया स्रुवाहुतिं जुहुयात् ।

* * * * *

सर्वत्र दार्विकूर्चप्रस्तरविधृतिपरिधिबर्हिःपवित्रवेदोपवेषेध्मद्रव्यसम्भाराणां छेददाहोपघातेषु नाशे विनाशे वाऽभ्यं यथालिङ्गं कृत्वा यथालिङ्गमुपसाद्य 'त्वमग्ने अयासि प्रजापते' इत्येताभ्यां स्रुवाहुती(तिं) जुहुयात् सर्वत्र वितते यज्ञकर्मणि ॥ १ ॥

End :

अथ यद्येककपालः परावर्तेत प्रजापतेर्वर्तनिमनुवर्तस्वेत्यध्वर्युः स्वस्थाने प्रतिष्ठापयेत् प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे विश्वमन्याभि वावृध इत्येताभ्यां यजमानोऽनुमन्त्रयेत ।

* * * *

सर्वप्रायश्चित्तानि जुहुयाज्जयादीनीत्येकेऽभ्यातानीत्येके

राष्ट्रभृत इत्येकेऽभ्यात्यहोमानित्येके छन्दांसीत्येके सौरी-
दारित्येके तनुरित्येके होतृनित्येके दशात्मकामित्येके पौर्वी-
रित्येके वैष्णवीरित्येके महाव्याहृतीरित्येके प्राजापत्यानि-
त्येके व्याहृतीरित्येके प्रणवमित्येके सर्वानित्याचार्यः सर्वा-
नित्याचार्यः ॥

Colophon:

इति बौधायनप्रायश्चित्ते तृतीयः प्रश्नः समाप्तः ॥

Subject:—Bodhāyanaśrautasūtras. Prāyaścittasūtras only. 1-3 (27-29) Praśnas.

(a)	First Praśna	1—12	Khaṇḍas.
(b)	Second ,,	1—13	,,
(c)	Third ,,	1—13	,,

Remarks:—The Ms. is old and is in a fairly good condition.

॥ बोधायनश्रौतसूत्रम् ॥

2023. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3795. Page 18. Right column. Substance—Paper. Size—10⅝ × 4⅝ inches. Sheets—5. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Bodhāyana. Twenty-eighth Praśna—incomplete.

Beginning:

श्रीवेङ्कटेशाय परमगुरवे नमः ॥

बोधायनम् ॥ मृगारेष्टिसूत्रम् ॥ अथ वै भवति यः
पापयक्ष्मगृहीतः स्यात् यो वावरुध्येत देवेभ्यः पितृभ्यो
गोब्राह्मणेभ्यः स्तेयेनाभिशस्तोऽभिशस्यमानो वा रहस्येष्ट्वा
यजेतैतयेष्ट्वा यक्ष्यमाण उपकल्पयते हिरण्यं तस्याः प्रज्ञात

उपवसथोऽथ प्रातर्हुतेऽग्निहोत्रे पुरा अपां प्रणयनात् गार्हप-
त्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये
जुहोत्यन्वारब्धे यजमानो येन देवाः पितर इति अपरं
चतुर्गृहीतं गृहीत्वा तस्मिन्नेव जुहोति प्राजापत्यं पवित्रमिति
पुनः चतुर्गृहीत्वा जुहोतीन्द्रः सुनीती सह मा पुनात्विति
अथ पृष्ठ्यांस्तीर्त्वाऽपः प्रणीयाग्नये॰ होमुचेऽष्टाकपालमि-
त्यादि दश हविषमिष्टिं निर्वपति ॥

End:

अथैतस्मै नक्षत्राय चरुं निर्वपति यथा त्वं देवानाम-
सि एवमहं मनुष्याणां भूयासमिति निर्वपणकाले यजमा-
नायतन आसीनो यजमानो जपत्यभिनीयैवाहानि निर्वपेत्
उदिते सूर्ये प्रचरेदथैतमदित्यै चरुमथैतं विष्णवे चरुमिति
यजति यज्ञो वै विष्णुर्यज्ञ एवान्ततः प्रतितिष्ठतीति ब्राह्म-
णं वरो दक्षिणा भवतीति विज्ञायते पाकवद्वापसिद्थ (प्र-
सिद्धेष्टिः पसिद्धः) पशुः पथिकृत्येष्ट्वेष्ट्वा दर्शपूर्णमासाभ्यां
यजेत नक्ष(त्रस)त्रेण धृतिरानन्त्याय ज्योतिषामयनेनेष्ट्वा पापं
निर्नु(र्णु)द्य ज्योतिष्ममुपजायतेऽपपुनर्मृत्युं जयतीति ह स्माह
बोधायनः ॥ ४ ॥

Colophon: Nil.

Subject: Bodhāyanaśrautasūtras. (Twenty-eighth) Praśna.
1-4 Khaṇḍas.

Remarks:—The Ms. is in good condition.

॥ बोधायनश्रौतसूत्रम् ॥

2024. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 208. Substance—Paper. Size—7×4 inches. Sheets—11 (1-12, 2nd sheet missing). Lines—15 to 17 to a page. Script—Devanāgarī. No. of Granthas—270. Author—Bodhāyana. Śulbasūtras only—incomplete.

Beginning:

श्रीगणेशाय नमः ॥

अथेमे अग्निचयास्तेषां भूमेः परिमाणविहारान्व्याख्यास्यामः । अथाङ्गुलप्रमाणं चतुर्दशाणवश्चतुस्त्रिंशत्तिलाः (पृथुसंश्लिष्टा इत्यपरं) दशाङ्गुलं क्षुद्रपदं द्वादशप्रदेशः पृथोत्तरयुगे त्रयोदशिके पदं पञ्चदशाष्टाशीतिशतमीषा चतुःशतमक्षः षडशीतिर्युगं द्वात्रिंशज्जानुः षट्त्रिंशच्छम्याबाहू द्विपदः प्रक्रमो द्वौ प्रादेशावरत्निरथाप्युदाहरन्ति पदे युगे प्रक्रमेऽरत्नावियति शम्यायां च मानार्थेषु याथाकामीति पञ्चारत्निः पुरुषो व्यामश्च चतुररत्निर्व्यायामश्चतुरस्रं चिकीर्षन्यावच्चिकीर्षेत्तावतीं रज्जुमुभयतः पाशां कृत्वा मध्ये लक्षणं करोति ॥

End:

तासां पञ्चषोडशीरपोद्धृत्य(द्धृ)शेषं परिमण्डलं करोति तदुत्तरेण द्रोणचिता व्याख्यातमथ याः पञ्चषोडश्यस्ताभिरवान्तरदिक्षु पादानुभयेच्छिरसः पुरस्तात् (तासां) परिकर्षणं व्याख्यातं प्रचीना सप्तधा विभागः प्रधिमध्यमाः प्रक्रमव्यासा भवन्ति (यदतिरिक्तं सम्पद्यते न) चतुरस्राणामध्यर्धाभियोयुज्येताऽपरस्मिन्प्रस्तारे पादानां शिरो-

वद्विभाग(ः)शिरः पादवमत्यासं चिनुयाप्तुषतः प्रस्तारीभि-
कीर्षेत्कूर्मस्यान्ते तनुपुरीषमुपदध्यान्मध्ये बहुलमेत(देव)-
द्रोणे विपरीतमथ हैक एकविधप्रभृतीन्प्र उगादीन्
ब्रुवते समचतुरस्रानेक आचार्यास्तस्य करणया द्वादशेनेष्टकाः
कारयेत्तासामर्थ्याः पाद्याश्चा(था)श्वमेधिकस्याग्नेः पुरुषा-
भ्यासो नारत्निप्रादेशानां प्रकृतौ वा त्रिगुणस्त्रिस्तावोऽभि-
र्भवत्येकविंशोऽग्निर्भवतीति तदु(तीत्यु)भयं ब्राह्मणमुभयं
ब्राह्मणम् ॥

Colophon:

इति बौधायनीयशुल्बसूत्रं समाप्तम् ॥

Subject: Bodhāyanaśrautasūtras. Śulbasūtras only. (30th Praśna). 1—8 Adhyāyas. 1—22 Khaṇḍas.

Remarks:— The Ms. is in a fairly good condition. Before the colophon an index of Khaṇḍas is given in reverse order, as follows:—

'अथापरः पुरुषस्य षोडशीभिः । कूर्मचितं चिन्वीत । श्मशानचितं चि-
न्वीत । अथापरः पुरुषस्य षोडशीभिः । द्रोणचितं चिन्वीत ।
(अथापरः पुरुषार्धात्पञ्चदशेन) । रथचक्रचितं चिन्वीतेति ।
उभयतः प्र उगं चिन्वीतेति । प्र उगचितं चिन्वीतेति । अलज-
चितं चिन्वीतेति । कङ्कचित एतेनात्मा पुच्छं च व्याख्यातम् ।
अथापरः पुरुषस्य पञ्चमीभिः । अथ चक्रपक्षो व्यस्तपुच्छः ।
अथापरः पुरुषस्य पञ्चरथ:(स्य:) । अथ वै भवति श्येनचितं
चिन्वीत । न खण्डामु(दु)पदध्यात् । पशुधर्मो ह वा अग्निः ।
अथा(र्धा)ष्टमाः पुरुषाः प्रथमोऽग्निः । प्राग्वंशः षोडश प्रक्रमा-
यामः । अथान्याश्चेयिके विकारे । नानाचतुरस्रे समस्यन् ।
अथेमेऽग्निचयाः ॥'

॥ बोधायनश्रौतसूत्रम् ॥

2025. BODHĀYANAŚRAUTASŪTRAM.

J. L. Collection No. 209. Substance—Paper. Size—6¼ × 4¼ inches. Sheets—25. Lines—12 to a page. Script—Devanāgarī No. of Granthas—300. Author—Bodhāyana. Śulbasūtras only.

Beginning, end, colophon and subject—Same as No. 2024.

Remarks :—For Index see Remarks under No. 2024. The Ms. is in a fairly good condition.

॥ बोधायनश्रौतसूत्रम् ॥

2026. BODHĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 359. Page 18. Right column. Substance—Paper. Size—11⅛ × 5⅛ inches. Sheets—16. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Bodhāyana. Pravarapraśna only.

Beginning :

श्रीगणेशाय नमः ॥

अथातः प्रवरान् व्याख्यास्यामः । सप्तानामृषीणाम-गस्त्याष्टमानां पक्षा भवन्ति । त्रयः पक्षा भृगूणां पञ्चार्षेयाः वत्साद्विदा आर्ष्टिषेणाश्चत्वार एवाङ्गिरसाः कौमण्डा दीर्घ-तमा रौक्ष्यायणा गर्गाश्च । गर्गाणां त्र्यार्षेयो विकल्पो विश्वा-मित्रपक्षे पूरणाद्यार्षेयाः शुनकवसिष्ठा एकार्षेया अतोऽन्ये त्रिप्रवरा भवन्त्येतेषु भृग्वङ्गिरसो भिन्नविवाहं कुर्वते न चेत्समानार्षेया बहवः स्युरिति मतं बोधायनस्येत्यथात

ऊर्ध्वानध्वर्युर्वृणीतेऽमुतोर्वाचो होतेत्येष एवोभयोः सर्वत्रो-
द्देशः ॥ १ ॥

End :

नाराशंसान् व्याख्यास्यामः । आत्रेयवाध्र्यश्ववाधूल-
वसिष्ठकण्वशुनकसङ्कृतियस्कराजन्यवैश्या इत्येते नारा-
शंसाः प्रकीर्तितास्तानूनपातीमन्येषां गोत्राणामुभयेषां
पुरोहितप्रवरो राज्ञो भवतीति विज्ञायते ।

* * * *

विश्वामित्रो जमदग्निः भरद्वाजोऽथ गौतमः अत्रिर्वसिष्ठः
कश्यप इत्येते सप्तर्षयः सप्तानां सप्तर्षीणां अगस्त्याष्टमानां
यदपत्यं तद्गोत्रमित्युच्यते । भवत्ययाजनीयो यः प्रवरान्
स्वानपा(प)र्श्च जानाति मन्त्रब्राह्मणं वेद इत्याचक्षते तस्मा-
त्प्रवरज्ञाने यत्नस्तु महान् द्विजैः कार्यः श्राद्धविवाहर्त्विजो
दैवाहस्तोत्रं गोत्रमूलानि च महाप्रवरे याः सन्तिष्ठते
नित्यं पर्वणि पर्वणि स्वाध्यायी ब्रह्मलोके महीयते ब्रह्म-
लोके महीयत इत्याह भगवान्बोधायनः ॥ ५५ ॥

Colophon :

प्रवरप्रश्नः सम्पूर्णः ॥

Subject : Bodhāyanaśrautasūtras. Pravara Praśna. 1—9 Adhyāyas. 1—55 Khaṇḍas.

1	अथातः प्रवरान्	Adhyāya	1	Khaṇḍas	1—9
2	अङ्गिरसो व्याख्यास्यामः	,,	2	,,	10—16
3	भारद्वाजाश्चान्या	,,	3	,,	17—19
4	विष्णुवृद्धाः शठमर्षणः	,,	4	,,	20—30
5	काश्यपान् व्याख्यास्यामः	,,	5	,,	31—34

6	वासिष्ठानेकार्षेयान्	Adhyāya	6	Khaṇḍas	35 & 36
7	उपमन्यवः औपगवः	,,	7	,,	37—48
8	अगस्तीन् व्याख्यास्यामः	,,	8	,,	49—52
9	क्षत्रियाणां त्र्यार्षेयः	,,	9	,,	53—55

Remarks :— The Ms. is in good condition. Before the colophon the following index is given :—

'अथातः प्रवरान् । द्व्यार्षेयः । भृगूणाम् । वत्साः(?) । विदाः । आर्ष्टिषेणाः । यस्काः । मित्रयवः । वैन्याः । शुनकाः । सप्त भृगवः । अङ्गिरसः । शरद्वन्तः । कौमण्डाः । दीर्घतमाः । औशनसाः । कारेणुपालयः । वामदेवाः । सप्त गौतमाङ्गिरसः ॥ भारद्वाजाः । रौक्षायणाः । गर्गाः । त्रयो भारद्वाजाङ्गिरसः ॥ विष्णुवृद्धाः कण्वाः । हारीताः । सङ्कृतयः । रथीतराः । मुद्गलाः । कपयः । शुद्धाङ्गिरसः सप्त । अत्रीणां' वाग्भूतकानां' गविष्ठिराणां'(मुद्गलाः)(रः) चत्वारो । [त्रयः] काश्यपाः ॥ शण्डिलाः । लोकाक्षय' अत्वारः काश्यपाः ॥ वसिष्ठाः' कुण्डिनाः' उपमन्यवः' पराशराः' चत्वारः ॥ विश्वामित्र'लोहित'विश्वामित्रदेवश्रवस रौक्षक'(कतासैरन्धा)धनञ्जया'जानजा'अघमर्षणकौशिके'न्द्रकौशिक'पुरुणा दश विश्वामित्राः ॥ अगस्तीनां' साम्भवाहानां' यज्ञवाहानां' सोमवाहानां' चत्वारः ॥ क्षत्रियाणां' वैश्यानां' नाराशंसानां' त्रयः ॥'

॥ भारद्वाजश्रौतसूत्रम् (कृष्णयजुर्वेदः) ॥

2027. BHĀRADVĀJAŚRAUTASŪTRAM.

J. L. Collection No. 210. Substance—Paper. Size—9½ × 4½

inches. Sheets—149. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—3725. Author—Bhāradvāja. First fifteen Praśnas—Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्तिगुरवे नमः ॥

दर्शपूर्णमासौ व्याख्यास्यामः । आमावास्येन हविषा यक्ष्यमाण एकस्या द्वयोर्वा पूर्वेद्युर्हविरातञ्चनं दो(ह)यत्यपि वा पुरस्तादेव त्र्यहे त्र्यहे वानुगुप्तं दुग्धं दोहयित्वानुगुप्तेन दध्ना(ऽ)तनक्ति सन्ततमविच्छिन्नममभिदुह्यत्योपवसथायदह(ः) पूर्णचन्द्रम(ः) स्यात्तां पौर्णमासमुपवसेच्छ्वः पूरितेति वा यदहर्न दृश्येता[म]पावास्यांश्वोनो(?)देतेति(?) वा तत्रैषात्यन्तप्रदेशो वे(?) केचन पौर्णमासीममावास्यां वा धर्मा अनारभ्याम्नायं त उ(दु)भयत्रैव ते क्रियन्ते यज्ञोपवीत्येव दैवेषु कर्मसु भवति प्राचीनावीती नित्येषु प्राक्संस्थायान्युदक्संस्थायानि वा प्रदक्षिणं दैवानि कर्माणि कुर्याद्विपरीतं पित्र्याणि न विहारादपपर्यी वर्तेत न यज्ञाङ्गेनात्मानमभिपरिहरेदन्यं वोत्तरत उपचारो विहारे यत्र क्व च जुहोतीति चोदयेदध्वर्युरेव जुह्वाज्येनाहवनीये जुहुयादध्वर्युमेव दानादिषु कर्तरि नाग्नीध्रं द्वितीयं यत्र क्व चोपतिष्ठतेऽनुमन्त्रयत इति चोदयेद्यजमान एव तत्कुर्यादेकमन्त्राणि कर्माण्यादिप्रादिष्टा मन्त्रा भवन्ति ॥ १ ॥

End:

यत्रैनमामन्त्रयते ब्रह्मन्स्तोष्यामः प्रशास्तरिति तत्प्रसौति हि देव....तरे तथे प्राह तस्यचक्षुवप्रचयजु(?)बृहस्पतिब्रह्मायुष्मन्त्या ऋचो मागात तनूपात्साम्नस्सत्याव आ-

........संवसत्या ।

* * *

दक्षिणेन मार्जालीयं दक्षिणेन सदः परीत्यापरया द्वारा सदः प्रविश्यापरेण प्रशास्त्रीयमतिक्रम्य दक्षिणत उपविशे-दित्याश्मरथ्योऽपरेणोत्तरवेदिमतिक्रम्योत्तरेण हविर्धाने द-क्षिणेन मार्जालीयं परीत्य पूर्वया द्वारा सदः प्रवि-श्याग्रेण प्रशास्त्रीयमतिक्रम्य दक्षिणत उपविशेदित्याले-खनः ॥ ४ ॥

Colophon : Nil.

Subject : Bhāradvājaśrautasūtras, belonging to Black yajurveda, 1—15 Praśnas. This Ms. adopts a division into Praśnas and Khaṇḍas, as follows :—

Praśna.	Khaṇḍas.	Subject.		Sheets.
1	26	दर्शपूर्णमासौ:—	दर्शपूर्णमासौ व्याख्यास्यामः	1
2	19	Do.	देवस्य त्वा सवितुः प्रसव इति	12
3	18	Do.	ॐ भिडापात्रमुपस्तीर्याग्नेयस्य	20
4	20	याजमानम्—	याजमानं व्याख्यास्यामः पर्वणि यजमानः	28
5	20	आधानम्—	अग्नीनाधास्यमानो योऽश्वत्थ:	38
6	18	अग्न्युपस्थानम्, अग्निहोत्रम् & आग्रयणम्—	ॐ अग्न्युपस्थानं व्याख्यास्यामः	47
7	23	पशुबन्धः	पशुबन्धेन यक्ष्यमाणश्च होतारं मनसानुद्रुत्य	55
8	35	चातुर्मास्यम्—	चातुर्मास्यैर्यक्ष्यमाणः पञ्च होतारं मनसानुद्रुत्य	66

Praśna.	Khaṇḍas.	Subject.		Sheets.
9	19	विष्वपराधप्रायश्चित्तम्	श्रुतिलक्षणं प्रायश्चित्तं विष्वपराधे विधीयते	76
10	22	ज्योतिष्टोमः—	वसन्ते ज्योतिष्टोमेन यक्ष्यमाणः	85
11	22	Do.	प्रवर्ग्यं सम्भरिष्यन्नुदगयना- पूर्यमाणपक्षे	95
12	21	Do.	यद्यतिथ्याया ध्रौवमाज्यम्	107
13	33	Do.	महारात्रबुध्यन्ते आग्नेय- चोमप्रिम्	117
14	26	Do.	माध्यन्दिनं सवनं व्याख्या- स्यामः	134
15	4(?)	Do.	सोमो वसिष्ठो ब्रह्मा	148

Remarks :— This Ms. ends with the fourth Khaṇḍa of the 15th Praśna. The Ms. is old and is in a fairly good condition. It is full of scriptorial errors.

॥ कात्यायनश्रौतसूत्रम् (शुक्लयजुर्वेदः) ॥

2028. KĀTYĀYANAŚRAUTASŪTRAM.

Burnell's Catalogue No. 3859. Page 23. Left column. Substance—Paper. Size—10½ × 5 inches. Sheets—66. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1250. Author—Kātyāyana. First eleven Adhyāyas.

Beginning :

श्रीगणेशाय नमः ॥

अथातोऽधिकारः । फलयुक्तानि कर्माणि सर्वेषामविशे- षान्मनुष्याणां वारम्भसामर्थ्यादङ्गहीनाः श्रोत्रियषण्ढशूद्र-

वर्जं ब्राह्मणराजन्यवैश्यानां श्रुतेः स्त्री चाविशेषाद्दर्शनाच्च रथकारस्याधाने नियतं च नाभावादिति वात्स्यो निषादस्थपतिर्गावेधुके(ऽ)धिकृतो वावकीर्णिनो गर्दभेज्या लौकिके भूमौ पशुपुरोडाशश्रपणमप्स्ववदानहोमः श्विश्वात्प्राशित्रावदानं वैतानिकेषु सर्वं सर्वार्थत्वाद्दर्शनाच्च नौपासनश्रुतेरधिश्रयणीये मांसप्रतिषेधः ॥ १ ॥

End :

ब्रह्मत्वमतो वाग्यतः कर्मणि वर्तमाने हिरण्यवत्स्वाहुतायां दक्षिणो(णा)नुगच्छत्या क्रयात्क्रीते प्राङतीत्य पूर्वेणानः परीत्यापरेण वा दक्षिणो(णतो)नुगच्छत्या निधाना(त्) दक्षिणाग्निं वाऽपरेण धर्मे स्तम्बयजुर्हरिष्यत्याहवनीयदेशं दक्षिणेनास्ते वेदिसहित एवं सर्वत्र प्रागग्नीषोमप्रणयनात्कर्मणः कर्मणो वा सहितस्तत्र देवान्वेत्याहवनीये प्रणीयमाने प्रतिरथस्य द्वादशानुवाकाग्नौ सर्वत्रैके स्तीर्णायां यथार्थमेत्याग्नीषोमप्रणयनाद्योत्तरेण धिष्ण्यां छालाद्वार्यं पूर्वेणेत्यास्ते दक्षिणतो हुते च सोममादायाग्नी(ग्नि)मन्वेति यजमानो वा सोमं हरेदन्यस्मै प्रदायानिहिते यथेतमेत्यास्ते दक्षिणतो हुते च सोममादायाहवनीयं चातीत्यापररात्रेऽग्नीध्रे(षोम)प्रणयनवदिच्छन्विप्रुषां होमं हुत्वा प्रतिहर्तारमन्वारभेत वा दीक्षितः प्रस्तोत्रामन्त्रित एतं ते देवसवितस्तुत सवितुः प्रसव इत्युक्त्वा प्रयेति(सौति) देवसावितरेतद्बृहस्पते प्रे(इ)ति वा [र]रश्मिना सत्यायेति वा प्रतिमन्त्रं येन प्रवेशनं तस्मिन्सर्पणं पूर्वेण यूपं परीत्यापरेण चेत्प्रशास्तुर्दक्षिणत आस्ते परेण धिष्ण्या-

नितरे नेष्टा च विस॰स्थितसञ्चरः प्रशास्तृधिष्ण्यं बोत्त-
रेणापवमाने स्व॰स्वमितरे स्व॰ स्वमितरे ॥ ॥

Colophon:

कात्यायनसूत्रे एकादशोऽध्यायः ॥

Subject: Kātyāyanaśrautasūtras, belonging to white yajurveda. 1—11 Adhyāyas.

Remarks:— The Ms. is in very good condition. These sūtras with selected commentary have been edited by Dr. Weber in the third Volume of his edition of White Yajurveda. They are now reprinted with Karkabhāṣya in the Benares Sanskrit Series.

॥ आश्वलायनश्रौतसूत्रव्याख्या ॥

2029. ĀŚVALĀYANAŚRAUTASŪTRAVYĀKHYĀ.

J. L. Collection No. 211. Substance—Paper. Size—9½ × 3½ inches. Sheets—224 (1-232; sheets 146-149, 151 and 225-227 are missing). Lines—11 to Page. Script—Devanāgarī. No. of Granthas—6700. Author—Siddhāntin. Complete.

Beginning:

श्रीगुरुभ्यो नमः ॥ श्रीगणेशाय नमः ॥

ॐ अथैतस्य समाम्नायस्य विताने योगापत्तिं
वक्ष्यामः ॥

अथनिपातः शुभमङ्गलार्थः शास्त्रादौ प्रयुज्यते । अका-
रो वै सर्वा वागिति वचनात् । अकारस्य... सर्वान्वर्णान्
ब्रूयादिति शिक्षायां वचनाच्चाकारस्य मङ्गलार्थत्वं तथाऽका-
रस्याप्यकारोदयत्वान्मङ्गलभावः । समाम्नायविशेषणार्थ-

मेतस्येत्युच्यते । अस्ति कश्चित्समाम्नायविशेषोऽनेनाचार्ये-णाभिप्रेतः शाकलको वा बाष्कलको वा सहनिवित्पुरो ऋगादिभिस्तस्यैव परिग्रहः कथं स्यात् । न सर्वेषां समा-म्नायानामिति । अथ वा एतस्येत्यत्र वीप्सालोपो द्रष्टव्यः ॥ एतस्यैतस्य समाम्नायस्येति । एवमृग्वेदे सर्वे समाम्ना-याः सर्वे सङ्गृहीता भवन्ति । तथा सत्येतस्यातिवचनं वीप्सार्थमित्युक्तम् । तेन किं सिद्धं भवति— एतेनैव समा-म्नायेन प्रारब्धं कर्म समापयेदिति । इतरथैतस्मिन्यज्ञे शाकलेन किञ्चित्कृत्वा पु....चित्बाष्कलकेन वान्येन वा कुर्यात् तन्मा भूदिति ताण्डकेति वचनम् । येनोपक्रमः स्यात्तेनान्तं गच्छेदेषः प्रयो—धर्म इति । अस्येति ल-घुना सिद्धेप्येतस्येति गुरुनिर्देशः समाम्नायः पूजाकरणा-र्थम् । अथवानु....शाकलेयसंहिता समाम्नायस्य परिग्रहार्थं तेन किं सिद्धं भवति वृषाकपौन्युंखे(?)......रित्यत्राकार-लोपार्थम् । इतरथा पदसमाम्नायः परिगृहीत इति कृत्वा अकारस्य लोपो न भवति । तन्मा भूदिति । समाम्नाय-स्येत्यृग्वेदसमाम्नायनिर्देशः कृतः । उत्तरत्र कर्मचोदनायां होतारमिति एतावन्मात्रहोतृकमिति वचनाद्वेदमस्मिन्छास्त्रे विधीयमानं होतृकर्मेत्यवगम्यते श्रुतौ च सिद्धम् । ऋग्वे-देन होता करोतीति । तस्मादृग्वेदसमाम्नायस्येति सिद्धम् । किञ्चान्यदुत्तरत्र ऋचामादिग्रहणाद्यजुषां कृ-त्स्नशः पाठात्साम्नामनध्ययनदर्शनाच्च यदि साम ना-धीयादिति तस्मादृग्वेदसमाम्नायस्य परिग्रहसिद्धम् । यज्ञे

इति लघुना सुखग्रहेण शब्देन सिद्धेऽपि वितानवचनं सर्वेष्वग्निषु विहृतेष्वेव सर्वं कर्तव्यमित्येवमर्थम् । इतरथा तस्यै तस्यै देवतायै पूर्णाहुतिं जुहुयादित्यत्र प्रयोजनाभा-वाद्दक्षिणाग्नेर्विहरणं न स्यात्तथा पौर्णमासीमेव यजेत भ्रा[त्र]व्यवानमावास्यामित्यत्र पिण्डपितृयज्ञस्याहव-नीयस्य वा तान्मा भूदिति । तत्रापि विहृतेष्वेव कर्म कर्त-व्यमित्येदर्थम् । योगापत्तिः योगस्यापत्तिर्योगापत्तिः तां योगापत्तिमिति अयमृग्वेदसमाम्नायः क्वचित्सामिधेनी-संज्ञं योगमापद्यते । क्वचिन्मरुत्वतीयसंज्ञं तां तां वक्ष्याम इति तस्योत्तरत्र विधानादेव सिद्धेऽपि इह योगापत्ति-मिति वचनं नियमार्थं कथं योगः क्रम इत्यनर्था-न्तरम् । अथ वा योगः सङ्घातः इति यथा । अथैते-षामह्नां योगविशेषान्वक्ष्याम इत्यत्र सङ्घातविशेषा-दिति योगापत्यमात्रमेव वक्ष्यामो नान्यं विकारमिति तेन किं सिद्धं भवति वक्ष्यति छन्दोगप्रत्ययं स्तोमस्तो-त्रिय इत्यत्र । छन्दोगस्तोत्रिये त्वक्षरविपर्यासं पदविपर्या-सं यदि कुर्युस्तत्रास्माभिरादरो न कर्तव्यः । ऋचामेव वि-पर्यासे आदरः कर्तव्य इति नियम्यते । एतस्य विताने योगापत्तिमिति पदत्रयेण योऽर्थः साध्यते स एतस्मिन्न-नारभ्यमाणे न लभ्यते तस्मात्सूत्रारम्भः क्रियते ॥

End :

पाराशर्येति । पराशरवच्छक्तिवदिति । कुण्डि० डिन्येति । कुण्डिनवन्मित्रावरुणवद्वसिष्ठवदिति । अगस्त्य०हेति । इ-ध्मवाहवद्दृढच्युतवदगस्त्यवदिति । सोमहोते । सोमवाहव-

दच्युतवद्गस्त्यवदिति। सप(अथ य)दि० स(से)ति। पुरूरवोदिळावन्वदित्यध्वर्युः। इति स०...। एतस्मिन्काले दक्षिणाहेष्वित्यत्रैव सत्राणाम(द)क्षिणत्वे सिद्धेऽपि पुनरिह वचनं सदक्षिणानामपि प्रतिषेधार्थम्। प्रत्यर्पकेभ्यो यद्दातव्यं तद्ध्रियत इति। अन्यो०क्षिणः। प्रज्ञातदक्षिणे(ण) इत्यनुच्यमानं सहस्रदक्षिणस्यानुवृत्ति........तन्माभूदिति प्रज्ञातदक्षिण इत्युच्यते। अपरे प्रज्ञातदक्षिण इति वर्णयन्ति। बृहस्पतिसववाजपेयादयः प्रतिप........दक्षिणमन्यो वा क्रतुः प्रजातदक्षिणः पृष्ठशमनीयो भवति। एवं प्रति दक्षिणावृ(व)ता पृष्ठानि शमयेरन्निति........ज्योतिष्टोमः पृष्ठशमनीयो भवति तदा तस्यापि प्रज्ञातदक्षिणत्वाद्द्वादशशतदक्षिणत्वमेव .... इतरथा ज्योतिष्टोमपृष्ठशमनाय इत्यविधानं ज्योतिष्टोमस्य पृष्ठाशमनीयत्वे सहस्रदक्षिणत्वमेव स्यात्तन्माभूद्द्वादशशतदक्षिणत्वं वा कथं स्यादित्येतदर्थमेतदारभ्यते ॥

Colophon :

इत्याश्वलायनसूत्रव्याख्यायां सिद्धान्तिकृतायां

द्वादशोऽध्यायः।

कृष्णार्पणमस्तु ॥

संवत् १६४३ समये मार्गशीर्षवदि दशम्यां भृगुवासरे वेता-
या(?)गुपनामकेन नारायणेन लिखितमिदं पुस्तकं स्वार्थं
परार्थञ्च ॥

श्रीमद्गम्भीरराजभारतीदीक्षितानामिदम् ॥

Subject : Āśvalāyanaśrautasūtravyākhyā—a commentary on

these Sūtras belonging to Ṛg-veda. 1—12 Adhyāyas.

Remarks :—The Ms. is very old and is in a fairly good condition. The Ms. is dated Saṃvat 1643 or 1586 A. D. The scribe is one Vetāya(?) Nārāyaṇa. The Ms. originally belonged to one Gaṃbhīrarājabhāratīdīkṣita. It is one of the oldest Mss. found in this collection.

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2030. ĀSVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Burnell's Catalogue No. 8977. Page 13. Left column. Substance—Palm leaf. Size—16 × 1⅜ inches. Leaves—374. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—8850. Author—Nārāyaṇa. Complete.

Beginning :

श्रीगणाधिपतये नमः ॥

स्व(सं)ज्ञानानन्दमूर्तिः सकलादिगातिगः
सर्वदासन्नमृग्यः(नन्यः)
सर्वस्मात्स्वप्रकाशः स्थिरचरनिलयः
प्रत्यगाभासदेहः(त्मा सदैव) ।
श्रौतस्मार्तक्रियार्थ(त्मा) श्रुतिमनन·
निदिध्यासवैराग्यलब्धः(भ्यः)
स ब्रह्मा विष्णुरीशः सकलमपि
जगत्सर्वदाव्यादसौ नः ॥

ग्राम्योपराग(गुणदोषवि)निर्मुक्तं स्वप्रकाशमनाकुलम् ।
गम्भीरबोधमानन्दं नमामि ब्रह्म शाश्वतम् ॥

आश्वालायनसूत्रस्य भाष्यं भगवता कृतम् ।
देवस्वामिसमाख्येन विस्तीर्णं सदनाकुलम् ॥
तत्प्रसादान्मयेदानीं क्रियते वृत्तिरीदृशी ।
नारायणेन गार्ग्येण नरसिंहस्य सूनुना ॥

ॐ अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः ॥

लोके यानि प्रत्याम्नायप्रयोगशास्त्राणि स्मर्यन्ते तान्यनुष्ठानौपयिकतयाऽध्ययनविध्याक्षिप्तत्वात्प्रत्याम्नायमङ्गत्वं प्रतिपन्नानि । तत्राङ्गाङ्गिनोरनुष्ठानकृतमानन्तर्यमथशब्दो द्योतयति । एतस्यै(स्ये)[वे]ति शब्दो निवित्प्रैषपु[न]रोरुक्कुन्तापवालखिल्यमहानाम्न्यैतरेयब्राह्मणसहितस्य शाकल्य(ल)स्य बाष्कलस्य (चा)ऽऽम्नायद्वयस्यास्यैवा(तदा)श्वलायनसूत्रं नाम प्रयोगशास्त्रमित्यध्येतृप्रसिद्धं व(सम्ब)न्धविशेषं द्योतयति । समाम्नायस्येत्युच्यते, एतस्यैव सम्यगभ्यासयुक्तस्येदं शास्त्रं नि(न) खिलानां सम्यगभ्यासविमुक्तानामिति । वितता अग्नयो यस्मिन्निति श्रौत(तं) कर्मजातमग्निहोत्रादि वितानशब्देनोच्यते । समाम्नायस्य वितान इति विशेषणाच्छ्रौतेष्वेव खिलरहितत्वं गार्ह्येषु सखि(ल)त्वमेवेति ज्ञायते । योगापत्तिः (प्रयोगापत्तिः) प्रयोगपरिणतिः । प्रयोगस्वरूपमित्यर्थः । तां वक्ष्याम इति ब्रुवन्निदमेव शास्त्रप्रतिपाद्यमिति दर्शयति ॥

End:

नमो ब्रह्मणे० ॥ आरब्धं शास्त्रं परिसमाप्य ब्रह्मणे नमस्कारं कृतवानाचार्यः । ब्रह्मनामा यास्माभिर्ग्रन्थारम्भे

श्लोकाभ्यां नमस्कृतं संज्ञानानन्दमूर्तिरित्यादिनोत्तरेण च [द]ता(त)दाविहायो(र्भावो)पायश्च तत्रैवोक्तः। श्रौतस्मार्त-क्रियात्मन् श्रवणमननिदिध्यासनवैराग्यलभ्य(लक्षणल-क्ष्य) इति। तत्र श्रौतस्मार्तक्रिया प्रसिद्धा। आत्मश्रवणादी-न्येवंरूपाणि।

* * * * * *

एवं ब्रह्मणे नमस्कृत्य स्वाचार्येभ्यो नमस्कारं कृतवा-न्। योऽयमस्य शास्त्रार्थसम्प्रदायाविच्छेदादस्माभिरधीतेन पुनः स्वमनीषितयोत्प्रे[षित]क्षित इति भगवतो निदर्शन-मनेनेति नमस्कारेण नमः शौनकाय नमः शौनकायेति (भगवानाचार्यः स्वाभिमतज्येष्ठं शौनकाचार्यं नमस्करोति) चतुष्कृत्वो द्विरुक्तिः शास्त्रसमाप्तिसूचनार्था ॥ १२ ॥

Colophon :

इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां द्वादशोऽध्यायः ॥

नारायणाय गुरवे सप्तश्रौतार्थ(वेदिने)।

(अर्थं) प्रथयते नित्यं नमस्तस्मै महात्मने ॥

हरिः ॐ। सर्वधारिसंवत्सरम। अनन्तन् लिखितम् ॥

पुरट्टाशिमासं सम्पूर्णम ॥

Subject : Āśvalāyanaśrautasūtravṛtti—a commentary on the Āśvalāyanaśrautasūtras belonging to Ṛg-veda. 1—12 Adhyāyas.

Remarks :— The Ms. is in a very good condition This commentator is Nārāyaṇa, son of Narasihma of Gārgya family. He is later than the other commentator Deva Svāmin. The scribe of this Ms. is Ananta.

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2031. ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Burnell's Catalogue No. 8978. Page 13. Left column.

Substance—Palm Leaf. Size—15 × 1 inches. Leaves—107. Lines— 8 to a Page. Script— Telugu. No. of Granthas —7000. Author—Nārāyaṇa. First Nine Adhyāyas—incomplete.

Beginning—Same as No. 2030.

End :

हिर + ध्वर्योः ॥ प्रकाश्ये प्रदीप्ते कुण्डले इति केचित् । तौ सुवर्णमयौ दातव्यौ । अध्वर्योराध्वर्यवमित्यर्थः । एवमत्र सर्वत्र चतुर्थ्यर्थे षष्ठी ॥ राज+स्थातुः ॥ राजतौ रजतमयौ प्राकाशावित्यर्थः । [शस्ते तु] ॥ द्वादश + ब्रह्मणः ॥ षष्ठ्यौ द्वः पञ्चवर्षास्ता[म]गर्भिणीर्दद्यात् ॥ वशा + रुणस्य ॥ प्रजननासमर्था ॥

उशान + (यजेत ॥ उशनसस्तोमो नामैकाहः । पुनस्तोम) इति चास्यैव संज्ञा गरो विषं गरो गीर्णो येन स गरगीर्णः (यो बहुप्रतिग्रहादिना पापाभिभवादात्मानं गरगीर्णमिव मन्यते स एतेन यजेत) ॥

Colophon : (Leaf No. 100)

इत्याश्वलायनसूत्रवृत्तौ नारायणीयायामष्टमोऽध्यायः ॥

श्रीनृसिंहाय नमः ॥

Subject : Āśvalāyanaśrautasūtravṛtti—a commentary on Āśvalāyanaśrautasūtras. 1—9 Adhyāyas.

Remarks :—The Ms. is in a decaying condition. This Ms. abrup-

tly ends in the 1st Sūtra of the 5th Khaṇḍa of the 9th Adhyāya. This Ms. is said to have been 'written about the end of the 17th century', according to Dr. Burnell.

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2032. ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Burnell's Catalogue No. 4068. Page 13. Left column. Substance—Paper. Size—11×4½ inches. Sheets—70. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—2175. Author—Nārāyaṇa. First and second Adhyāyas only.

Beginning—Same as No. 2030.

End:

चातुर्मास्यानि वा पुनश्चातुर्मास्यानि वा पुनः ॥ २० ॥

चातुर्मास्यैर्वेति वक्तव्येऽन्यथा वचनं नेमानि तदङ्गभूतानीति ज्ञापयितुम् । तेन पुनरपि तान्येवाभ्यसितव्यानीति गम्यते । अभ्यासपक्षे समाप्तावपि नैव पशुसोमौ कर्तव्यौ । तस्य पक्षस्य पूर्वाभ्यां सह वैकल्पिकत्वात् । वरुणप्रघासेषूह उच्यते । अग्निद्वित्वाभावादाग्निवाचिनामनूहः । 'घृतवतीम्' इत्यत्र 'अध्वर्यू आस्येथां विश्ववारा' इत्यूहः । 'वेदोसि' इत्यत्र वेदविषयाणां पदानामूहः । अन्यदप्येवं रूपमस्ति चेत्तदन्वेषणीयम् ॥ २० ॥

Colophon:

इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां द्वितीयोऽध्यायः ।

Subject: Āsvalāyanaśrautasūtra Vṛtti on the First and Second Adhyāyas.

Remarks:—The Ms. is in good condition.

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2033. ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Burnell's Catalogue No. 4067. Page 13. Left column.

Substance—Paper. Size—10⅛ × 3⅞ inches. Sheets—54. Lines—10 or 12 to a Page. Script—Devanāgarī. No. of Granthas—2175. Author—Nārāyaṇa. First and Second Adhyāyas only.

Beginning, end, colophon and subject—Same as No. 2032.

Remarks:— The Ms. is very old and is in a decaying condition. Dr. Burnell says that this Ms. has been 'written about 1700 A. D.'

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2034. ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

J. L. Collection No. 212. Substance—Paper. Size—10 × 4⅞ inches. Sheets—18. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Nārāyaṇa. First Adhyāya—incomplete.

Beginning:—Same as No. 2030.

End:

एतद्याज्यानि दर्शनम् ॥ २१ ॥

यदिदं याज्यायाः पुरस्तादागूस्तस्य आदौ (याज्या)-

न्ते च प्लुतिः तस्या उपरिष्टाद्वषट्कारस्तस्य चादौ प्लुति

स्तवोऽनुमन्त्रणं एतयाज्यारूपनिदर्शनम् । ······ ॥

Subject: Āśvalāyanaśrautasūtravṛtti. 1—5 Khaṇḍas of the first Adhyāya only.

Remarks:— This Ms. abruptly ends in the middle of the commentary on the 5th Khaṇḍa of the first Adhyāya. The Ms. is in a decaying condition.

॥ आश्वलायनश्रौतसूत्रव्याख्या ॥

2035. ĀŚVALĀYANAŚRAUTASŪTRAVYAKHYA.

J. L. Collection No. 213. Substance—Paper. Size—$9\frac{1}{8} \times 8\frac{3}{4}$ inches. Sheets—114 (1-124; 111 to 120 missing). Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—1240. Author—Nārāyaṇa. Third Adhyāya—incomplete.

Beginning :

श्रीगणेशाय नमः ॥

॥ विध्यपराधे प्रायश्चित्तिः ॥

प्रायश्चित्तिरित्यधिकारोऽयं आऽध्यायसमाप्तेः । (विधिशब्देन विहितमुच्यते ।) अपराधोऽन्यथाकरणमकरणं वा । विहितस्यान्यथाकरणेऽकरणे च प्रायश्चित्तिः कर्तव्या । प्रायो विनाशः चित्तिः सन्धानम् । विनष्टसन्धानं प्रायश्चित्तिरित्युक्तं भवति ॥ विध्यपराधे प्रायश्चित्तिरिति वचनादपाये सति तदर्थतया विहितमस्ति चेत्तदेव कर्तव्यं । नास्ति चेद्व्याहृतिहोमः कर्तव्यः । 'तस्मादेषैव यज्ञे प्रायश्चित्तिः कर्तव्ये'ति वचनात् । 'विध्यपराध' इति वचनाद्विधिसम्वादेन प्रायश्चित्तिर्ना-

स्ति । यथा यदि वाऽस्याग्निहोत्र उपसन्न इत्यन्तरागमननिषे-
धावसरे यजमानस्यान्तरागमनमवि(नं वि)हितमपरेण वेदि-
मतिव्रज्येति तस्मिन् गमन इत्यर्थः । कालस्तु प्रायश्चि-
त्तानां नैमित्तिकत्वात् निमित्तानन्तरं [मिति] कर्तव्यमित्यु-
त्सर्गः ॥

End :

॥ अप्सु चेदविवेकः ॥

अपामेवाविवेकः स्वादिष्ठासु क्षारासु च इमा भोज-
नीया इमा अभोजनीया इति एवंरूपो विवेको न कार्यः ।
या अशुद्धा आपस्ता वर्जयेदेव ॥

एतत्सांवत्सरिकं व्रता(तं) यावज्जीविकं वा ॥

पूर्वं य(वंव)द्विकल्पप्रातिभासे हेतुर्द्रष्टव्यः ॥

अग्नावनुगतेऽन्तराहुति(ती) हिरण्य उत्तरां
जुहुयात् ॥

(आहुत्योरन्तराऽग्नावनुगते सति हिरण्यं निधाय तस्मिन्
द्वितीयामाहुतिं जुहुयात् । हिरण्य एव यथासम्भवं शेष-
कार्याणि कुर्यान्न पुनरग्निरुद्धर्तव्यः । अभ्यासोऽध्यायपरि-
समाप्त्यर्थः ॥ १४ ॥

Colophon : Nil.

Subject : Āśvalāyanaśrautasūtravyākhyā on Vidhyaparādha-prāyaścitta. 10—14 Khaṇḍas of the 3rd Adhyāya.

Remarks :— The Ms. is in good condition. At the end of this Ms. there are four sheets (121—124) dealing with Āśauca.

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2036. ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

J. L. Collection No. 214. Substance—Paper. Size—9⅛× inches. Sheets—52 (154—205). Lines—9 to a Page. Scrip —Devanāgarī. No. of Granthas—1000. Author—Nārāyaṇ Fifth and Sixth Adhyāyas—incomplete.

Beginning:

(॥ अवान्तरेळां० उपह्वयस्वेत्युक्त्वा ॥ अवान्तरेळाप्राशनविधानमत्र क्रमार्थं । आचमनविधानं नियमार्थं+ते-नेदानीमिळाभक्षणं नास्तीति ज्ञायते । इदमप्यनेन ज्ञायते—प्रकृतावन्वा)न्तरेळाप्राशनं च कृत्वा पश्चाच्छौचार्थमाचमनं भवति न तयोर्मध्ये पीति । 'अध्वर्य उपह्वयस्वे' त्युक्त्वाः (क्त्वा) भक्षयेदित्यनेनात्र चत्वारोऽर्थास्सूचिता भगवता सूत्रकारेण । तत्रायमेकोऽर्थः 'नानुपहूतेन सोमः पात-(व्यः । न) वै सोमपीथेन हव्यको भवती'ति वचना-दुपहूतेनैव सोमो भक्षयितव्य इत्यपरोऽर्थः । उपह्व-याचनं कर्मनामधेयेन सम्बध्यते 'न (नो)पहू(ह्व)यस्वे'त्येव-मन्तेन वाक्येनेति ॥

End:

पशु० पातान् ॥ निपातानामेवं प्रकारः । 'मेद उद्धृतं पार्श्वतश्शोणित ' इति ये पशौ(शु)समवेताभिधायिनो द्रव्यान्तरसमवेताभिधायिनो मन्त्रमध्ये निपतितास्ते नि-पाता इत्युच्यते । तानाज्येन क्रियमाणे पशुवत्क्रियायां पशुवदेव ब्रूयादित्यर्थः ॥ यद्यनु० कुह्वः ॥ यद्यत्र देविका हवि(वीं)ष्यनुनिर्वपेयुः अन्वायातयेयुरित्यर्थः,

तदा धात्रादयः पञ्च देवता यष्टव्याः । ते यागा देविका इत्युच्यन्ते । स्थानोपदेशश्चान्वायत्य(त्वं स्पष्टय-ति ॥)

Subject: Āśvalāyanaśrautasūtravṛtti. Adhyāya V. 6 to VI. 14.

Remarks :—The Ms. is in a fairly good condition. This Ms. abruptly begins with the middle portion of the commentary on the Sixth Khaṇḍa of the Fifth Adhyāya and breaks off in the middle of that on the 14th Khaṇḍa of the Sixth Adhyāya.

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2037. ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

J. L. Collection No. 215. Substance—Paper. Size—$9\frac{4}{8} \times 4\frac{2}{8}$ inches. Sheets—106. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2755. Author—Nārāyaṇa. Uttaraṣaṭka only.

Beginning :

श्रीगणेशाय नमः ॥

सत्राणाम् ॥ अधिकारोऽयम् । अ(आऽ)ध्यमाध्यायप-रिसमाप्तेः यदत्र वक्ष्यते तत्सत्रेष्विति वेदितव्यम् । उक्ता+सदः ॥ एकाहप्रभृत्या संवत्सरादित्यादिना यथा सुत्योप-सद इत्येवमन्तेन दीक्षाः सत्राणामुक्ताः । उपसदः चतुर्वि-शतिः संवत्सर इति सत्राणामित्युक्ताः । तत्र वचनं प्रकृति-प्राप्तदीक्षोपसदस्सङ्ख्यानिवृत्त्यर्थं तत्र सत्राणामित्यवच-नात् ॥

End :

॥ नम आचार्येभ्यः ॥ ब्रह्मणे नमस्कृत्य स्वाचार्येभ्यो नमस्कारं कृतवान् योऽयमस्य शास्त्रार्थः स सम्प्रदायाविच्छेदादस्माभिरधीतो न पुनः स्वमनीषितयोत्प्रेक्षित इति भगवतो दर्शनमनेन नमस्कारेण नमः शौनकाय नमः शौनकायेति चतुष्कृत्वो द्विरुक्तिः शास्त्रसमाप्तिसूचनार्थः ॥ १२ ॥

Colophon :

इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां द्वादशोऽध्यायः ॥ १२ ॥

नारायणाय गुरवे सप्रश्रौतार्थवेदिने ।
अर्थं प्रथयते नित्यं नमस्तस्मै महात्मने ॥

हरिः ॐ ॥ शुभमस्तु ॥ कर्मब्रह्मणे नमः ॥ श्रीगुरुभ्यो नमः ॥

Subject : Āśvalāyanaśrautasūtravṛtti. 7—12 Adhyāyas.

Remarks :— The Ms. is in good condition. The readings in this and other Mss. Nos. 2030—2038 are slightly different from and better than, those found in the printed Volume available in the Poona Ānandāśrama Series.

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2038. ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Burnell's Catalogue No. 9131. Page 13. Left column.

Substance—Palm leaf. Size—$16\frac{1}{8} \times 1\frac{1}{2}$ inches. Leaves—149. Lines—7 or 8 to a Page. Script—Telugu. No. of Granthas—5500. Author—Ṣaḍguruśiṣya. First Nine Adhyāyas —incomplete.

Beginning :

.......सूक्तग्रहणं न भवति ॥ अधिके तृचं सर्वत्र ॥ प्रतीयादित्येव। पाद इति च सूक्तादौ च सर्वत्राधिके पादे तृचं विद्यात्। अग्न आ याहि वीतये गृणानः प्रेतां यज्ञस्य शम्भु वा ॥ युवां सर्वतेति सूक्तादावेव भू(?)दिति। जपानुमन्त्रणाप्यायनोपस्थानान्युपांशु ॥ प्रतीयादित्येव। सर्वतोति च। अनुशब्दोऽभेरप्युपलक्षणं अभिमन्त्रणस्यापीष्टत्वात्। जपादिना चोदितो मन्त्रो जपः। करणे हि व्यधजपोरित्यप् अनुमन्त्रणेषु ल्युट् च मन्त्रवाच्यार्थस्मृतिपूर्वकं अपि अमनस्कमुच्चारणमनुमन्त्रणम् ॥ ईक्षणादिकमेतदभिमन्त्रणम् ॥ अद्भिः सम्मर्शनादिकमेतदेवाप्याचमनं तदेव प्रणतिस्थानसंयुक्तमुपस्थानं परानभिव्यक्तोच्चारणमुपांशु। तत्र नमः प्रवक्त इत्यादिर्जपः वा गोज इत्यनुमन्त्रणम्। अंशोरंशुष्ट इत्याप्यायनं शंस्यपशून्मे पाहीत्युपस्थानमित्यादि सर्वत्रेत्यनुवृत्तेर्मन्त्रेण प्रातः सवनं मध्यमस्वरेणेदं सवनमुत्तमस्वरेणेदं सवनमिति विशेषविहिताः सवनस्वरा अपि जपादिषूपांशुत्वेन बाध्यन्ते ॥ मन्त्राश्च कर्मकरणाः।

End :

॥ यथा निखा निविदोऽभ्युदियात् ॥ एकां तृच इति प्रोक्तस्थाने तु निविन्नवेत्। अष्टाव...जेसम(?) यथा यथात्र वास्ते स्युः। सूक्तं तास्त्यवक्तपूर्वका ॥ उक्तानि चातुर्मास्यानि। वक्ष्यमाणधर्मार्थमिदं युञ्जन्तीति योजनं पक्षोः कार्यं दक्षिणयो(णो)त्तरयोर्भवेत् मध्यमेनैव प्रयोगोऽत्र

विरुध्यते ।

नियोजनं पशोः कार्यं दक्षिणोत्तरयोर्भवेत् ॥

परिध्योर्मध्यमेनैव प्रयोगोऽत्र विरुध्यते ।

योजनविवयेति(?) नियुञ्जीतेति शब्दिताः ॥

वैश्वदेव्या स्थाने प्रथमं पृष्ठ्याहः स्यात् ।

पृष्ठकार्यमहस्स्थाने वैश्वदेव्या विधीयते ॥

Colophon : (Leaf No. 152)

इति षड्गुरुशिष्यविरचितायामाश्वलायनसूत्रवृत्ता-

वभ्युदयप्रदायामष्टमोऽध्यायः ॥

हरिः ॐ हरिः ॐ ॥

Subject: Āśvalāyanaśrautasūtravṛtti, otherwise known as Abhyudayapradā. 1—9 Adhyāyas.

Remarks :— The Ms. is in a decaying condition. The first five leaves of this Ms. are almost broken away. On the sixth leaf this Ms. abruptly begins with the commentary on the 19th Sūtra of the first Khaṇḍa of the first Adhyāya. It breaks off in the commentary on the fifth sūtra of the second Khaṇḍa of the ninth Adhyāya.

About the author of this work Dr. Burnell observes that "Ṣaḍguruśiṣya (is) generally identified in South India with a Śaṅkarācārya. Prof. Weber shows that he must have lived about 12th century". If Weber's view is correct, the identity of this commentator with the famous Ṣaḍguruśiṣya, the commentator on Ṛg-vedasarvānukramaṇī, seems to be plausible. While giving the contents of this work chapter by chapter, Dr. Burnell adds :— " (In this work) I have noted quotations from Āpastamba and Śaunaka only. The opinion of 'others'

is frequently given as regards the division of the Sūtras, but without mentioning names ".

॥ आश्वलायनश्रौतसूत्रवृत्तिः ॥

2039. ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Burnell's Catalogue No. 4060. Page 13. Right column.

Substance—Paper. Size—10×5 inches. Sheets—90. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1020. Author—Ṣaḍguruśiṣya. First and Second Adhyāyas—incomplete.

Beginning—Same as No. 2038.

End :

शुद्धिकामो वा ॥ एतामिष्टिं कुर्यादिति शेषः । एत-
च्छुद्धिकामकर्तव्यत्वमेव यज्ञगाथया द्रढयति— तदेषाभी०
मिति । सूक्तमर्थरूपमभिगीयते । आत्माऽस्नायते वैश्वानरि-
श्रातपसौ(स्यौ) वक्ष्यमाणे द्वे इष्टीवैश्वानरस्य विमतानामन्न-
भोजने व्रतातिपात्रो(पत्तौ) व्रतपतय इति च । ऋतावृतौ वस-
न्तादिषु दशपूरुषं दशपूरुषयुक्तं स्वं वंशं पुनाति शोधय-
ति । किम्पुनरिहात्मानम् । वर्षकामेष्टिः कारीरीष्टिः ॥
वक्ष्यत इति शेषः वर्षं यः कामयते तस्य कारीरीष्टिः....॥

Colophon: (Sheet No. 52).

इति षड्गुरुशिष्यविरचितायामाश्वलायनसूत्रवृत्तावभ्युदयप्रदायां
प्रथमोऽध्यायः ॥

Subject : Āśvalāyanaśrautasūtravṛtti otherwise known as Abhyudayapradā. 1 and 2 Adhyāyas.

Remarks :— The Ms. is in good condition. The Ms. abruptly begins with the commentary on the 19th Sūtra of the first

Khaṇḍa of the first Adhyāya and ends with that on the 1st Sūtra of the 13th Khaṇḍa of the 2nd Adhyāya.

॥ शाङ्खायनश्रौतसूत्रपद्धतिः ॥

2040. ŚĀNKHĀYANAŚRAUTASŪTRAPADDHATIḤ.

T. S. Collection No. 535. Substance—Paper. Size—9×4 inches. Sheets—61. Lines—9 or 15 to a Page. Script—Devanāgarī. No. of Granthas—3374. Author—Nārāyaṇa. First four Adhyāyas only.

Beginning :

कौषीतकिं प्रणम्यादौ शङ्करं पद्मजोद्भवम् ।
शङ्खचक्रधरं (विष्णुं) शाङ्खायनमुनिं प्रभुम् ॥
अस्मद्गुरुमतं सर्वं सम्प्रदायपुरस्सरम् ।
श्रुत्वा नारायणाख्येन पद्धतिः कथ्यते स्फुटम् ॥

यद्यपि पद्धतिकारा वयं तथापि परिभाषासूत्राणि सङ्क्षेपेणे(णै)व वक्ष्यामः। 'यज्ञं व्याख्यास्याम' इति प्रथमं सूत्रम्। यज्ञो देवतामुद्दिश्य द्रव्यपरित्यागः। तथापि प्रयाजाद्यङ्गयुग्यागोऽत्र विवक्षितः। यज्ञमित्येकवचनं जात्यपेक्षम्। अधिकारसूत्रमेतत्। व्याख्यास्याम इति प्रकटयिष्याम इत्यर्थः। बहुवचनं गुरावात्मनि च शिष्टसंव्यवहारः। अथ वादिनो वदन्ति। सकलविधानाभावात् यज्ञस्येत्यवयव(वेन(?)) भवितव्यम्। तदयुक्तम्। कुतः। तथाविधेऽपि ब्राह्मणे यज्ञ इति श्रवणात् स एष सर्वकामस्य यज्ञ इति। तस्माददोषः। (अपरं बह्वृचप्राधान्याच्च) प्रतिज्ञा-

नञ्च शिष्यबुद्धिसमाधानार्थम् ॥

End:

आग्नेयः सौम्य आज्यभागौ देवतायै वपां देवतायै हविः स्विष्टकृते चाज्याहुतिश्चानुमतये स्थालीपाकानि । प्रकरणात्पश्वर्थानाञ्च दर्शनाञ्च । आज्यभागोपदेशः । पश्वर्थवादप्राप्तेः । तौ न पशौ न सोमे करोतीतीह पशौ प्रतिषेधः । अतस्त्वशाखापशुष्वेतावदेवतानुपदेशे(?) एतावतानुपदेशे गृह्यविहितत्वात् स्रुचैव वपाहोमः । स्थालीपाकश्च स्थारो वैकदेशो वपार्थे पायसोरेकदेशत्वात्(?) । स्विष्टकृदनन्तर अनुमतये स्रुवेण आज्याहुतिं शेषपरिकर्मसमापनम् । 'षळर्घ्या भवन्त्याचार्य ऋत्विक् श्वशुरो राजा स्नातकः प्रिय इति' ह्येते आर्घ्या अर्घ्यार्हा इति प्रसिद्धाः । स्नातकः समावर्तनमात्रः समावर्तने कृते तदानीमेव द(त)स्मै अर्घ्या दातव्यः(व्याः) इतरेषामपि यथाकाले वचः पाद्यमर्घ्यं आचमनीयं मधुपर्को गौरिति । इत्येवमादि ऋत्विग्वरणे मधुपर्कविधिः सङ्कृष्यते तेन प्रकारेण सर्वत्र कर्तव्यः ॥

Colophon :

इति शाङ्खायनसूत्र(?) निरञ्जनपद्धतिः ॥

प्रकारेण व्यावमर्श्य (सं)शोध्य लिखितमस्माभिः । पुनरपि विद्वद्भिः शोधनायां चतुर्थोऽध्यायः समाप्तः ॥

नारायणनामवता
शिवपुरग्रामजन्मना चैतत् ।

[आर्जितमूजित] कृतमज्जनगङ्गाम्भः
पिबता च विमुक्तभक्तियुक्तेन ॥

.. ..

... शाङ्खायनसूत्रपद्धतिरियम् ।

गङ्गामहं गोत्रकरीं विचित्रां
देवीं विशालाक्षपदादिभूताम् ।
बालार्कमिन्दीवरनेत्रयुग्मं
व्रजामि विश्वेश्वरपादभक्त्या ॥

कल्लोलधूतं जलधेरिवाम्भो
गाङ्गं पुनस्तीर्थमवती(तीव) शस्तम् ।
अस्याः(प्रि)यं सोममहेन्दुमौलिं
तल्लीलमुल्लङ्घ्य कथं व्रजामि ॥

पूतैः पवित्रैरविनीतजन्तो-
र्गाङ्गैर्जलैरिन्दुनिभैरनन्तैः ।
कल्यातवल्यातदस्वेद्य(?)-
स्वलीनवल्लीमवलम्ब्य धीरम् ॥

इति समाप्तम् । संवत् १५२९ वर्षे मार्गवदि ७ रवौ पठनार्थं परो
पकारार्थञ्च लिखिता ॥

Subject : Śāṅkhāyanaśrautasūtrapaddhati—a commentary o: these Sūtras belonging to Ṛg-veda. 1—4 Adhyāyas

Remarks :—The Ms. is in a fairly good condition. The Ms. i dated Saṃvat 1529 or 1472 A. D. Whether the verses give in the colophon belong to the author or the scribe is no known. On the title page is given ' शाङ्खायनश्रौतसूत्रवृत्ति

भास्करराययज्वनाम्' i. e. the Ms. belonged to Bhāskararāyayajvan. This is one of the rare Mss. found in the Tyāgarājasvāmi collection of this Library. If the date of the Ms. given in the colophon is correct, then this is one of the oldest paper Mss. found in this Library. The Ms. is full of scriptorial errors.

॥ द्राह्यायणश्रौतसूत्रदीपः ॥

2041. DRĀHYĀYAṆAŚRAUTASŪTRADĪPAḤ.

Burnell's Catalogue No. 9106 a. Page 22. Left column.

Substance—Palm leaf. Size—19 × 1½ inches. Leaves—112 (1-67 and 43-87). Lines —8 or 10 to a Page. Script—Grantha. No. of Granthas—4200. Author—Dhanvin. Incomplete.

Beginning:

ॐ मिति ब्रह्म परमं प्रप(द्ये पुरुषोत्तमम् ।
छन्दोगसूत्रं व्याचष्टे धन्वी शुद्धार्थमञ्जसा ॥

अथ भगवान् सूत्रकारः प्रथमं तावत्परिभाषां करोति । 'अथातो विध्यव्यपदेशा सर्वक्रत्वाधि)कार' इति । अथात इति पदद्वयं वाक्योपक्रमे लोकवेदयोर्दृष्टम् । यथा वाक्यसमाम्नाविितिशब्दः । तद्यथा । 'अथातोऽनन्ता द्वादशाहा' इति प्रतिदिशन्ति । "अथातः सामान्ता-नाम्" 'अथा(तः संहिता)या उपनिषद' इत्यादि । आनन्तर्यहेत्वर्थता तु वाक्यस्य परिभाषापरत्वान्न सम्भवति । विधानं विधिः । विशेषकथनं व्यपदेशः । तदभावोऽव्यपदेशः ।

* * * *

अथोच्यते । प्रकृतावुपदेशाद्भवति विकृतावतिदेशादित्येवं सर्वार्थत्वमिति । तर्हि यजुर्विष्टुति[ः ।] सुब्रह्मण्या प्रायश्चित्तानां विशेषत(स्सर्वक्रत्वर्थत्वं)स्त(त)श्च वक्तव्यम् । अन्येषा(मु)पास्मै गायता नर इत्यादिस्तोत्रीयाणां रौरवयौधाजयादिसाम्नाञ्च तेनैव न्यायेन सर्व(र्वा)र्थत्वात् । तस्मात्सूत्रकारः सुव्यवहाराय परिभाषां करो(तीति मन्त)व्यमिति ॥

End :

'प्रत्यवरोहेण एतस्य तत् षष्ठ(षट्)'मि(इ)ति ॥ तस्य चतुरुत्तरसम्पन्नस्यैकाहस्य षष्ठद्वन्द्वं प्रत्यवरोहेण स्यात् पञ्चस्तोममार्भवन्त्रिकस्तोमं यज्ञायज्ञियमित्यर्थः । 'शतदक्षिणा' इति स्पष्टमिति ॥ ५ ॥

द्राह्यायणीयसूत्रे(त्रस्य) दीपे धन्विविनिर्मिते ।
तृतीये दशके वृत्तो द्वितीयः पटलोऽधुना ॥

व्रात्यस्तोमैर्यक्ष्यमाणाः पृथगग्नीनाध्या(धा)य यज्ञोपाकरणानि चेष्ट्वा य एषामध्ययनेऽभिक्रान्ति[म]त(मः)स्यादभिजनेन वा तदभावे(ऽ)पि भोगलाभेन तस्य गार्हपते दीक्षेरन्निति ॥ व्रात्यस्तोमेषु क्रतुषु सर्वत्रवत् ।

* * * *

'निरुक्तनिधनत्वादि'ति । नौधसस्य यथार्थनिधनं । प्रत्यक्षनिधनत्वादित्यर्थः । श्यैतानं पुनः परोक्षनिधनम् । तथा च कात्यायनेन प्रतिहाराख्ये 'अथ च्छन्ननिधनानी-

शोपायास्तदाकृति'रित्युपक्रम्य श्रौतानयोरा इति परोक्षं शाखान्तरीयाभिधनमुक्तं, तत्प्रशंसां कृत्वा नोधसस्य प्रतिषेधः । किमिदं... ॥

Colophon: Leaf No. 10.

इति काश्यपगोत्रेण धन्विना प्रीतये हरेः ।
छन्दोगसूत्रदीपोऽयं प्रथमे पटले कृतः ॥

Leaf. 72.

साम्नां भक्तिविभागज्ञः शाखद्रष्ट्यनुसारतः ।
उपगच्छेत्प्रियं धाम साम्नां विष्णोश्च शाश्वतम् ॥

इति काश्यपगोत्रेण धन्विना प्रीतये हरेः ।
छन्दोगसूत्रदीपोऽयं मध्यमे दशमे कृतः ॥

Subject: Drāhyāyaṇa Śrauta Sūtra dīpa—a commentary on these Sūtras belonging to Sāma Veda. 1-3 Daśakas. Paṭalas 1-11 and 16-23.

Remarks:—The Ms. is in good condition. This Ms. abruptly breaks off in the middle of the first Khaṇḍa of the 23rd Paṭala. The other works contained herein are:— (1) सामऋषिच्छन्दो देवताः (a fragment only) (2) अम्बिकास्तोत्रम् (3) श्रौतप्रायश्चित्तम् (a fragment only). In this Ms. the commentary on four Paṭalas (12-15) are missing. A transcribed copy of this Ms. in paper is also available in the Library. See Transcript Volume No. 3. [Ref. T. V. 3. (No.)]. This commentary together with the text has been edited by J. N. Reuter P.H.D., L.L.D., in London. "Though the majority of Drāhyāyaṇa Śrauta Sūtras are said to be identical with those of Lāṭyāyaṇa, this commentary by Dhanvin and Agnisvāmin's commentary on Laṭyāyana Sūtras stand entirely independent of each other in the treatment of the subject and both form useful complements to one another

wherever the two Sūtra texts agree".

॥ लाट्यायनश्रौतसूत्रभाष्यम् ॥

2042. LĀṬYĀYANAŚRAUTASŪTRABHĀṢYAM.

Burnell's Catalogue No. 2519. Page 22. Left column.

Substance—Paper. Size—13¾ × 7 inches. Sheets—206 (1-31 38, 52, 35, 18, 32). Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—7760. Author—Agnisvāmin. Incomplete.

Beginning:

श्रीगणेशाय नमः । ॐ नमो विघ्नराजाय ।

'अथ विध्यव्यपदेशो सर्वक्रत्वाधिकारः' । किमिदं सूत्रं नाम शास्त्रं । किमर्थमारभ्यते । यज्ञ(विधि)प्रसिद्ध्ये [ः] । इह हि छान्दोग्ये द्विविधो विधिः अनुब्राह्मणिकः षट्प्रामाणिकश्च । तत्रानुब्राह्मणिकः—'यजुषां कर्मसु लिङ्गतो विधानमर्थग्रहणादि'त्यत आरभ्य । साधारणगुणविधिस्तु सर्वत्रेति यावत् । अपरः षड्भिः प्रमाणैर्निर्वर्त्यते । कानि पुनस्तानि षट् प्रमाणानि । ब्राह्मणसूत्रार्षेयकल्पऋक्सामसमाम्नायो(हो)पदेशाः ॥

* * * * *

अस्पष्टानिष्टपर्युदासशेषविध्येकविधिविकल्पसमुच्चयनियमार्थं शास्त्रारम्भः । अस्पष्टानान्तावत् तस्य द्वादशदीक्षोपसद इति दीक्षोपसदोर्विभागसंशयं विशिनष्टि— तिस्र उपसद इति । अनिष्टपर्युदासः दक्षिणासीनः प्रतिहरतीति

स (विधिः) पर्युदस्यते दक्षिणपूर्वमष्टमदेशमीक्षमाणः प्रतिहृ-
र्तेति शेषविधिः ॥

End :

"प्रथमोत्तमौ संवत्सरौ व्यतिहरेदित्येकेऽभिप्लु-
वस्तोमपृष्ठ्यदेशरोहार्थं इति" ॥ (१६) ॥ एके आ-
चार्या ब्रुवते अस्मिंस्त्रिसंवत्सरे प्रथमोत्तमौ संवत्सरौ व्य-
तिहरेदिति प्रथमोत्तर(म)योः (संवत्सरयोः) [व्यतिहारं कु-
र्यादिति] व्यतिहारं(रः) कथं कुर्यादिति गवामयन[मथा-
तिदेशस्य](मिति किमर्थं अभिप्लुवस्तोमपृष्ठ्यदेशरोहणार्थं
एवं त्रिवृत्)स्तोमा अभिप्लुवाः प्रथमे संवत्सरे भव-
न्ति । त्रिवृत्पञ्चदश स्तोमा द्वितीये चातुष्टोम्येन तृतीये
अभिप्लुवस्तोमानामे[प्र]षरोहः । पृष्ठ्य(देश)स्य [देशे पृथो]
(ये पृष्ठ्यः अ)भिप्लुवानां (पुरस्तात् मध्य) उपरिष्टाद्भव-
ति ॥ यथाम्नायमेवोपेयुः ॥ (१७) ॥ यथैवाम्नातास्ताः
(ताः) संवत्सरास्तथैव तानुपेयुः के हि कारणमाश्रित्य
प्रत्यक्षश्रुतिं प्रत्यामनन्ति तस्माद्यथाम्ना(यमेवोपेयुः ॥ १७ ॥)

Colophon : (Sheet No. 40)

इति अग्निस्वामिना विरचिते लाट्यायनसूत्रभाष्ये
तृतीयः प्रपाठकः समाप्तः ॥

Subject : Lāṭyāyana Śrauta Sūtra bhāṣya, belonging to Sāma Veda. 1—5 and 7—10 Prapāṭhakas. This Ms. adopts the following division into Prapāṭhakas and Khaṇḍikās :

Ist	प्रपाठकः	1—12	खण्डिकाः	Sheets 1-31
IInd	„	1—11	„	1-40. (17th & 18th missing).
IIIrd	„	1—11	„	

IVth	प्रपाठकः	1—12	खण्डिकाः	Sheets	1-52.
Vth	„	1—12	„		
VIth	„	Nil.	Nil.		Nil.
VIIth	„	1—13	खण्डिकाः		1-35.
VIIIth	„	1—12 (in which 1 & 2 incomplete)	„		
IXth	„	1—12	„		1-18.
Xth	„	1—20 (incomplete).	„		1-32.

Remarks :—The Ms. is in good condition. The text together with Agnisvāmin's commentary (I—X prapāṭhakas) has been edited by Ānandacandra Vedānta Vāgīśa in the Bibliotheca Indica. This Ms. breaks off in the commentary on the last but one sūtra of the tenth Prapāṭhaka.

॥ कल्पब्राह्मणव्याख्या ॥

2043. KALPABRĀHMAṆAVYĀKHYĀ.

Burnell's Catalogue. No. 9109. Page 22. Right column.

Substance—Palm leaf. Size—16 × 1½ inches. Leaves—221. Lines—6 to a Page. Script—Telugu. No. of Granthas—4400. Author—Varadarāja. Complete.

Beginning :

अथार्षेयकल्पो व्याख्यातस्तत्र च सर्वक्रतुप्रकृतिभूतस्य त्रिपर्वणो ज्योतिष्टोमस्य सर्वाहर्गणप्रकृतिभूतस्य व्यूढस्य द्वादशाहस्य ब्राह्मणेनैव क्लृप्तिरुक्तेति । तदुपजीवनेन क्रत्वन्तराण्येव कल्पितानि । अस्माभिस्त्वन्यप्रबन्धस्य कार्त्स्न्यार्थं तयोस्तावत्प्रयोगस्सूत्रब्राह्मणानुसारेण सङ्क्षेपेण प्रदर्श्यते । तत्राग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य एवं प्रयोगः । 'ऋत्विगार्षेयोऽनूचानः साधुचरण,' इत्यादिसूत्रोक्तल-

क्षणाद्वृत्विग्याजो । यज्ञशर्मा ज्योतिष्टोमेनाग्निष्टोमे(न) रथन्तरपृष्ठेन द्वादशशतदक्षिणेन सोमेन यक्ष्ये(क्ष्यते) ॥

End:

पञ्चपञ्चाशतस्तृवतः संवत्सरं पञ्चपञ्चाशतः पञ्चा(श)-दशः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चा........विश्वसृजां सहस्रसंवत्सरयुक्तम....वातवतो..........विश्वसृजामयन-म् । पक्षान्तरमाह— ज्योतिष्टोमेन वाभिक्लृप्तेन यथास्तोम-क्लृप्ते यथास्तोम...ति गौरिवीतस्वरनिषेधः । यथा स्तोम-क्लृप्तेनेति आदितः पञ्चपञ्चाशतिसंवत्सरेषु ज्योतिष्टोमः ।

* * * * *

तथाच द्वादशाहस्य सत्रत्वोपपादने निदानं सप-हीनप्रायणीय........................ प्रतिपत्कृता तेन समानमित्यर्थः ॥

Colophon: (Leaf No. 172).

इत्थं वरदराजेन वामनाचार्यसूनुना ।
अहीनकल्पो व्याख्यातो गोविन्दः प्रीयतामिति ॥
इति कल्पव्याख्यायामष्टमोऽध्यायः ॥

(Leaf No. 206).

आदित्यानामयनं समाप्तम् ॥
इति कल्पव्याख्यायां सत्रेषु द्वितीयाध्याये
आदिमे दशमः ॥

(Leaf No. 112).

इति वामनाचार्यसूनुः कुशिकान्वयसम्भवः ।
वरदराज एकाहीनां कल्पं[म]व्याचष्ट यथागमं यथाबुद्धि इति कल्प-
व्याख्याने पञ्चमोऽध्यायः ॥

Subject: Kalpabrāhmaṇa vyākhyā—a commentary on these

Sūtras, belonging to Sāma Veda. 1-11 Adhyāyas. This Ms. consists of the following important sections:—

1	रथन्तरपृष्ठोऽग्निष्टोमः	Adhyāya	I
2	पृष्ठ्यः षडहः	,,	,,
3	सत्रात्मा व्यूढो द्वादशाहः	Adhyāya	I
4	अभिप्लवः षडहः	,,	,,
5	अभिजित	,,	II
6	विश्वजित्	,,	,,
7	महाव्रतम्	,,	,,
8	द्वादशाहस्य दशाहः	,,	,,
9	एकाहः	Adhyāyas	III to V
10	अहीनः	,,	VI to VIII
11	सत्रम	,,	IX to XI

Remarks :—The Ms. is in a decaying condition. This Ms. is full of scriptorial errors. The author of this Vyākhyā is Varadarāja, son of Vāmanācārya and grandson of Anantanārāyaṇārya of Kauśika family.

॥ प्रतिहारनिधनसूत्रवृत्तिः ॥

2044. PRATIHĀRANIDHANASŪTRAVṚTTIḤ.

Burnell's Catalogue No. 9113. Page 10. Right column.

Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{5}{8}$ inches. Leaves—61. Lines—7 or 9 to a Page. Script—Grantha. No. of Granthas—1625. Author—Vardarāja. Complete.

Beginning :

(नमोऽस्तु तस्मै) देवाय यः प्रसूरध्यजन्मनाम् ।
कार्त्स्न्ये च वेदे भणुमो यं साक्षाद्देवकीसुतम् ॥

यो वामनार्यमिश्रादनन्तनारायणार्ययज्वसुतात् ।
अजनि कुशिकान्ववाये साङ्गे (वेदे च निष्णातः) ॥
(रच)यति स वरदराजः प्रतिहारार्थेयकल्पयोर्वृत्तिम् ।
वीक्ष्य ब्राह्मणसूत्रोपग्रन्थनिदानतद्व्याख्याः ॥
इदन्ताप्रत्ययस्साम्नामृषिच्छन्दोऽधिदैवतम् ।
भक्तयः पञ्चयज्ञेषु विनियोगश्च सङ्क्रमः ।
इति मे ....इह यत्नतः ।
साम्नान्दशार्था इत्येव वृत्तिरेषा प्रथिष्यते ॥

अथ भगवान् कात्यायनो वक्ष्यमाणं वस्तु निर्दिशति ।

'अथातः प्रतिहारस्य न्यायसमुद्देशं व्याख्यास्याम' इति खलूपग्रन्थे कल्पब्राह्मणोक्त.......... ......विसृजता(श्वसृजा)मयनपर्यन्तानामेकाहाहीनसत्त्राणां क्षुद्रकल्पोक्तानां ज्योतिष्टोमषडहद्वादशाहविकाराणां यथायोगं सम्पत्सिद्धयः । प्रायश्चित्तादिविषयाश्च न्यायाः प्र..................(सा)म्नां प्रयोगप्रकारा उक्ताः । अथ तेष्वेव क्रतुषु विनियुज्यमानानां साम्नां प्रतिहारभक्तिस्तदनुषङ्गेण साम्नामिदन्ताप्रत्ययोपायसमाननामधेयानां विनियोगव्यप..................स्मिन्नुपग्रन्थशेषे प्रतिहाराख्ये ग्रन्थे वक्ष्यते । अतस्तदुपसंयोगात् प्रतिहारस्य ये न्यायाः पारिभाषिकास्तेषां समुद्देशं संक्षिप्तं लक्षणं वक्ष्याम इत्यर्थः । उद्दिश्यतेऽनेने................तथा च क्षुद्रभाष्यकारेणा...'मथोद्गीतानां प्रस्तावोद्देश' इत्यत्र व्याख्यातम् । ननु भक्तयः साम्नां पञ्च—प्रस्तावोद्गीथौ

प्रतिहारोपद्रवौ निधनमिति । सप्त वा । हिङ्कारः प्रस्ताव-
................दोङ्कार इति । तत्र प्रस्तावस्तावद्भक्त्यः
उद्गीथोपद्रव................ । प्रस्तावस्त्वाचार्येणैव
फुल्लग्रन्थे प्रस्तावखण्डिकायामुक्तः । प्रतिहारोऽत्र वक्ष्यते ।
निधनन्तु ....पदशब्दः पाद.........उत्तमः ।

....

क्षराणि पारिशेष्यादुपोत्तमपादान्ते चत्वारीत्येव नैरन्तर्येण
नाना...दृष्टा...प्रतिहार इति सिद्ध्यति । तथा यौक्त
स्रुच मा इन्द्रामित्यादावप्यस्य प्रयोजनन्द्रष्टव्यम् । तत्र
पदसङ्ख्याना......माद्यन्न्याय्यं प्रतीयात् । एतावति पादे
एतावन्त्यक्षराणि प्रतिहार इत्येवं पादस्याक्षरसङ्ख्यायाश्च
विशेषोक्तावसत्यान्तत्रोत्तमपादे यच्चतुरक्षरमाद्यं तन्न्याय्यं
प्रतिहारं विद्यात् । न्याय्यशब्द औ...थाच शप औ-
त्सर्गिकत्वेन न्याय्यविकरणाः भूवादय इति व्याकरणे
व्यवहारः । पदसङ्ख्यानादेश इत्येवौत्सर्गिकत्वे सिद्धे पुन-
र्न्यायपदसंज्ञस्वेनोपात्तमुत्तरत्र व्यवहारार्थमाद्ये न्याय्यौ ।...
दौ अत्र च यद्यप्यूहगीतीनां साम्नां सर्वेषां प्रतिपदं प्रति-
हारो वक्ष्यते । ततश्च तत्र चतुरक्षरमाद्यन्न्यायासिद्धमित्ये-
तावदेव वक्तव्यम् तथापि न्यायप्रतिहारस्यानूहगीतिष्वपि
व्याप्तत्वा......वृद्धिह्रासौ च । तत्र प्रतीयादित्यनुवर्तनेन
पदाक्षरो रथन्तर इत्यादौ च वक्ष्यमाणसङ्ख्यायाः पूर्वोपात्त-
चतुरक्षरापेक्षया यौ वृद्धिह्रासौ तावप्युत्तमे पदे प्रतीयात् ।
तत्र प्रथमातिक्र(मे)...विति सिद्ध्यति । अथ वा आद्यमि-
तीहाप्युत्तमर्थाद्द्विवचनां(न्तं) विपरिणम्यते । सङ्ख्याक्ष-

न्दे चास्तौभिकान्यक्षराणि । सङ्ख्यानिर्देशेष्वस्तो-
भिकानि स्तौभिकव्यतिरिक्तान्यार्चिकान्यक्षराणि प्रती-
यात् । वारवन्ती......या इति तत्रोत्तमपादे प्रा(गौ)होहा
या औह्लोवेत्येतानि स्तोभाक्षराणि विहाय ततः पूर्वाण्या-
र्चिकाक्षराणि ग्राह्याणि । प्रागौ होवाया इति नोक्तम् ।
उपरिष्टात् प्रति........................ प्रतिहारेऽन्त-
र्भावार्थम् ॥

End :

प्रतिहारोपदेशानन्तरं 'अथच्छन्नानिधनानि' —
इत्यनेन खण्डेन निधनप्रकारा उच्यन्ते। तत्र तावा-
(व)न्निधनानि द्विविधानि सामान्तिकान्यन्तस्सामिकानि
च। निधनमिडा वागिति सामान्तिकानि तदन्वयाश्च सा-
मानि यथा श्रुमः स्वाराणि निधनवन्त्यैडानि वाङ्निध-
नानि चोच्यन्ते यथा सूलकारः स्वाराणि हा इकारः स्वा-
रपदानुस्वाराणि च तेभ्योऽन्यान्यैडवाङ्निधनेभ्यश्च नि-
धनवन्तीति तत्र हा इकार स्वाराणि वामदेव्यानि पदा-
नुस्वाराण्योश्चनादीनि निधनानि वाश्चिति(?) द्विविधानि पद-
निधनानि च बहिर्निधनानि च। पदनिधनानि यौधाज-
यादीनि। बहिर्निधनानि आमहीयवादीनि ॥

* * *

अन्ततइति वचनं तन्निधनव्यावृत्त्यर्थं पाहि प्रेति पाहि नो
अग्नय इत्येषामन्त्ये साम्न्यूपस्थाने.... ....
... ...
यदा यता इति....अवोध्य...कमच्छेत्यार्चिकान्यक्षराण्येयं

वागान्तानि गीत्वा ततः पक्षिण्य...(र)थन्तरयोः प्राकृत-
निधनस्थाने निधनं कार्यं यच्च सूत्रकारेणानुक्तत्वाद्यज्ञसं-
युक्तविक... ... ... ॥

Colophon:

वृत्तिर्वरदराजेन वामना(चा)र्यसूनुना ।
उपग्रन्थस्य वै वृत्तिर्माधवार्येण या कृता ॥
तस्या य... ... ...
... ... श्लोकाः ।
कल्पब्राह्मणसूत्रैराहृत्यक्रतुषु विहितानाम् ।
अपि चैकार्षेयाणामिह विनियोगव्यवस्थोक्ता ॥
छन्दे देव...देवता विनियोगादीनान्तु दर्शयिष्यामः ।
आर्षेयकल्पविवृतौ क्रतुप्रयोगक्रमानुसारेण ॥
हरिः ॐम् ॥ शुभमस्तु ॥ श्रीराम(चन्द्राय नमः)

Subject: Pratihāra Nidhana Sūtra Vṛtti—a commentary on the Pratihāra and Nidhana sūtras which form the tenth Paṭala of the Upagrantha sūtra, belonging to Sāma Veda.

Remarks:—The Ms. is in a decaying condition. It is full of scriptorial errors. This is a commentary on the tenth Paṭala of the Upagrantha sūtras of Kātyāyana, of which the first 14 Khaṇḍas form the Pratihāra and the 15th, Khaṇḍa forms Nidhana. The Upagrantha Sūtras are attributed to Kātyāyana by Ṣaḍguru Śiṣya also in his Ṛg-Veda Sarvānukramaṇī Vṛtti—c/f.

' वाजिनां सूत्रकृत्स्नानामुपग्रन्थस्य कारकः ।

* * * * * * *

एवंगुणगणैर्युक्तः कात्यायनमहामुनिः ॥' Cf. No. 1940.

There are also other Pratihāra Sūtras composed by Jaimini and Āhiśreṇya. cf. No. 2045.

॥ प्रतिहारसूत्रभाष्यम् ॥

2045. PRATIHĀRASŪTRABHĀṢYAM.

Burnell's Catalogue No. 9117 b.

Substance—Palm leaf. **Size**—15¾ × 1½ inches. Laves—14 (147-160). Lines—9 or 10 to a Page. Script—Grantha. No. of Granthas—325. Author—Vainateya (?). Complete.

Beginning :

॥ प्रगी॰स्यामः ॥ (प्रगीतानां प्रतिहारान्यथावदधीतान् व्याख्यास्यामः) प्रकर्षेण गीतानि प्रगीतानि गीतस्य प्रकर्षो बहुकृत्वो गानम् । यानि नानुत्पन्नो(न्ना)नि सामानि स्तोत्रार्थव्यूहाम्नाये गीयन्ते तानि प्रगीतानि । अथवा ओकारस्तोभात् प्रत्यूष...भिर्विशेषैः प्रकृत्य यानि गीयन्ते तानि प्रगीतानि सर्वथा ऊहाम्नायगीतानीत्यर्थः । तेषां प्रगीतानामूहाम्नायगीतानां साम्नां प्रतिहारान्यथावदधीतानध्ययनवशेन क्लृप्ता[न्य]न्व्याख्यास्यामः । प्रतिहारानि ....वता सिद्धये ? यथाधीतानि नेत्यनर्थकमानर्थकं बुद्धिविवशेनैव गेयानीति यथा गीतिविशेषैः परोक्षैः स्तोभैश्चाध्ययने विशिष्य गीयन्ते तथैव प्रतिहारकाले गेयानीत्येतदर्थत्वादाप(ही)यवस्य चतुरक्षरः प्रतिहार उक्तः । स उदात्तानुदात्तविशिष्ट एव स्यात् नैकश्रुतिः पौष्कलस्य त्र्यक्षरः परोक्षीकृत्यैव वोच्येत नाभीति बाभ्रवस्य चतुरक्षरः समध्यमस्तोभसहित एव स्यान्न केवल(ऋ)गक्षरमन्त्रमेव प्रतिहारस्य तु परिमाणमात्रमेवोच्येत । न स्यात् ....इत्युपलक्षणमित्येतदर्थनिरूपणार्थमुक्तम् । यथाधीतानीति । अथवा सति विकल्पे सशंस...चा यथा स्व–

मामायमनुसृत्यैवति निश्चेतव्यामित्येतदर्थः। यथाधीता-
नीत्युक्तम्। एकैकानि हि सूत्राणि अनेकशाखोपकारकाणि
तस्यासौषमे(य)स्य प्रागभ्यासादुत्तमेन पदेन प्रतिहरेदित्या
भिश्रेण्योऽभ्यासादिभिश्चतुर्भिरिति शाण्डिल्य इति। अत्र
यासु शाखासु अभ्यासादेव च्छिन्नमस्ति तासु पूर्वः पक्ष
आश्रयणीयः। यास्वभ्यासपञ्चमे तासूत्तर[ः]श्चास्य छन्न-
त्वास्ति तासु विकल्पस्त्रीणि धनस्य त्व—साम्नोऽपि तथैवा-
भ्यासवतो वैदन्वतस्य त्रीणि ह्रस्तोभानि तृतीयमेव वेत्यत्र
सःस्ता(?)ध्यायितान्त्रीणि विश्राभ्याध्यायिनान्तृतीयमिति।
अथवात्रोक्तलक्षणस्य यस्य साम्नस्तद्विरोधिश्रुतिवचनं भू-
....तत्र[ः]श्रुतिवचनमेव ग्राह्यमित्येतदर्थं यथाधीतानीत्यु-
क्तम्। पञ्च रथन्तरस्येत्यथोक्तं शामभिन्द्रेति प्रतिहरतीति
श्रुतिः। तत्र यथाधीतानीति वचनात् प्रथमायां स्तोत्रि-
यायाश्चतुरक्षर एव प्रतिहा(रः) कल्प्यः। किम्पुनरिदं
विस्मृत्योच्यते। 'अथातः प्रतिहाराणा'मित्यधिकृत्य
प्रतिहारलक्षणः पूर्वमेव कथितः। इदमिदानीं पुनरुक्तमर्थमिव
प्रतिभाति। अत्र ब्रूमः। 'अथातः प्रतिहाराणा'मित्यधि-
कृत्य भगवदाचार्येण जयिमि(जैमिनि)ना प्रतिहा-
रलक्षणं सामान्यरूपेण प्रतिपादितम्। न व्यक्ततरं प्र-
तिसामोक्तमिदानीं पुनस्तावता ग्रन्थेनाधुनातनानामराणा-
मल्पमेधसां सर्वेषां साम(प्रति)हारावगतिश्चाशक्येति
मत्वा भगवानाहिश्रेण्यो नामाचार्यः प्रयोजनमा
त्रजिघृक्षया स्तोत्रार्थानामेव साम्नां व्यक्ततरं प्रतिहा-
रानाचिख्यासुरेवमारब्धवान्। तत्रोक्तमनुक्तञ्चाखिलं प्र-

तिहारकक्षणतयैतदाचार्येस्य भेदात्पुनरुक्तदोषो न भवति।
प्रति०वेत(प्रतिहारस्थानं पदाद्यः सर्वत्र) ॥

End :

॥ उत्त० द्यवत् ॥ (उत्तमे पदे तु न्याय्यवत्) ॥

* * * *

ननु विकल्पवाची वाश(ब्दः) प्र(यो)क्तव्यः...विकल्प-
वाची तुशब्दोऽस्त्येव; अनेकार्था हि निपाताः। आचार्या
हि यथेष्टशब्दैरिष्टमर्थमभिरूपयन्ति। तस्माच्छाखाभेदवशा-
द्विकल्पः। कथमत्र समुच्चय(प)क्षो नाश्रित उपोत्तमपदमुत्त-
मश्चतुरक्षरसहितं प्रतिहार इति। तुशब्दस्समुच्चयवाची
भवति। अत्र ब्रूमः। यथोद्गीथात्प्रतिहारो भूयान् भवति
तदयुक्तम्। भूयिष्ठ....तस्माद्विकल्प एव श्रेयान्। पाङ्क्ता-
नां प्रतिहारान्वक्ष्यमा(णां)श्चात्याति षद्। सञ्ज०
कारात् ॥ सञ्जयस्य यः प्रतिहार उक्तः षडक्षरः।

* * * * *

॥ सर्वे० स्तावः ॥ (। सर्वेषां प्रथमेन प्रस्तावः ॥) सर्वे-
षां पदानां........न्तु...प्रथमेन स्तोभेन प्रस्तावः स्यात्
प्रथमस्य नवमेन वा प्रतिहारः द्वितीयतृतीययोर्दशमेनैव
... प्रातिहारपटलचतुष्टयं व्याख्यातं पर्यवसितम् ॥
हरिः ॐम् । श्रीगोविन्दाय नमः ॥

Colophon : Nil.

Subject : Pratihāra sūtra bhāṣya,—a commentary on Āhiśreṇya's Pratihāra Sūtras—belonging to the Jaiminīya recension of Sāma Veda. 1-4 Paṭalas.

Remarks :—The Ms. is in a very much decaying condition. This

is a very good commentary on the Pratihāra Sūtra of Āhiśreṇya which consists of a division into four Paṭalas. This Pratihāra Sūtra is an elaboration of and a supplement to, the Jaimini's Pratihāra Sūtra. (See the introductory remarks in the beginning). This Pratihāra Sūtra, therefore, belongs to the Jaiminīya Śākhā. The other work contained herein is Kalpabrāhmaṇa (?) Prayoga Vṛtti. This Pratihāra Vṛtti is not, however, noticed by Dr. Burnell under this Ms. On the side margin of the first leaf of this Ms. is given 'प्रतिहारभाष्यं, वैनतेयम्'॥ Whether Vainateya is the author of this commentary is yet to be known.

॥ फुल्लसूत्रभाष्यम् ॥

2046. PHULLASŪTRABHĀṢYAM.

Burnell's Catalogue No. 2518. Page 10. Right column.
Substance—Paper. Size—13¾ × 7 inches. Sheets—86 (No. 78 given for two sheets). Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—3100. Author—Upādhyāyājātaśatru. Incomplete.

Beginning:

ॐ नमः श्रीसामवेदाय ॥

जितं भगवता येन हरिणा लोकधारिणा ।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना ॥ १ ॥

॥ सौभराभीवर्त्त(यौधा)जयानां वृद्धं तुरीयम् ॥

सौभराभीवर्त्त(यौधा)जयानां साम्ना तुरीयं चतुर्थमक्षरं यं दी(यदी ?)र्घं यत्तद्वृद्धं भवति तुरीयशब्देन चतुर्थमुच्यते । दीर्घं द्विमात्रमुच्यते । वृद्धं त्रिमात्रम् । उदाहरणानि सौभरे यं·

ह्रस्वाद्यान्त्ययोः । अभीवर्ते पुनानः सोमाद्ययोः । यौधाजये-तवाह॰ सोमाद्यायां अस्यापवादमाह ॥ आपीयूवाजेती ॰षि ॥ अकारः प्रतिषेधार्थः । प्रत्नं पीयू यौधाजये प्रस्व वाजे इति च येन ज्योती॰षि सौभरे एतेषु वृद्धिप्रतिषेधः ह्रस्वानामपि वृद्धिप्रापणार्थमाह ॥ अतिमधुदस्मम् ॥

End:

॥ यण्वादीनामप्रस्ताव्या उत्तरा ॥ यण्वादीनां पञ्चानां अपत्यसन्तनिशाकरवर्णानां स्तोत्रीया अप्रस्ता-व्या भवन्ति आद्याप्रस्तावसम्बन्धप्रद्दि उत्तरयोः । प्रस्ताव एव न उच्यते अप्र(स्ता)व्या उत्तरा इति ॥ प्रस्ताव्ये वा स्यंव (सन्त)निनः प्रस्ताव्ये वा सन्तल(नि)नः ॥ वा शब्दो वि आर्छः(?)या... आद्य(?)वुत्तरयोः प्रस्तावलो(?) एवं सन्तनिन्यपि प्राप्तं तस्मिन्सवचिविकल्पमाद(?)वाप्र-स्ताव्ये उत्तरे सन्तनिनः वा अप्रस्ताव्ये उत्तरे सन्तनिनः वा अप्रस्ताव्ये इति विकल्पः उत्तरयोरिति सिद्धम् ॥

Colophon : (Leaf No. 84)

इति षष्ठस्य दशमी कंडि(खण्ड)का ॥

उपाध्यायाजातशत्रुकृते पुष(ष्प)भाष्ये दशमस्यै(?)-

कादशी कं(खं)डिका समाप्ता ॥

दशमः(?) प्रपाठकः समाप्तः ।

संवत् १९[१]०३ शाके १८(७)६८.

(Leaf No. 64)

उपाध्यायाजातशत्रुथाव(कृते) विष्णुयशशिष्याव अनुचरणार्थभाष्यं क्षतभिति भावाः परिसमाप्ताः ॥

Subject : Phullasūtrabhāṣya—a commentary on these Sūtras belonging to Sāma Veda. 1-6 Prapāṭhakas. This

Ms. adopts the division into Prapāṭhakas and Khaṇḍas, as follows:—

1	सोभराभीवर्तंजयानाम्०	Prapāṭhaka	I	Khaṇḍas	12
2	अः कारौ वृद्धः पद्गीतः०	,,	II	,,	12
3	दावृच्य: सङ्कृष्या २ इडासङ्कृष्या०	,,	III	,,	12
4	यकारे वप्रत्यायवृद्धमन्तः०	,,	IV	,,	10
5	इदानीं विकल्पा उच्यन्ते०	,,	V	,,	9
6	नकारश्चत्रवानिसन्ध्यगीतः०	,,	VI	,,	11

Remarks:—The Ms. is in good condition. This Ms. is dated Saṃvat 19[1]03 or Śaka 1868 which might be corrected Saṃvat 1903 or Śaka 1768 corresponding to 1846 A. D.—the time of King Sivāji, the last Mahratha ruler of Tanjore (1833-55 A. D.) Regarding this Ms. Dr. Burnell observes on page 10 in his Catalogue, as follows:—"This work appears to exist in two distinct recensions; the Northern called Puṣpasūtra and the Southern called Phullasūtra. The difference also extends to the commentary by Ajātaśatru. This commentary begins with the 56th section of the text in the Ms. (No. 1966). Cf. Weber's "Ueber das Sapta, catakam des Hāla," P. 259 note."

It is to be conjectured from the last colophon in this Ms. that this author might have divided the whole of Phullasūtra into two parts, the former consisting of the first four Prapāṭhakas(?) and the latter, the last six Prapāṭhakas. A portion of this commentary is now printed together with the text in Benares.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2047. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9169 a. Page 15. Right column.

Substance—Palm leaf. Size—16¾×2¾ inches. Leaves—207. Lines—12 to 15 to a Page. Script—Grantha. No. of Granthas—25000. Author—Rudradatta. First fifteen Praśnas.

Beginning:

॥ ॐ यज्ञेश्वराय नमः ॥

स्वं स्वं मनोरथमवाप्तुमपोढविघ्नं
यस्य प्रसादमनवाप्य न शक्नुवन्ति ।
पद्मासनप्रभृतयः प्रथमेऽपि देवाः
तद्वस्तु हस्तिमुखमस्तु मयि प्रसन्नं ॥

आज्ञा श्रुतिस्मृतिर्य(ती य)स्य यस्य यज्ञास्सभाजनम् ।
नमः परस्मै विश्वस्मात्तस्मै श्रीवत्सवक्षसे ॥

आदिमं ब्राह्मणं क्षेममध्यस्थितपरावरम् ।
अपास्ताशेषपाप्मानमापस्तम्बमुनिं स्तुमः ॥

अस्यापस्तम्बसूत्रस्य दुर्ज्ञानज्ञानसंशयान् ।
सूत्रदीपिकया वृत्त्या रुद्रदत्तः परास्यति ॥

सन्तु ये सुविवक्तारः सन्ततस्स्युर्गुणसाक्षिणः ।
रत्नं रत्नमिति ग्राह्यं मूलं किं तस्य गृह्यते ॥

अत्र भगवानापस्तम्बस्समस्तलोकहितचिकीर्षया वि-
ध्यर्थवादमन्त्रात्मकविविधवेदभागव्याकीर्णं विभक्तानेक-
शाखाव्यासक्तञ्च विश्वस्य वैतानिकस्य कर्मणो
याजुर्वेदिकं प्रयोगं व्याचिख्यासुस्तत्र सर्वप्रथमभाविनोऽ-
ग्न्याधेयस्यापि इष्ट्यन्तपक्षत्वात्सर्वेष्टीनाञ्च दर्शपूर्ण-
मासप्रकृतित्वात् समाम्नाये च दर्शपूर्णमासमन्त्राणामेव

प्राथम्यात्तावेवाग्रे व्याख्यास्यन्नधिकारं दर्शयति—

'अथातो दर्शपूर्णमासौ व्याख्यास्याम' इति ॥

End:

॥ यज्ञायज्ञीयं प्रति ॥ यज्ञायज्ञीयस्तोत्रोपाकरणे कृते वसतीवरी गृह्णाति । पयांसि आशीरर्थानि विद्यास्ति विविधं प्रेष्यति सूक्तवाककाले श्वस्सुत्यामिन्द्राग्निभ्यामित्यादिनापि । शेषं पूर्ववत् ।

एतेषामेकस्मिन्नप्यक्रियमाणे नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि स्वाहेत्याहुतिं हुत्वा सर्वप्रायश्चित्तं जुहुयाज्जुहुयात् ॥

एतेषामेकस्मिन्नपि कर्मणि पूर्वैरपरैर्वाक्रियमाणे आहुतीर्जुहुयात् किं पुनर्द्वयोर्बहु(षु) वेत्यर्थः ॥

Colophon:

नवमः पटलः ॥

इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ

सूत्रदीपिकायाञ्चतुर्दशः(पञ्चदशः)

प्रश्नस्समाप्तः ॥

हरिः ओं । श्रियै नमः । यज्ञेश्वराय नमः ।

श्रीकृष्णार्पणमस्तु ॥

बृहद्व्याघ्रपुरं कन्दाडे श्रीनिवासाचार्यैर्लिखितम् ॥

अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ।

करकृतमपराधं क्षन्तुमर्हति [समीक्ष्य] सज्जनः ।

कन्दाडै श्रीनिवासाचार्यलिखितम् ।

मन्मथनाम संवत्सरं मिथुनमासं त्रयोविंशति:(?) ॥

Subject :—Āpastamba Śrauta sūtra vyākhyā otherwise known as Sūtradīpikā—a commentary on these sūtras be-longing to Black yajur Veda. 1-15 Praśnas. This Ms. adopts the division into praśnas and paṭalas, as follows:—

Praśna		Paṭalas	Praśna		Paṭalas
I	—	8	VIII	—	6
II	—	6	IX	—	5
III	—	6	X	—	10
IV	—	4	XI	—	6 (?)
V	—	8	XII	—	8
VI	—	8	XIII	—	8 (?)
VII	—	8	XIV	—	9

XV — 9.

Remarks:—The Ms. contains broad Śrītāḷa leaves. It is in a fairly good condition. The works contained herein are:—

1 आपस्तम्बश्रौतसूत्रव्याख्या (सूत्रदीपिका) ॥

2 आपस्तम्बप्रायश्चित्तशतद्वयीव्याख्या ॥

3 आपस्तम्बनित्यहोमप्रायश्चित्तम् ॥

4 अग्निहोत्रादिप्रायश्चित्तम् ॥

5 श्रीनिवासदीक्षितीयं प्रायश्चित्तम् ॥

The scribe of this Ms. is one Kandāḍai Śrīnivāsācārya of Bṛhadvyāghrapura, the modern Perumpuliyūr near Tiruvadi in Tanjore Dt. A part of this commentary has ben edited in grantha script in South India. Dr. Burnell observes that 'it is more than uncertain if Rudradatta wrote a commentary beyond Praśna XV.'

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2048. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3848. Page 16. Left column. Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{3}{4}$ inches. Sheets—251. Lines—9 or 11 to a Page. Script—Devanāgarī. No. of Granthas—7750. Author—Cauṇḍapācārya. First three Praśnas.

Beginning:

श्रीसाम्बाय परस्मै ब्रह्मणे नमः ॥

श्रीदक्षिणामूर्तये नमः ॥

वेदान्वा(न्व्या)ख्यन्माधवार्यैः सायणार्यैवपुर्धरः ।
तस्मात्सदुदयं प्रापदुदयाद्रेरिवांशुमान् ॥ १ ॥

करपूरितसर्वाशः श्रीमान्हरिहरेश्वरः ।
यः शश्वदाक्रमीद्भिवभुवं नानानृपाश्रयाम् ॥ २ ॥

व्यधादपि पुराणानि महादानानि षोडश ।
तस्मादभूत्त्रूरिधामा युवा बुक्कमहीपतिः ॥ ३ ॥

यः प्राचीमाक्रमीदुद्य(घ्य)श्चः(थ) सर्वा दिशो वशी ।
समुत्खातनिखातारिमण्डलं स्तम्भमण्डिते ॥ ४ ॥

मण्डपे तुलया येन स्वे(से)नात्मामार्यमाभ्वि(यि)ना(ता) ।
तृप्य(तिप्पा)म्बा नाम तस्याभूद्राज्ञी गुणगरीयसी ॥ ५ ॥

देवपत्न्यो भजन्याशाः(न्तीवान्) शच्याद्या यत्क्रिया भूसम ।
तस्मादस्यां समुदभूद्भूपतिः श्रीभुवोः पतिः ॥
कर्मब्रह्माध्वनीनेन कविर्येन कृती कृतः ॥ ६ ॥

किञ्चा(ञ्चा)वञ्चितधर्मेण येन श्रीभूसमे प्रिये ॥

पद्मामहङ्काम्बिके(का)देव्यौ दीव्यतो दिव्यलीलया ।
अलब्धासौ चि(सु) क्रिययोः पुमर्थास्तनयास्तयोः ॥ ७ ॥

हर्यपेक्षसमुद्रेशबुक्कभूपरथीतमान् ।
शस्त्रशास्त्रैकविदुषा जिनबाह्यान्तरद्विषा ॥ ८ ॥

अभ्यासस्वाक्षरक्षीणा(?) के न(नु?) तेन समा नृपाः ।
नित्ययज्ञायितकुला पुरुषा हि महाक्रतौ(तोः) ॥ ९ ॥

अपूर्णपञ्चयज्ञानां नृपाणां कस्य का तुला ।
कर्ता हेमादिदानानां श्रोता श्रुत्यादिसद्गिराम् ॥ १० ॥

आहर्ताऽसौ पुमर्थानामादर्ता सत्क्रियाजुषाम् ।
स कदाचिद्भूपतीन्द्रः(न्दुः) पालयन्धर्मतः प्रजाः ॥

सम्प्रार्थितो द्विजैः श्रौतं विशदीकर्तुमुद्यतः ।
विचार्य विदुषां मध्ये चौण्डपार्यमदीदिशत् ॥

व्याचक्षा(क्ष्वा)ध्वरतन्त्रं त्वं समन्त्रार्थमिति स्फुटम् ।
किं स्तुमश्चौण्डपाचार्यं जातं तत्र महाकुले ॥

वसिष्ठारुन्धतीमुख्या यत्कुले गृहमेधिनः ।
वसिष्ठो वासिष्ठकुले चौण्डाचार्यः सतां मतः ॥

कामाम्बा गृहिणी तस्य भरद्वाजकुलेऽजनि ।
आद्यादिवादोमधु(तो मिथु)ना भूरितां सनुयं(दभूवन्महिताः) सुताः ॥

चौण्डपार्यादित्यदेवमञ्चव(पा)र्याभिधाः त्रि(त्र)यः ।
यानमंस्त जनो देवांस्त्रिलोकाहितसम्पदा ॥

त्रीन्वेदान्सर्वविद्यानांस्त्रीनग्नीन्पावनस्त्वतः ।
उत्साही सर्वकृत्येषु प्रभुमन्त्रा(न्त्य)नुजद्वयः ॥

चौण्डपार्योऽमात्यवर्यः सोऽभूत्भूपतिभूपतेः ।
सद्गुरूपात्तसद्विद्यो विष्णुभट्टार्यसूक्तिभिः ॥

विद्वत्प्रयोगं सफ(क)लं क्रतुमाहरतु त्वयम्(क्रतूना-
माकरोम्यहम्) ।
कल्पसूत्रेष्वनेकेषु सर्वक्रतुसमन्वयात् ॥

आपस्तम्बाचार्यसूत्रं प्रधानं प्रचुरं त(त्व)तः ।
व्याख्यास्यते च तत्सूत्रं हौत्रौद्गात्र(त्रे) प्रसङ्गतम्(तः) ॥

सूत्रार्थमन्त्रव्याख्यार्थप्रयोगप्रतिपादनैः ।
ब्राह्मणं कल्पसूत्राणि मीमांसान्यायविस्तरौ ॥

तर्कव्याकरणे छन्दो निरुक्तज्योतिषे अपि ।
वेदभाष्याणि सर्वाणि स्मृतितत्सङ्ग्रहानपि ॥

सूत्रव्याख्यास्तथा सर्वा आचारं तद्विदामपि ।
कलाविद्या शिल्पविद्या अपि संशोध्य यत्नतः ॥

प्रयोगरत्नमालेयं तन्यते हृदयङ्गमा ॥

गणयन्तो गुणानेव सर्वे तां बहुमन्यताम् ।
परिग्रहो हि महतां गुणेन्दीवरचन्द्रिका ॥

यद्वा सन्तो नार्थनीया नितरामितरे यतः ।
गुणानां सदसद्भावौ स्वयमेव नियच्छतः ॥

* * *

त्रिंशत्प्रश्नात्मकं सूत्रमापस्तम्बमुनीरितम् ।
श्रौतगार्ह्यस्मार्तकर्मबोधकं तत्र पञ्चभिः ।
पञ्चविंशतिभिः प्रश्नैर्गार्ह्यस्मार्तविनिर्णयः ॥

इतरैः पञ्चविंशत्या श्रौततन्त्रं प्रपञ्च्यते ।

तत्रादिमैर्नवैः(व) प्रश्नैर्हविर्यज्ञविधिक्रमः ॥
अन्यै(न्त्यै)ः षोडशभिः सोमः प्राधान्येन प्रपञ्चितः ।
तत्रादिमैस्त्रिभिर्दर्शपूर्णमासौ तदादिमे ॥
एकदेशे पिण्डपितृयज्ञोऽपि प्रतिपादितः ।
चतुर्थे तथाजमानमाधानं पञ्चमे ततः(मतम्) ॥
षष्ठेऽग्निहोत्राग्रयणे सप्तमे पशुरष्टमे ।
चातुर्मास्यान्यथ प्रायश्चित्तानां नवमे विधिः ॥
अग्निष्टोमप्रपञ्चोऽथ पञ्चभिर्दशमादिभिः ।
प्रश्नेऽत्र दशमे दीक्षा प्रायणीये स्वराट्क्रमः ॥
आतिथ्येष्टिरिति प्रोक्तं सप्रपञ्चचतुष्टयम् ।
एकादशे प्रवर्ग्याणां सप्रायश्चित्तको विधिः ॥
द्वादशे थो(श्रु)पसद्द्वेधामग्निष्टोमीयवर्णनम् ।
प्रश्ने त्रयोदशे प्रातस्सवनोक्तिश्चतुर्दशे ।
सवने द्वेऽथावभृथोऽदयनीयवशाविधिः ॥
प्रश्ने पञ्चदशे चोक्थ्यष्षोडशी चातिरात्रकः ।
आप्तोर्यामैकादशिना(न?)व्रह्मत्वं दक्षिणाविधिः ।
प्रसङ्गाद्ग्रहोत्रादिप्रायश्चित्तञ्च सौमिकम् ॥
अग्निः साङ्गो द्वयोस्तत्र षोडशे प्रथमा चितिः ।
प्रश्ने सप्तदशे शिष्टा द्वित्रिषाहास्त्रिके(?) अपि ॥
अष्टादशे वाजपेयराजसूयौ सविस्तरौ ।
एकोनविंशे सौत्रामणिकाठकचितिक्रमः ॥
तत्रैव काम्याः पशवः इष्टयश्च प्रपाश्रिताः ।

विंशेऽश्वमेधपुरुषमेधयोर्विधिविस्तरः ॥
एकविंशे द्वादशाहमहाव्रतविधिर्गवाम् ।
उत्सर्गिणामप्ययनं द्वाविंशेऽहीनविस्तरः ॥
त्रयोविंशे ततः प्रश्ने सत्रायनत्रिविधक्रमः ।
चतुर्विंशे ततः प्रश्ने न्यायप्रवरहौत्रकम् ॥
पञ्चविंशे च षड्विंशे गार्ह्या मन्त्राः प्रपञ्चिताः ।
प्रश्नेऽथ सप्तविंशे स्याद्गार्ह्यतन्त्रविधिक्रमः ।
अष्टाविंशैकोनत्रिंशप्रश्नयोः स्मार्तसत्क्रियाः ॥
सामान्यतो विशेषेण त्रिंशे शुल्बविनिर्णयः ।
एवं सामान्यतः सर्वप्रश्नानामर्थसङ्ग्रहः ॥

End :

एवं विहितमिष्टीयपशुबन्धानां ब्रह्मत्वं ब्रह्मत्वम् । यदेवं विहितं दर्शपूर्णमासयोर्ब्रह्मत्वमिदमेव सर्वेष्टीनां पशुबन्धानाञ्च ब्रह्मत्वम् । विशेषस्तु तत्र तत्र वक्ष्यते । अतोऽन्यत्र स व्यावृत्तौ ब्रह्मयजमानाविति यदुक्तं तदकरणेऽप्यदोष इत्यर्थः ।

इति ब्रह्मत्वान्ततन्त्रमन्त्रव्याख्यासुगन्धिभिः ।
सूक्तिप्रसूनैः पुष्णातु पुमर्थान्पुरुषोत्तमः ॥
प्राशित्रादिब्रह्मत्वान्तपदार्थोक्तिसमुज्ज्वलः ।
तृतीयो व्याकृतः प्रश्नोऽनुनिर्वाप्यादिसत्क्रियः ॥ १ ॥

Colophon :

इति श्रीमद्राजाधिराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरन्धरप्रतापयुवबुक्कभूपालक्षीरार्णवपूर्णचन्द्रस्य राजव्याघ्रराजवाल्मी-

के: कर्मब्रह्माध्वनीनस्य श्रीवीरभूपतिभूपालस्य मन्त्रिणश्चिन्ना-
ग्नीनन्दनेनादित्यदेवमखपाचार्यप्रजन्मना चौण्डपाचार्येण विर-
चितायामापस्तम्बीयाध्वरतन्त्रस्वतन्त्रव्याख्यायां प्रयोगरत्नमालायां
तृतीये प्रश्ने षष्ठः पटलः ॥

श्रीदक्षिणामूर्तिगुरुचरणारविन्दयोरर्पितास्तु प्रयोगरत्नमाला ॥

समाप्तश्चायं तृतीयः प्रश्नः ॥

Subject: Āpastambaśrautasūtravyākhyā, otherwise known as Prayogaratnamālā—a commentary on these sūtras belonging to Black Yajur Veda. 1-3 Praśnas.

Remarks:—The Ms. is in a very good condition. On the title page is given 'दर्शपूर्णमासप्रश्नत्रयप्रयोगरत्नमाला पिङ्गलोपनाम्नः श्रीपतिरायस्य' i.e. the Ms. belonged to one Piṅgala Śrīpati-rāya.

The long beginning given in this Ms. contains historically interesting information on the succssion of Vijayanagar dynasty, though the author has in view a completely different one from the accepted order of succession in the same dynasty. It is probably, as Dr. Burnell himself observes, more correct than the four or five lists collected by Lassen (L. A-K. IV., Beilage, pp. 976 ffg.).

Again, the introductory verses of this work give a clue to the size and contents of the Āpastamba Kalpasūtras—since probably the oldest authority on this subject might be Cauṇḍapācārya of the 15th century.

After giving the size and contents of the Āpastamba Sūtras as given by Cauṇḍapācārya, Dr. Burnell observes on page 17 of his Catalogue as follows:—

"It is thus evident that Cauṇḍappa's account is correct. One point remains to be noticed. He (Cauṇḍappa) entirely

omits mention of two Praśnas which treat of paitṛmedhika rites, and which are reckoned usually to be the thirty-first and thirty-second of the work. In some Mss. however of the thirtieth, thirty-first and thirty-second Praśnas (which are not uncommon in S. India), I have seen them numbered as twenty-fifth, twenty-sixth, and twenty-seventh, and, apparently, excluding the Dharmasūtra.

"Commentaries on the different sections of this huge Sūtra are numerous; and in fragments, at all events, are not uncommon in S. India; but I cannot hear of anything like a complete copy of any one of them. Dhūrtasvāmin, and perhaps also, Kapardisvāmin, have written commentaries (it is said) on the whole. The commentary by the first is very brief in parts and not of much use in restoring the text as far as the 18 Praśnas go which I possess. It has been annotated by Kāśikarāma. There is also a comment on these Sūtras by Gurudevasvāmin, which is probably an old one, and another (of recent times) by Ahobalasūri. It is not unlikely that Haradatta commented on the whole 30 sections; the tradition in S. India, in fact, that he is the same as Rudradatta, whose commentary has been already described. Under the name of Haradatta are commentaries on the Mantrapraśna, Gṛhya and Dharma sections (xxvi, xxvii, xxviii, and xxix); his commentary on the gṛhya section he termed "Anākulā." (Su)darśanā(cā)rya has also explained the gṛhya Práśna. I have a copy of an anonymous commentary on the Paribhāṣā—(sāmānya) sūtra which is probably by Tālavṛntasvāmin. The Śulba praśna has been annotated by Karavindasvāmin, Kapardisvāmin and Sundararāja. There are also prayoga treatises which are more easily to be had than the commentaries and which are described further on,

"Of the Āpastambasūtras but little has been published. Dr. Max Muller long ago translated the Paribhāṣā Section into German. Dr. Būhler has edited the Dharmapraśnas (Bombay, 1868-1871) with extracts from Haradatta's commentary and critical notes, and he promises shortly a translation which has been sometime nearly printed. Prof. Eggeling has long promised an edition of the Gṛhya chapter. Perhaps, the most interesting section of the whole is the Śulba chapter, which treats of the construction of altars. This involves (as I pointed out in 1896 in my catalogue p. 29) considerable geometrical knowledge, and must throw much light on the beginnings of Indian Geometry. Dr. Thibaut has recently taken up this subject, and it is to be hoped that he will be able to bring out an edition. The Āpastamba and Baudhāyana sūtras differ much in this respect, and a comparison of the two is requisite, to say nothing of reference to the traditional diagrams for constructing these altars which may still be found here and there with Vedic priests, and without which (though perhaps sometimes erroneous) it is impossible to understand the necessarily great variety of bricks which are used."

The author of this work is Cauṇḍapācārya who is said to be the elder brother of Ādityadeva and Mañcapācārya, and the son of one Cinnāryā. He is again known as the famous Minister of Śrī Vīrabhūpati of Vijayanagar dynasty.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2049. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3854. Page 16. Left column.

Substance—Paper. Size—11⅛ × 4¾ inches. Sheets—117. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—3050. Author—Cauṇḍapācārya. First and Second Praśnas—incomplete.

Beginning:

श्रीमहागणपतये नमः ।

श्रीपाण्डुरङ्गाय नमः ॥ श्रीसरस्वत्यै नमः ।

श्रीगुरुभ्यो नमः । श्रीनृसिंहाय नमः ॥ ॐ ॥

समुन्मूलितसर्वाङ्गकृतार्था भारती यतः ।
तं भारतीतीर्थगुरुं लोकैकगुरुमाश्रये ॥ १ ॥
अस्तिस्वस्तिनिवासो वा वासुदेवनिवासभूः ।
क्षीरनिधिः पद्मसुधासुधाकरसुधाकरः ॥ २ ॥
ततः समुदभूद्भूरियशसः शशलाञ्छनः ।
योऽसौ श्रुतिशिरोरत्नशिरोरत्नितविग्रहः ॥ ३ ॥
तस्मादजनि भूजानिकुलं कलिमलापहम् ।
यादवं यदुजन्मापि जन्मालब्ध परः पुमान् ॥ ४ ॥
तत्राभूत्सङ्गमः सम्राट्सम्राडश्रीकसम्भवः ।
हरिरप्यवताराणामेको(के)नान्येन सङ्गमः ॥ ५ ॥
ततोऽभूवन्पञ्च भूपा भूतवज्जगतः कृते ।
हर्यपक्ष्मापभूकेशाकेशकम्पमुदारपाः ॥ ६ ॥
तेष्वन्यकृतादिक्पाला......वैक्षितः ।
वेदान्ध्यारुयन्माधवार्यः सायणार्यवपुर्धरः ॥ ७ ॥

Same as No. 2048.

End :

॥ क्षत्रस्य त्वौजसे यज्ञाय धर्मांयगृह्णामि ॥ क्षत्रस्य क्षत्रियजातेः ओजः यत्सामर्थ्यं । शेषं व्याख्यातम् ॥ विशे त्वा यज्ञाय धर्माय गृह्णामि ॥ वैश्यजातेः कृषिवाणिज्यादि(षु) यत्सामर्थ्यं तस्मै यन्त्रायेत्यादिपूर्ववत् ॥ सुवीर्याय त्वा गृह्णामि ॥ सुवीर्यं सर्वेषां स्वस्वव्यापारे सामर्थ्यातिशयः । शेषेण ध्रुवायां चतुः पञ्चकृत्वो वा प्रतिमन्त्रं । शेषेणानुवाकशेषेण । अन्यत्पूर्ववद्व्याख्येयम् । प्रा(जापत्यानि यजूंषि) ।

Colophon : Same as No. 2048.

Subject : Āpastambaśrautasūtravyākhyā, otherwise known as Prayogaratnamālā. First and Second Praśnas.

Remarks :—The Ms. is in a decaying condition. This Ms. abruptly ends in the middle of the commentary on the second paṭala of the second Praśna of th Āpastambaśrautasūtra.

The six and a half verses given in the beginning are additionally found in this Ms. and in No. 2050. The readings of this Ms. are slightly different from those found in No. 2048. Some of the important variations in readings found in this Ms. are given within circular brackets in No. 2048.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2050. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3850. **Page** 16. Left column.

Substance—Paper. **Size**—11×4½ inches. **Sheets**—158. **Lines**—10 to a Page. **Script**—Devanāgarī. **No. of Gran-**

thas—3750. Author—Caundapācārya. First and second Praśnas—incomplete.

Beginning—Same as No. 2049.

End :

अयं वेद: पृथिवीमन्वाविन्द-
द्गुहासतीं गहने गह्वरेषु ।
स विन्दति यजमानाय लोक-
मच्छिद्रं यज्ञं भूरिकर्मा करोतु ॥

अयं वेदो वेदिरूपां पृथिवीं असुरेभ्योऽनुक्रमेणालभत । तथा च ब्राह्मणम् । वेदेन वै देवास्त(द)सुराणामिति । किंविधां पृथिवीं गुहा गोप्ये तत्रापि गहने द्रष्टुमशक्ये स्थाने तत्रापि गह्वरेषु दुष्प्राप्येषु प्रदेशेषु वर्तमानां । तथा च ब्राह्मणम् । वराहोऽयं वामनोष इति । तादृशो वेदः यजमानार्थं स्थानविशेषं लभतां । तत्सिद्ध्यर्थं बहुव्यापारः सन् यज्ञमविकलं करोतु ॥

* * * * * *

प्रागग्रैर्दक्षिणोत्तरैरुत्तरतोऽधरैः प्राक् प्रतिपयो(?)दपवर्गं परिस्तीर्यान्तरश्रोण्योत्तरतो दर्भैर्होतृषदनं कल्पयित्वा सामिधेनीराधातुमिध्ममादत्ते ॥

इत्थं हविरासादनान्तमन्त्रव्याख्यासुगन्धिभिः ।
सूक्तिप्रसूनैः पुष्णातु पुमर्थान्पुरुषोत्तमः ॥

Colophon :

इति श्रीमद्राजाधिराज + प्रयोगरत्नमालायां
द्वितीयप्रश्ने तृतीय: पटल: ॥

Subject : Prayogaratnamālā. First and second Praśnas.

Remarks:—The Ms. is in good condition. It breaks off in the third paṭala of the Second Praśna.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2051. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3849. Page 16. Left column. Substance—Paper. Size $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—195. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—4000. Author—Cauṇḍapācārya. Second and third Praśnas—incomplete.

Beginning:

श्रीगणेशाय नमः ॥

कर्मब्रह्माध्वनीनस्य मन्त्री भूपतिभूपतेः ।
व्याचष्टे चौण्डपाचार्यः सामिधेन्यादिसत्क्रियाम् ॥

अत्र वक्ष्यमाणसामिधेन्यनुवचनादि तावद्धौत्रं होतृकर्तृत्वात्तत्रैष्टिकं पाशुकं हौत्रद्वयमाश्वलायनमापस्तम्बीयञ्च ॥ तथा हि ॥ ऋग्वेदेन होता करोति ऋग्यजुर्वेदाभ्यां दर्शपूर्णमासावित्याचार्यवचनात् । ऋग्वेदे तन्मन्त्राणामाम्नानादाश्वलायनेन सूत्रे तत्प्रतिपादनाच्चाश्वलायनं तावदेकं यथा यजुर्वेदे वा वैनर्चनेत्यादिब्राह्मणे तद्विधानात्सत्यं प्रपद्य इत्यादिप्रश्नद्वये तन्मन्त्राणामाम्नानादाचार्येण प्रवरानन्तरं तत्प्रतिपादनादापस्तम्बीयञ्चापरम् । अतो विकल्पेन द्वयोरनुष्ठेयत्वाद्यथावतभेदमुभयं प्रतिपाद्यते ॥

End and colophon—Same as No. 2048.

Subject: Āpastambaśrautasūtravyākhyā, otherwise known as Prayogaratnamālā. Second and third Praśnas.

Remarks:—The Ms. is in good condition. It begins with the text from the fourth paṭala of the Second Praśna. Hence it might be a continuation of 2050. Dr. Burnell observes that this is an independent Ms., but inferior to No. 2048.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2052. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3853. Page 15. Right column. Substance—Paper. Size—11¾ × 1⅓ inches. Sheets—40. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—950. Author—Dhūrtasvāmin. Paribhāṣāvyākhyā only.

Beginning:

श्रीयज्ञेश्वराय नमः ॥ ॐ यज्ञं व्याख्यास्यामः ॥

अथायं सूत्रारम्भहेतुः । नित्ययज्ञक्रिया पुरुषश्रेयोऽभिव्यनक्ति । तस्यैवाक्रिया[यां] प्रत्यवायमापादयति । ऋणश्रुतेरक्रियायां प्रायश्चित्तविधानाच्च ये चान्ये आश्रमा ऊर्ध्वरेतसां ते च नित्यश्रुतिविरोधादनधिकृतान्धपङ्ग्वादिविषयतया व्याख्येयाः । एवमवश्यमनुष्ठेयो यज्ञः श्रुत्यर्थस्यासर्वज्ञागम्यत्वेन शाखान्तरविप्रकीर्णोपसंहाराशक्तेश्चाव्याख्याताेऽनुष्ठातुमशक्य इति करुणाविष्टहृदयतया धर्मकथनाय तत्तच्छ्रेयोऽ(र्थि)तया यज्ञं व्याचिकीर्षन्नाचार्यः प्रतिजज्ञे— यज्ञं व्याख्यास्याम इति । देवतां प्रति स्वद्रव्यस्योत्सर्जनं यज्ञः । यज्ञ इत्येकविंशतिसंस्थो यज्ञो जात्यभिधानेन व्यपदिश्यते । सप्त सोमसंस्थाः, सप्त हविर्यज्ञसंस्थाः । सप्त पाकसंस्था इति । तत्राग्निष्टोमोऽस्यग्निष्टोम

उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति(सप्त) सोमसंस्थाः । अग्निहोत्रं दर्शपूर्णमासावाग्रयणं पिण्डपितृयज्ञश्चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणिरिति सप्त हविर्यज्ञसंस्थाः । औपासनहोमो वैश्वदेवं पार्वणमष्टका मासिश्राद्धं सर्पबलिरीशानबलिरिति सप्त पाकयज्ञसंस्था इति । वी आङ् इत्येतावुपसर्गौ । उपसर्गश्च क्रियान्तरे वर्तमानमर्थान्तरमभिद्योतयति । यथा प्रतिष्ठित इति तामेव क्रियां विशेषयति । अत्र विशब्दो विस्तरार्थः अधिकृतायां शाखायां सङ्क्षेपतो विधानेन शाखान्तरस्थान् विधीनुपसंहृत्य विस्तरेणेत्यर्थः । आङ् बलवदर्थे, श्रुत्यर्थसंशये सिद्धान्तं बलवद्भिर्हेतुभिरुपपाद्येत्यर्थः । व्याख्यास्याम इति चक्षिङ्धातोर्व्यक्तवचनस्य कृतख्याञादेशस्य लि(लृ)ट्प्रत्ययोत्तमपुरुषबहुवचनान्तस्य रूपं व्यक्तं वक्ष्याम इत्यर्थः । एकविंशतिसंस्थं यज्ञं विस्तारेण शाखान्तरस्थान् विधीनुपसंहृत्य सिद्धान्तं बलावद्भिर्हेतुभिरुपपाद्य व्यक्तं वक्ष्याम इति पिण्डितार्थः ॥

End :

अर्थायार्थायाग्निं प्रणयत्यपवृक्ते कर्मणि लौकिकः सम्पद्यते यथासमारूढे ॥

अर्थायार्थाय प्रयोजनाय प्रयोजनायेत्यर्थः । अग्निरित्याहवनीयो विधीयते ।

आपस्तम्बमस्या सर्वेषां धारणमेव भारद्वाजस्य हिरण्यकेशि(नः), आश्वलायनस्य तु सर्वत्राधानप्रभृति आधाना-

हादशरात्रमजस्रा अत्यन्तं तुगतश्रिय इति यदानुक(नक्त)मा-
हवनीयं धारयेदिति नक्तधारणं तदा होमद्वयार्थं प्रणेष्यामी-
ति सङ्कल्प्य प्रणयनं दक्षिणाग्नेः पुनरानयनमेवाहवनीय-
धारणवचनात् यथासमारूढ इति दृष्टान्तोपदेशोपपत्ते:
कर्मण्यपि समारोपणं यजमानस्य मानसव्यापारपक्षे गार्ह-
पत्यागारं प्राक् ॥(१)

Colophon:

इति धूर्तस्वामिकृतसामान्यसूत्रभाष्यं समाप्तिमगमत् ॥

Subject: Āpastamba paribhāṣāsūtra Vyākhyā—a commentary on Paribhāṣāsūtras otherwise known as Sāmānya sūtras (i.e. the former part of the 24th Praśna of Āpastamba Śrautasūtras.)

Remarks:—The Ms. is in a very good condition. This work has already been printed in the Government Oriental Library Series, Mysore, by Mr. A. Mahādeva Śāstrin, who attributes the authorship of this work to Haradatta and says that Dhūrtasvāmin's authorship is restricted to the commentary on the first eighteen praśnas only. But we have in this Ms. Dhūrtasvāmin's commentary on a portion of the 24th Praśna also. The readings of this Ms. are slightly different from those found in the printed Volume.

॥ आपस्तम्बश्रौतसूत्रव्यख्या ॥

2053. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3852. Page 15. Right column. **Substance**—Paper. Size—$12\frac{1}{8} \times 5$ inches. Sheets—84. Lines—5 to 10 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—Karavindasvāmin. Śulba Sūtra Vyākhyā only.

Beginning :

श्रीमहागणपतये नमः ॥

विहारयोगान्व्याख्यास्यामः ॥ श्रीगणेशाय नमः ॥

ॐ मित्येकाक्षराख्येयं वन्दे वाङ्मनसातिगम् ।
पश्यन्ति सूरयो यद्धि तद्विष्णोः परमं पदम् ॥ १ ॥

लक्ष्मीसहायमतसीकुसुमच्छविशाश्वतम् ।
ज्योतिर्मे हृदये भूयात्सदा राजीवलोचनम् ॥ २ ॥

आपस्तम्बाय मुनये नमो वेदार्थभूमये ।
यत्सूत्रसक्तास्तिष्ठन्ति यज्ञाः श्रुतिकुमारिकाः ॥ ३ ॥

तच्छुल्बसूत्रव्याख्येयमक्षरार्थविबन्धिनी ।
करविन्दाधिपेनाभिधीयते भाष्यकृन्मते ॥ ४ ॥

यज्ञव्याख्याप्रतिज्ञां कुर्वता भगवताऽपस्तम्बेन व्याख्येयतया हविर्यज्ञाः सोमयज्ञाः पाकयज्ञाश्च प्रतिज्ञाताः व्याख्याताश्च । तत्र तावदैष्टिकसौमिकपाशुबन्धिकदार्विहोमिकाः समविषमचतुर्मण्डलचतुरश्रत्र्यश्रनानाश्रयो(?)गार्हपत्यायतनप्रभृति चित्येष्टकापर्यन्ता नियतपरिमाणा देशविशेषास्तत्र तत्रोक्तास्ते च विमातव्या इति च तद्धि मानं प्रति साधनभूतरज्ज्वादीनां साधनभूतस्यैतावती रज्जुरेतावती क्षेत्रस्य करणीति स्वरूपमात्रेण ज्ञातुमशक्यत्वात्तत्प्रतिपादनमवश्यं कर्तव्यमिति यज्ञव्याख्यानानन्तरं विहारयोगव्याख्या क्रियते ॥

विहार इति ॥ विहारो विहरणं योगस्तत्साधनम् । विहाराणां योगा विहारयोगास्तान्व्याख्यास्यामः प्रतिपा-

दयिष्यामः। विपूर्वो हरतिः क्रीडाप्रज्वलनबन्धनसंवरणवि-मानाद्यनेकार्थस्तत्क्रियाविशेषसम्बन्धादेव देशादिषु तत्र तत्रार्थे विहारव्यपदेशः। अत्र तु विमानवाची युजिश्च द्विविधः। समाधिवाची सम्बन्धवाची च। अत्र तु समाधि-वाची वेद्यादेः। सम्यगवस्थानं समाधिः। ससमाधिरित्यत्र वक्ष्यते। युज्यन्ते एभिरिति योगाः। विहरणोपायभूतरज्ज्वा-दयः। पृष्ठ्यान्तयोरित्यादिना विमातव्यस्य वेद्यादिक्षे-त्रस्य श्रोण्यंसानां विविधसम्पादनावच्छेदो विहरणं तत्सा धनभूतरज्ज्वादयो विहारभूतास्तान्व्याख्यास्यामः। व्या-ख्यानं नाम सति सन्देहे बलवता हेतुनोपपाद्य निवरणम्। यथा समचतुरश्रानुपपदत्वाच्छन्दस्य मानार्थेषु यथाकामी-शब्दार्थस्य विशयित्वात्थेवमादिकम्॥

End:

एकविंशोऽग्निर्भवतीत्यश्वमेधे विज्ञायते। तत्र पुरुषाभ्यासो नारत्निशादेशानां सङ्ख्यासंयोगा-त्सङ्ख्यासंयोगात्॥

एक॥ प्रकृतौ सप्तविधौ वाचेति सप्तसङ्ख्यापृथक्त्व-निवेशिनी समानजातीयेषु पुरुषेष्वसंयुक्तः नारत्न्यादिषु॥

अरत्निप्रादेशास्ता अरत्निना दक्षिणत इत्यादिवाक्येन स्वरूपमात्रेण विहितानर्थसङ्ख्यया। अतः प्रकृतौ पुरुषा-णामेव सङ्ख्यासंयोगात्॥

अश्वमेधेऽपि॥ एकविंशाग्नौ पुरुषाणामेव सङ्ख्यासं-योगो युक्त इति। अरत्निप्रादेशास्त्वनभ्यस्ता भवेयुः। पुरु-

षाभ्यासादनन्तरं अरत्निना दक्षिणत इति कुर्यादित्यर्थः ।
एतदुक्तं भवति। त्रिस्तावेकविंशप्रकारादयविघेः-(?)स्ताव
एकविंशोऽग्निर्ब्राह्मणदर्शनात् । द्वादश दश वास्यां द्विरुक्तिः
प्रभ(श्न)समाप्तिद्योतनार्था ॥

Colophon :

इति करविन्दस्वामिकृतो शुल्बटीकायां
षष्ठः पटलः ॥

Subject : Āpastambaśrautasūtra Vyākhyā—a commentary on Āpastamba's Śulbasūtras only. (1-21 Khaṇḍas) 1-6 Paṭalas of the 30th Praśna.

Remarks :—The Ms. is in a very good condition. Though this and the following four Mss. of Śulbasūtravyākhyā give only the Paṭala division of the text and of the commentary, the relation between the Paṭalas and Khaṇḍas of these Sūtras may be noted down, as follows :—

1st	Paṭala	=	1–3	Khaṇḍas.
2nd	,,	=	4—7	,,
3rd	,,	=	1-10	,,
4th	,,	=	11-14	,,
5th	,,	=	15-17	,,
6th	,,	=	18-21	,,

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2054. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

J. L. Collection No. 216. Substance—Paper. Size—9½×4 inches. Sheets—65 (sheets—17-66; 1-16, 19 and 20, 27-44 are missing). Lines—10 to a Page. Script—Devanāgarī.

No. of Granthas—1500. Author—Karavindasvāmin. Śulba sūtra Vyākhyā—incomplete.

Beginning:

(समचतुरश्रं दीर्घचतुरश्रं॰ यथायोगमुपदध्यात् ॥ समचतुरश्रं द्विधा कृत्वा तस्यैकस्मिन्भागे + शेषस्य समच)तुरश्रकरणीं समां पार्श्वमानीं तावतीमुक्त[म] या तिर्यङ्मान्या समचतुरश्रं कृत्वा तत्र शेषं विभज्य तस्य शेषस्य यदधिकं स्यात् तद्यथायोगमुपदध्यात्। अधिकस्य यथा(वि)भागे कृते भागा एकैकशो वा संहृत्य वा भागान्तरस्योपरि निधीयमानास्तद्विस्तारं व्याप्यान्योन्यसम्पृक्तास्तद्दीर्घं सम्पादयन्ति । तथा विभज्य सर्वशेषं भागान्तरस्योपरि निदध्यादिति ।

अयमर्थः ॥ समचतुरश्रं दीर्घचतुरश्रं चिकीर्षन् क्रियमाणस्य दीर्घस्य चिकीर्षितविस्तारप्रमाणया तिर्यङ्मान्या समचतुर(श्रमेकतोऽपच्छि)द्य शिष्टस्य पार्श्वमानीं तावतीं कृत्वा, तदधिकमेकधाऽनेकधा वा(भागं विभज्य ते) सर्वे भागा दीर्घ(चतुरश्रं यथा सम्पा)दयन्ति तथा सर्वशेषं भागान्तरस्योपर्युपदध्यात् ॥

End:

विज्ञायते च कङ्कचितं शीर्षण्वन्तं + यथाप्रकृत्यात्मविकारात् ॥

किञ्च विज्ञायते च इदं – कञ्च कङ्कचितं शीर्षण्वन्तं चिन्वीतेति श्रूयते । यदि बोधकप्राप्ता कङ्के शिरो विधत्ते तत्कथं ब्रूयाद्ब्राह्मणं कङ्कचितं शीर्षण्वन्तमिति ब्रूयात्

ए(वे)त्यर्थः । तस्मादशिरस्कः श्येनः कङ्के शिरोविधानात् तथा वयोमात्रसादृश्यप्रकृते प्राप्ते श्येनप्राप्तिविधानसामर्थ्यादेव श्येने शिरोऽप्यस्तीति गम्यते । तत्रिवृते अग्ने शिर इत्यादिशिरस्युपधानदर्शनाच्च । अतस्तयोर्विकल्प इति मत्वा नोवा शब्दं ब्रूते । तत्र कङ्कश्येनोलज इति सङ्कल्पमात्रभेदः नाकारे दाक्षायणयज्ञादिवत् । अशिरस्कः श्येन इत्युच्यते प्रकृतौ वक्रौ विकारात्प्रकृतिवदेव पक्षौ वक्रौ पुच्छात्सन्नतं सक्रपक्षौ व्यस्तपुच्छ इति विकारश्रवणात् आत्मा तु यथा प्रकृत्या यद्वा यथाप्रकृति यदिकृतं (अविकृतः) समचतुरश्रः चतुः पुरुष इत्यर्थः अ(विकारं न विकारं श्रूयते ॥)

Colophon : Sheet No. 59.

इति करविन्दस्वामिकृतायां शुल्ब(प्र)दीपिकायां
पञ्चमः पटलः ॥

Subject : Āpastambaśrauta Sūtra Vyākhyā—a commentary on Śulba Sūtras only. 1-6 Paṭalas. (3-21 Khaṇḍas). This commentary is also known as Āpastambaśulba pradīpikā.

Remarks:—The Ms. is in a decaying condition. This Ms. begins with the commentary on the sixteenth Sūtra of the first Paṭala and ends abruptly in the middle of that on the last twelfth Sūtra of the sixth Paṭala. It is full of scriptorial errors.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2055. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3851. Page 15. Right column.

Substance—Paper. Size—11½ × 5 inches. Sheets—50. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1150. Author—Kapardisvāmin. Śulbasūtravyākhyā only.

Beginning :

श्रीगणेशाय नमः ॥

उक्ता यज्ञास्तेषामायतनानि नियतप्रमाणानि नियतदेशानि तेषामायामविस्तारान्वक्तुकाम आह ॥

विहारयोगान्व्याख्यास्यामः ॥ विह्रियन्तेऽस्मिन्नग्नय इति विहाराः प्राग्वंशादयः गार्हपत्यादयश्च ॥ युज्यतेऽनेनेति योगो रज्जुविशेषः । विहाराणां योगो विहारयोगः । विहारसम्पादनार्थान् रज्जुविशेषान् व्याख्यास्यामः प्रतिपादयामः । अथवा आयामादीनां विहरणमेव विहारस्तेषां योगो विहारयोगः सम्यक्सम्पादनमित्यर्थः । योगा इति बहुवचनं बहुव्रीहिः(?) प्रकारैर्दर्शयितुं, दर्शनञ्च प्राधान्यप्रतिपत्त्यर्थम् । यथा रथादयो न नियताङ्गप्रमाणा एकस्मिन्नङ्गेऽपि मात्रया हीयमाने सम्यङ्न गच्छन्ति, एवमग्न्यायतनादीन्यपि मात्रया हि(ही)नानि साधनभावं न गच्छन्ति । तस्माद्यत्नेन सम्पादयनीयानि । सर्वत्र विज्ञायत इति श्रुतीनामुपन्यासात्सर्वथा आयामादय उक्तैरेव मार्गैः सम्यक्सम्पादनीयाः । आयतमानां भ्रेषे च प्रायश्चित्तेन भवितव्यम् । अमुमेवार्थं पृथग्दर्शयितुं शुल्वान्तरे 'अथातः' शब्दौ प्रयुक्तौ—'अथातो विहारयोगा' निति । आदितस्तावदिदं ग्रहणं वक्तव्यमनेनाचार्येण नोक्तं कल्पान्तरतो ग्राह्यम् ॥

End :

॥ एकविंशोऽग्निर्भवतीत्यश्वमेधे विज्ञायते ॥
गतमेतत् ॥ तत्र पुरुषाभ्यासो नारत्निप्रादेशानां ॥
कुतः । सङ्ख्यायोगात् ॥ एकविंश इति । ननु सप्तविध
इत्यत्रापि सङ्ख्येव विधीयते । वाक्यान्तरेण तत्रारत्निप्रा-
देशा निविशन्ते । न तत्र सप्तसङ्ख्यासंयोगः । पुरुषा-
भ्यास एव नारत्निप्रादेशानाम् । तत्र श्लोकः :—
'विधे नरः...प्रोक्तं त्रिस्तावति विभावसो ।
एकविंशे ततो न्यूनं तिलानाञ्चैव सप्तभिः ॥'
द्विकर्किर्मङ्गलार्थो ॥

Colophon :

षष्ठः पटलः ॥

इत्यापस्तम्बीयशुल्बभाष्यं कपर्दिस्वामिकृतं सम्पूर्णम् ॥
जयसंवत्सर आश्वी(श्वयु)जशुक्लचतुर्थीचन्द्रवारे सम्पूर्णम् ॥

Subject : Apastambaśrautasūtravyākhyā—a commentary on Śublasūtras only. 1—6 Paṭalas of the 30th Praśna.

Remarks—The Ms. is in a very good condition. The Ms. is dated Monday—fourth day after the New Moon—in Āśvayuja month in Jaya year which corresponds to Śaka 1756 or 1834 A. D.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2056. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9160 a. Page 16. Left column.

Substance—Palm leaf. Size—16 × 1¼ inches. Leaves—66 (1-66). Lines—5 or 6 to a Page. Script—Grantha. No.

of Granthas—1100. Author—Sundararāja. Śulbasūtra-vyākhyā only.

Beginning:

श्रीमहागणपतये नमः ॥

आपस्तम्बेन योऽयं व्यरचि भगवता शुल्बसंज्ञो गभीरः
प्रश्नोऽर्थस्त(र्थन्त)स्य भाष्यप्रभृतिषु कथितं वीक्ष्य कृत्स्नं प्रयोगम् ।
संक्षिप्योद्बोधनार्थं कुशिककुलनिधेर्माधवार्यस्य यज्वः
पुत्रः शुल्बप्रदीपं विवरणमधुना सुन्दरो निर्मिमीते ॥

सूत्रम् ॥ विहारयोगान्व्याख्यास्यामः ॥

टीका ॥ विहारो विहरणम् । चतुरश्रादिरूपेण भूमेः करणम् । तस्य योगा उपायाः ॥

End:

सूत्रम् ॥ एकविंशो भवतीत्यश्वमेधे विज्ञायते ॥

टीका ॥ शाखान्तरे एकविंशतिपुरुषपरिमाणमित्ये-कविंशतिकः स्तोमे तद्विधिः पञ्चदशावर्धे इत्यत्रोपाधेः प्रायिकत्वादस्तोमेऽपि ॥

सूत्रम् ॥ तत्र पुरुषाभ्यासो नारत्निप्रादेशानां सङ्ख्यासंयोगात्सङ्ख्यासंयोगात् ॥

टीका ॥ अस्मिन्पक्षेऽर्धद्वाविंशाः ॥ पुरुषाग्निः । तत्र द्वे शते तिस्रश्चाङ्गुलयः । षट् च तिलाः पुरुषस्थानीयो वे-णुस्तस्य चतुर्थपञ्चमषष्ठ....दशमाणूकारत्निर्वस्थप्रादेशा अवगन्तव्याः ॥ अरत्निप्रादेशाभावेऽपीति पक्षद्वयेऽप्येक-विंशतिरेव पुरुषाः । श्रीमद्रामायणेऽप्यष्टादशपुरुषत्वमश्वा-मेधाग्नेर्लक्ष्यते ॥ श्लोकः :—

'स चिन्त्यो राजसिंहस्य सञ्चितः कुशलैर्द्विजैः ।
गरुडो रुक्मपक्षो वै त्रिगुणोऽष्टादशात्मकः ॥'

स तु शाखान्तरेण षड्विधस्यापि प्रकृतित्वदर्शनात् तन्निरस्तावोऽवगन्तव्यः ॥ उक्तं हि षड्विधस्यापि प्रकृतित्वं बोधायनेन—'षड्विधं वा सप्तविधं वा द्वादशविधं वा चेष्यमाण' इत्यत्र । त्रयोदशविधांस्तानग्नींश्चित्वाऽश्वमेधमारभते ततः परमग्निं चित्वा ततो द्वाविंशत्यादिविधमेव चिन्वीत । न तु पूर्वविधं न ज्यायांसं चित्वा कनीयांसं चिन्वीतेति । अथ यो द्वाविंशतिविधादूर्ध्वमपि विधामभ्यस्य ततः परमश्वमेधमारभते यथा त्रिंशद्विधान्ते तस्याप्यश्वमेधाग्निस्त्रिस्ताव एकविंशो वा तस्य प्रकारान्तराभावात् । ततः परन्तु पूर्वकृतादारभ्यैकत्रिंशादिविधमेव चिन्वीत पूर्वेषां कृतत्वात् । व्यञ्जितञ्चैतद्बोधायनेन । अश्वमेधं प्राप्तश्चेदाहरेत् अत ऊधा(र्ध्वं?)मभ्यसेत् नेतरदाह्रीयेतातीतश्चेदाहरेदाहृत्य कृतान्तादेव प्रत्याददीतेति सिद्धम् ॥

Colophon:

इति सुन्दरराजीये शुल्बविवरणे शुल्बप्रदीपे
षष्ठः पटलः ॥

विजयनामसंवत्सर आषाढशुद्धपञ्चम्यामापस्तम्बशुल्बव्याख्यानं
सम्पूर्णम् ॥

श्रीगुरुभ्यो नमः ॥ श्रीयज्ञेश्वराय नमः ॥

सुन्दरराजबुधेन्द्रो व्याचख्यावग्निसूत्रषट्पटलीम् ।
वेङ्कटपतिरलिखत्तामरुणाचलदीक्षितात्मजस्सुदेऽयो ॥

Subject: Āpastambaśruatasūtravyākhyā, otherwise known as Śulba Pradīpa—a commentary on Śulbasūtras or Agnisūtras. 1—6 Paṭalas of the 30th Praśna.

Remarks:— The Ms. is in a very good condition. The other work contained herein is बोधायनशुल्बसूत्रदीपिका by Dvārakanātha yajvan.

The author of this commentary is Sundararāja, son of Mādhavārya yajvan of Kuśika family. The scribe of this Ms. is Veṅkaṭapati, who copied it down to please the son of one Aruṇācala Dīkṣit.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2057. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9172 (j). Page 25. Right column. Substance—Palm Leaf. Size—16 × 1½ inches. Leaves—26 (86-111). Lines—8 to 10 to a Page. Script—Grantha. No. of Granthas—1100. Author—Sundararāja. Complete.

Beginning, end, colophon and subject—Same as No. 2056.

Remarks:—The Ms. is in a decaying condition. Some leaves are broken out and some are rat-eaten. Dr. Burnell observes about this Ms. on page 25 b as follows:—

"(This Ms.)—133 leaves—(contains) Āpastamba Cayana prayoga and extracts from Sundararāja's commentary on the Śūlba Sūtra. (It is) written about 1700".

As the leaves of this Ms. had originally been ill-arranged, Dr. Burnell could not have traced out its full contents. The leaves are now fully arranged with great care and labour, as the following table of the contents and the number of leaves in this Ms. will show:—

1	आपस्तम्बसूत्रप्रयोगवृत्तिः ॥	LL.	1—42
2	नक्षत्रेष्टिप्रयोगः ॥	,,	42—57
3	प्रकीर्णकारिकाशतकम् ॥	,,	58—61
4	मित्रविन्देष्टिप्रयोगः ॥	,,	62 & 63
5	आपस्तम्बसूत्रप्रयोगवृत्तिः ॥	,,	63—72
6	मृगारेष्टिप्रयोगः ॥	,,	72—76
7	पवित्रेष्टिप्रयोगः ॥	,,	76—78
8	पौण्डरीकप्रयोगः and कारिका ॥	,,	78—80
9	सर्वतोमुखप्रयोगः ॥	,,	80—86
10	आपस्तम्बशुल्बप्रदीपः ॥	,,	86—111
11	जातकफलवर्णनम् ॥	,,	1—18
12	Fragments(?)	,,	4

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2058. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3744. Page 18. Right column. Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{3}{8}$ inches. Sheets—347. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas —5000. Author—Bhavasvāmin. First Nineteen Praśnas.

Beginning:

श्रीगणेशाय नमः ॥

ब्राह्मणानां बहुत्वादेकैकस्यां शाखायां परिसमाप्तत्वा-
दुर्थस्य च दुर्बोधत्वादसार्वज्ञजन्यत्वाच्च संहृत्य विवरणार्थं
सुखं बुध्वा कर्माण्यनुष्ठाय फलं सर्वे प्राप्नुयुरिति कल्प

आरब्ध आचार्येण। वाक्यसम्बन्धश्च गर्भाधानादिसंस्कारैः संस्कृतोऽधीत्य वेदान्यायतः कृतदार आहिताग्निरामावास्येनेति चोदितस्य कर्मणोऽधिकारी। तानि च कर्माणि नानाविधानि। तत्र दर्शपूर्णमासाग्निहोत्रज्योतिष्टोमप्रवर्ग्याण्यपूर्वाणि। तत्र दर्शपूर्णमासविकारा इष्टयोऽग्नीषोमीयः पशुः, ज्योतिष्टोमविकारा एकाहद्वादशाहाश्च। अग्निहोत्रं न प्रकृतिः। प्रकृतं(तिः) नाम सर्वधर्माणामतिदेशकं। प्रवर्ग्याधाने कुण्डपायिनामयनेषु प्रवर्ग्यश्च न प्रकृतिः दाधिधर्मे धर्मातिदेशं केचिदिच्छन्ति परिश्रित्योभयत्र शान्ति कृत्वेति। दर्शपूर्णमासज्योतिष्टोमौ प्रकृती एव। अग्नीषोमीयद्वादशाहसंवत्सरादयः प्रकृतिविकृतयः। इष्टय एकाहाश्चोद्भिदादयो विकृतयः एव। दर्विहोमादयो न प्रकृतयो न विकृतयः। 'आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवती'ति दर्शपूर्णमासारम्भो मन्त्रक्रमान्निरपेक्षत्वादाधानादीनां साङ्गानां समस्तविधानाभावादेतदपेक्षत्वाच्चानयोर्ज्ञाने तेषां गतकल्पत्वात्। इह पौर्णमास्यादित्वेपि अमावास्यायाः प्रथममन्त्रग्रहणमन्त्रक्रमात् दाक्षा(यण)यज्ञादौ शाखाहरणाद्यारम्भस्य पौर्णमास्यामप्युपकारात् पौर्णमासीधर्मारम्भे क्वचिदप्यामावास्यस्यानुपकारादसाधारणा(ण्या?)द्यादिपदार्थस्य 'अथातो दर्शपूर्णमासौ व्याख्यास्याम' इत्यप्रतिज्ञातमारम्भादेव गम्यते इति। अथेत्यधिकारकरणं। तयोरेवारम्भाच्चाद्धितश्च कालप्रकृतेस्तस्येदमिति वा भवार्थे वा विध्यपेक्षः॥

End :

सवनीयेष्वयं विशेषः प्रतिप्रस्थातः पशू अन्तिके-स्तां पशवोऽन्तिके सन्तु अर्वाग्वा परैरविदं परोवरैस्तौ वां जुषे अर्वाग्वः परैरविदं परोवरौस्तान्वो जुषे दिवमग्राभ्यां मा लेखिष्ट ममैर्मालेखिष्ट मध्याभ्यां मध्यैर्मांहिंसिष्ट मा-हिंसिष्टंत्रिः या जुष्टामुपाकरोति ॥

* * * *

त्रिस्त्रिः प्रच्युतयोः पशुहृदये उत्तमे कुरुतात् शमितहृदयानि जिह्वा वक्षांसि तानि तानीत्यादि तानि सव्यानि दोष्ष्यैकचराणि नानापार्श्वाणि दक्षिणा श्रीरव्यु-र्धिदक्षिणानि दोंषि सव्या श्रोणिरणिमन्ति उदानांवनि-ष्टूश्वजाधनीश्चावथंतात् (?) त्रिस्त्रिः पशून्पशूनां प्रच्युतानां हृदयान्युत्तमानि पश्वोः संवदस्व पशुषु दिवं वां भस्मना प्रणेथां दिवं वः भस्मना प्रणध्वं शुचौ स्थस्त(?)मभिशोचतं शुचस्थ(?) तमभिशोचत मह्यं यजमानाय तिष्ठतं(?) तिष्ठत ॥

Colophon :

इति भवस्वामिकृते कल्पविवरणे ततौ
द्वितीयोऽध्यायः ॥ श्रीरस्तु ॥

भोसलकुलभूपछायावासिना उरगीत्युपनाम्ना लेखकेन लिखितम् ॥

Subject : Bodhāyana Śrauta sūtra vyākhyā, otherwise known as Kalpavivaraṇa, a commentary on these sūtras belonging to Black-yajur Veda. This Ms. contains the commentary on the first nineteen Praśnas only.

This Ms. adopts the division into Praśnas and Adhyāyas, as follows :—

1	दर्शपूर्णमासौ	Praśna	I		Adhyāyas	17	
2	अग्न्याधानम्	,,	II	(II)	,,	4	
3	Do.	,,	III		,,	2	
4	अग्निहोत्रम् (दशाध्यायी)	,,	IV (III)		,,	10	
5	पशुबन्धः	,,	V (IV)		,,	4	
6	चातुर्मास्यम्	,,	VI (V)		,,	7 (6)	
7	प्रवर्ग्यः	,,	VII (IX)		,,	6	
8	अग्निष्टोमः प्रातस्सवनम्	,,	VIII (VI)		,,	10	
9	,, ,,	,,	IX (VII)		,,	5	
10	,, माध्यन्दिनसवनम्	,,	X	(VIII)	,,	2	(6)
11	,, तृतीयसवनम्	,,	XI		,,	2	
12	,, यज्ञपुच्छम्	,,	XII		,,	2	
13	,, Do.	,,	XIII		,,	1	
14	अग्निचयनम्	,,	XIV (X)		,,	19	
15	वाजपेयः	,,	XV (XI)		,,	5	
16	राजसूयः	,,	XVI (XII)		,,	6	
17	काम्येष्टयः	,,	XVII (XIII)		,,	13	
18	औपानुवाक्यः	,,	XVIII (XIV)		,,	12	
19	एकादशिनी	,,	XIX (XVII)		,,	2	

Remarks:—The Ms. is in a very good condition. It is full of scriptorial errors. The nick-name of the scribe of this Ms. is Uragīti. The number of Praśnas given in the above table is based on the order of the Praśnas preserved in this Ms., while the number given within brackets is according to the Printed Volume of Bodhāyana Sūtras.

Regarding the Bodhāyana Sūtras and their commentaries

Dr. Burnell observes thus on page 20 of his Catalogue :—

"The Baudhāyanasūtra is very simple in its form ; a comparison between the Baudhāyana and Āpastamba Śulbasūtras shows very conclusively that the growth of the Sūtra style was gradual, and that the most artistic Sūtras are the latest of the period when that style prevailed.

"Unfortunately Mss. of the Baudhāyana Sūtras and commentaries are rare and all incomplete. Some such have been described by me already ("Catalogue," pp. 24 ffg.) and for others see "Notices," ii. pp. 164, 180, and 270. [See pp 184 ffg. of Bühler's Gujarat Catalogue also and pp. 8-10 of Keilhorn's Catalogue of the Mss. in the southern division of the Bombay Presidency]. The Gṛhya section is, perhaps, not to be found in S. India, in good Mss. During many years' search, I have been unable to meet with a Ms. that could be satisfactorily identified, but only with fragments of questionable authenticity. The reason of this is, that Vedic rites are now very rarely performed except in a most perfunctory manner, and that the few priests who even profess to know anything of them profess to perform rites according to rituals of which they are ignorant, in order to increase their gains. Thus the Āpastamba ritual with a few arbitrary changes serves for the Baudhāyana, Bhāradvāja, etc., rituals, which do not really exist.

"There are several commentaries on the Baudhāyanasūtras (Weber, Literaturges—chichte, P. 111) by Bhavasvāmin (see above), Anantadeva, Navahasta, Śeṣa, Dvārakānātha, and Sāyaṇa. The only Ms. of the last as yet discovered is mentioned by Keilhorn (Catalogue of Mss. in the Southern part of Bombay Presidency, p. 8); it is of great interest, as Sāyaṇa

himself says that he followed this Sūtra and it is certain to be a complete and valuable commentary."

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2059. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

J. L. Collection No. 217. Substance—Paper. Size—10⅜ × 4½ inches. Sheets—134 (1-6, 22-67, 143-224). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—2150. Author—Sāyaṇācarya. Fisrt Praśna—incomplete.

Beginning :

श्रीगणेशाय नमः हरिः ॐ

वागीशाद्यास्सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्यास्स्युस्तन्नमामि गजाननम् ॥ १ ॥
त्रयीमन्त्रत्रयीकल्पलतायां यन्निरूपितम् ।
दोहनं श्रियमादत्ते मीमांसासङ्ग्रहद्वयम् ॥ २ ॥
यस्सायणाचार्यपदाभिषिक्तः
श्रीशिङ्गणाचार्यसुताग्रगण्यः ।
प्रसन्नगम्भीरमतिस्स्फुटार्थं
बौधायनं कल्पमधो विधास्यन् ॥ ३ ॥
व्याख्याय विद्यास्थानानि पुराणादीनि साम्प्रतम् ।
व्याचष्टे सायणाचार्यः कल्पं बौधायनं सुधीः ॥ ४ ॥
पूर्वव्याख्याप्रमेयार्थाः स्पष्टा इत्यनिरूपिताः ।
अप्रबुद्धप्रबोधार्थं निरूपयति तानपि ॥ ५ ॥
अनुष्ठानविकल्पाश्च करणादौ(?) ये व्यवस्थिताः ।

सम्यक् तेऽपि निरूप्यन्ते पूर्वकल्पे यथोचितम् ॥ ६ ॥

तत्र तावद्विध्यर्थवादमन्त्रात्मना त्रिधा व्यवस्थितो वेदराशिः। तस्य च कर्मावबोधनमेवार्थः। तदधीतमेव कर्माभ्युदयहेतुः। तथा चोक्तं—'दृष्टो हि तस्यार्थः कर्मावबोधनं नाम। न च तत्राप्य(स्या)ध्ययनमात्रान्मन्त्रमनुभवन्तो(मात्राचत्रभवन्तो) याज्ञिकाः फलं समामनन्ती'ति। विधिविहितमर्थवादप्ररोचितं मन्त्रेण स्मृतमभ्युदयकारि भवतीति। ततश्च चोदितानां कर्मणां सुखावबोधाय भगवान् बोधायनः कल्पमकल्पयत्। यतो ब्राह्मणानामानन्त्यं दुरवबोधता च अतो न तैः सुखं कर्मावबोध इति कल्पसूत्राणीमात्रि(नि) प्रतिनियतशाखान्तरान(ण्यः)ञ्चीचक्रुः पूर्वाचार्याः। अत एवाध्ययनविध्याक्षिप्तमध्येतव्यत्वात्तदुपबृंहणविशेषैरुपबृंहितस्य कल्पस्य वैशद्यलाघवकात्स्न्यप्रकरणशुद्ध्यादिभिः प्रकर्षैर्युक्तस्य तत्तन्मार्गानुसारिभिः स्वानुष्ठेयकर्मावबोधनार्थमध्ययनं सिद्धम्। एतदेवाभिसन्धायोक्तं कर्मान्ते—'पञ्चतयेन कल्पमवेक्षेत छन्दसा ब्राह्मणेन प्रत्ययेन न्यायेन सिद्धिवशेने'ति। कल्प्यत इति कल्पः प्रयोगः। सोऽत्र निरूप्यत इत्ययं ग्रन्थोऽपि कल्पः।

* * * * *

तत्र प्रत्यक्षश्रुतिमूलतया हविर्यज्ञेषु सर्वेष्टिप्रकृतितया मन्त्राम्नानात्कर्मानुरोधाच्च प्रथमं दर्शपूर्णमासौ निरूपयति—आमावास्येन वेत्यादिना ॥ ननु सर्वक्रतूनामग्रयः

सकृदाहिता इत्यग्न्याधानसंस्कारादेवाग्निसिद्धिः । तत्रापि 'नक्तं गार्हपत्यमादधाति अर्धोदिते सूर्ये आहवनीयमादधाती'त्यादि तदितिकर्तव्यताविशेषादेवाहवनीयत्वादिसिद्धिः । तेनाधानमेवाग्न्युत्पादकं । ते चाग्नयः सर्वकत्वङ्गभूताः यथोपनयनसंस्कृताधीतमन्त्राः । अत एवानुष्ठानेऽप्याधानस्य प्राथम्यं नियतं तत्कृतः तदतिक्रमेण दर्शपूर्णमासयोः प्रागभिधानमिति । सत्यम्, तथापि अग्न्याधानप्रभृतीन्याह त्रैतानिकानि । दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः ॥ तन्त्रस्य तत्राम्नातत्वादिति ॥

End :

यदस्मिन्कर्मणि० ॥ अवसन्तां घृतेन स्वाहा देवेभ्य इदं । यदस्य कर्मणोत्यरीरिचं० । समर्धयित्र स्वाहा । अग्नये स्विष्टकृत इदं । प्रजापते न त्वदेतां० । स्वाहा प्रजापतय इदं ध्रौवात् । स्रुवेणोपहत्य ब्रह्म प्रतिष्ठा मनस इत्येतेनानुवाकेन प्रतिमन्त्रं जुहोति......................॥

Colophon : (Sheet No. 58.)

इति प्रथमप्रश्ने तृतीयोऽध्यायः ॥

Subject: Bodhāyana Śrautasūtra vyākhyā on 1-17 Khaṇḍas of the First Praśna.

Remarks :—The Ms. is in a decaying condition. Many sheets in the middle and end are completely eaten by white ants.

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2060. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9165. Page 19. Left column.

Substance—Palm leaf (Śrītāla). Size—16¾ × 3 inches. Leaves—285 (1-98, 49, 33, 41 and 64). Lines—14 or 15 to a Page. Script—Grantha. No. of Granthas—19,950. Author—Mahādevavājapeyin. Incomplete.

Beginning:

हरिः ॐ

स जयति कुञ्जरवदनो
देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां
राशिं नाशयति विघ्नानाम् ॥ १ ॥

इष्टेर्वृष्टिरुदेति वृष्ट्युपचयादन्नानि तेभ्यः प्रजाः
ताभ्यो यज्ञसमुद्भवः पुनरिति प्रक्रान्तचक्रक्रमः ।
अत्रामुत्रसमीहितार्थघटनाबद्धव्रतो यो जग-
ज्जन्मस्थेमलयोत्सवस्स दिशतु श्रेयांसि यज्ञेश्वरः ॥ २ ॥

वेदोदधेर्विनिर्माय योऽदात्कल्पाभिधां सुधाम् ।
विबुधेभ्यो नमस्तस्मै बोधायनमहर्षये ॥ ३ ॥

बोधायनाय मुनये मुनिसङ्घादृताङ्घ्रये ।
कामा(कर्मा(?))म्बुधिं तितीर्षूणां कल्पनौकाकृते नमः ॥ ४ ॥

अस्ति बौधायनं सूत्रमाद्यमाध्वर्यवाश्रयम् ।
अधीतिबोधाचरणप्रचारैस्ततप्रपञ्चयन् ॥ ५ ॥

भारद्वाजान्वयाम्बोधिसुधांशुस्सतां सम्मतः ।
त्रियम्बकाध्वरी लोके त्र्यध्यन्तज्ञस्समेधते ॥ ६ ॥

तदध्वर्युर्महादेववाजपेयी तदाज्ञया ।
बोधायनोक्तकर्मान्तद्वैधकल्पानुसारतः ॥ ७ ॥

वैतानिकानां यज्ञानां भवस्वामिमतानुगाम् ।
कर्पाध्वगानां सुगमां करोति श्रौतचन्द्रिकाम् ॥ ८ ॥

अत्र धर्मस्य प्रतिपाद्यत्वात्तत्स्वरूपं तत्प्रमाणं तदधिकार्यादि च निरूप्यते। 'चोदनालक्षणोऽर्थो धर्म' इति जैमिनिः। विधिप्रमाणकश्रेयस्साधनताको धर्म इत्यर्थः। कर्मजन्योऽभ्युदयनिश्श्रेयसहेतुरपूर्वाख्यात्मगुणो धर्म इति हरदत्तः। अभ्युदयः स्वर्गपशुपुत्रादिः। निश्रेयसं मोक्षः। एतदुभयविधश्रेयस्साधनं धर्म इत्यर्थः। अत्र मनुनाप्युक्तम्—

विद्वद्भिः सेवितस्सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यस्तं धर्मं व्यवस्यते ॥ इति ॥

* * * *

अथोपोद्घाते कल्पभाष्येऽत्र दर्शपूर्णमासाग्निहोत्रज्योतिष्टोमप्रवर्ग्याण्यपूर्वाणि। 'तत्र दर्शपूर्णमासविकारा इष्टयोऽग्नीषोमीयश्च पशुः, ज्योतिष्टोमविकारा एकाहाः द्वादशाहश्च, अग्निहोत्रञ्च प्रकृतिः। प्रकृतिर्नाम्ना धर्मातिदेशकः। प्रवर्ग्याधानकुण्डपायिनामयनेषु प्रवर्ग्यश्च न प्रकृतिः। दधिधर्मे धर्मातिदेशं केचिदिच्छन्ति। परिश्रुत्यो(?)-भयतश्शान्ति कृत्वेति वचनात्। दर्शपूर्णमासज्योतिष्टोमौ प्रकृतिरेव। अग्नीषोमीयद्वादशाहसांवत्सरादयः प्रकृतयो विकृतयश्च। इष्टय एकाहा उद्भिदादयो विकृतय एव। दर्विहोमादयो न प्रकृतयो न विकृतय इति' इत्युपोद्घातः॥

' आमावास्येन वा पौर्णमास्येन वा हविषा

यक्ष्यमाणो भवति स पुरस्तादेव हविरातञ्चन-मुपकल्पयत' इति ॥

अमावास्याया इदं अमावास्यायां भवं वा आमावास्यं कर्म । एवं पौर्णमासमिति । हविःपदश्च हविस्साध्यं अमावास्यापौर्णमासीसम्बन्धियागसमुदायद्वयं लक्षयति । आमावास्येन पौर्णमासेनेति पदद्वयसामानाधिकरण्यादमावास्यायां पौर्णमास्यां च सम्बन्धो भवनं विधिपूर्वकेऽनुष्ठाने सति भवति ॥

End :

अत्र सर्व एवाग्निर्याजमान इति सिद्धे निचय इति वचनमिष्टकोपधानमात्रं याजमानं नेतरदुःखासम्भरणादीत्येवमर्थं तं वा एतं यजमान एव विचिन्वीतेति तत्रैव यजमानस्य कर्तृत्वावगमादिति भावः । सर्वमेवाग्न्याधेयछन्दो यजमानमग्न्याधेये । छन्दो मन्त्रः । अत्रापि प्रधानमन्त्रमात्रं भूर्भुवो धर्मशिरः इत्यादि याजमानं नेतरदित्येतदर्थमग्न्याधेयग्रहणं उद्धरणप्रभृतिविराजक्रमोपस्थानान्तं यजमानो वदेदिति तु केशवादयः ॥

Colophon : (Leaf No. 98)

बोधायनकृतस्यासौ वृत्तिस्सूत्रस्य तायते ।
दर्शश्च पूर्णमासश्च सम्पूर्णः प्रीयतां शिवः ॥
केदं बौधायनं सूत्रं क मेऽल्पविषया मतिः ।
गुरोः कटाक्षस्तनुते वृत्तिमेवं सुबोधिनीम् ॥
हरिः ॐ ॥

Subject : Bodhāyana Śrautasūtra Vṛtti otherwise known as Subodhinī and Śrauta Candrikā. 1-6 (1-5) Praśnas,

This Ms. adopts the division of the text, as follows :—

Praśna.		Paṭalas.	Khaṇḍas.
I	दर्शपूर्णमासौ ॥	1—17	1—36
		Adhyāyas.	
II & III (II)	आधानम् ॥	1—6	1—21
IV (III)	दशाध्यायी (omitting पुनराधेय) ॥	2—7	1—16 & (the beginning of the 17th).
V (IV)	पशुबन्धः ॥	1—8	1—11 (incomplete)
VI (V)	चातुर्मास्यम् ॥	1—6	1—18 (incomplete)

Remarks:—The Ms. is old and is in good condition. It contains broad leaves of Śrītāla species. It breaks off in the commentary on the 18th Khaṇḍa of Cāturmāsya Praśna.

Regarding this author and this commentary, Dr. Burnell observes on page 19 of his Catalogue, as follows:—" The author Mahādeva states that he was Adhvaryu to one Tryambakādhvarin (of Śahaji's time 1684-1710A. D.), by whose order he composed this commentary, following the opinions of Bhavasvāmin. This commentary is exceedingly diffuse ; the Baudhāyana Karmānta and Dvaidha sūtras are discussed and quotations from the Āpastamba, Bhāradvāja and other Sūtras are frequent."

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2061. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9166 a. Page 19. Right column.

Substance—Palm leaf. Size—24¼×2¼ inches. Leaves —177) 1-73, 43, 26, 35). Lines —13-17 to a Page. Script —Grantha. No. of Granthas—19,950. Author—Mahādevavājapeyin. First six Praśnas—Incomplete.

Beginning, end, colophon and Subject—Same as No. 2066.

Remarks:—The Ms. is in good condition. The Ms. contains the following works :

1. बोधायनश्रौतसूत्रव्याख्या (सुबोधिनी) ॥
2. बोधायनगृह्यव्याख्या ॥
3. बोधायनपूर्वप्रयोगः ॥
4. बोधायनापरप्रयोगः ॥

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2062. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

J. L. Collection No. 218. Substance—Paper. Size—10×4⅜ inches. Sheets—85. Lines—7 or 8 to a Page. Script — Devanāgarī. No. of Granthas—1650. Author—Mahādevavājapeyin. Daśādhyāyī vyākhyā only.—incomplete.

Beginning:

श्रीमणिकर्णिकेश्वराय नमः ॥

आधानं सविकारं सप्रपञ्चमुक्त्वा क्रमप्राप्तमग्निहोत्रमाह ॥

पुरादित्यस्यास्तमयाद्गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्य ज्वलन्तमाहवनीयमुद्धरति सायमाहुतये पुरादित्यस्योदयाद्गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्य ज्वलन्तमाहवनीयमुद्धर-

ति प्रातराहुतय इति ॥

आदित्यस्यास्तमयात्पुरा अव्यवहितपूर्वकाले उत्सर्गेऽप-राह्णे गार्हपत्यं प्रज्वाल्येत्याश्वलायनः । गार्हपत्यमुपसमाधा-य प्रादुष्कृत्य अन्वाहार्यपचनमाहृत्य भिन्नयोनित्वपक्षे आह-रणमन्यतः अपि(वा) गार्हपत्यादिति पक्षे गार्हपत्यादेव ज्व-लन्तमाहवनीयं । अत्र ज्वलन्तमिति लटो निर्देशादुद्धरणसम-ये अभिज्वलनमपेक्षितमिति द्रष्टव्यम् । उद्धरणं नाम औ(ऊ)र्ध्वदेशेन आहवनीयायतनं प्रतिहरणं उद्धरति सायमाहुतये । उद्धरतीत्येव सिद्धे सायमाहुतय इति यो यदर्थमुद्धृतस्स तस्यैवोपकरोति नान्यस्येति ज्ञापनार्थम् । एवं प्रातराहुतय इत्यपि, तेनार्थायार्थाया(?)ग्निं प्रणयतीति सूचितं भवति । यथा चैतत्तथोक्तं 'यस्मिन्होत्राहुतं सोग्निः कर्मान्तं तस्य धारण'मित्यपवृत्ते कर्माणि लौकिकः सम्पद्यत इत्यत्र । द्वैधे तु 'अग्नीनां विहरण' इति सूत्रं बोधायनस्याधानप्रभृत्येते-ऽजस्रास्स्युरिति शालीकिरिति पक्षद्वयमुक्तं । व्याख्यात-मेवदधस्ता'दपवृत्ते कर्मणि लौकिकः सम्पद्यत' इत्यत्र । आदित्यस्योदयात्पुरा अव्यवहितपूर्वकाले एवं प्रातर्व्युष्टा-यामित्याश्वलायनः । गार्हपत्यमित्यादि स्पष्टम् ॥

End :

तदुदित्वा वाचं यच्छत्या हविष्कृत इति । तद्धविरनुमन्त्रणं उदित्वा उक्त्वा वाचं यच्छति आ हवि-ष्कृतः हविष्करणावधि तण्डुलप्रक्षालननिनयनपर्यन्तं प्रस्क-न्दनपर्यन्तं वा । ननु ब्रह्मन्नपः प्रणेष्यामि यजमानवाचं यच्छेति सम्प्रेषणैव यजमानस्य वा(क्)नियमारम्भात् पुन-

रत्न विधानं व्यर्थमिति चेत्; न! निरूप्यमाणहविरनुम-न्त्रणमन्त्रेण वाङ्नियमस्य विच्छेदाशङ्का स्यात् तन्मा-भूत्, पुनरप्याहविष्कृतो वाग्यमो यथा स्यादित्येवमर्थं तस्य विधानादिति। हविष्कृता वाचं विसृज्य यज्ञं यागेन यु(न)क्ति कस्त्वा युनक्ति स त्वा युनक्तीतीति हविष्कृता हविष्करणेन तण्डुलप्रक्षालननिनये(यने)न वा प्रस्कन्दनेन वा वाचं विसृज्य, यज्ञं योगेन, युज्यतेऽनेनेति योगो मन्त्रः तेन युनक्ति मन्त्रस्य जप एव योगः काले कपालानि युनक्ति यानि धर्मे कपालान्युपचिन्वन्ति वेध-सः पुष्टण(पूष्ण)स्तान्यपि व्रत इन्द्रवायुयुं(यू) गत्का(युङ्क्ता)-मितीति ॥ कालेऽध्वर्युकर्तृकस्याथैनानि योगेन युनक्ति यानि धर्मे इति विहितस्य कपालयोगस्य काले कपा-(लानि)..॥

Colophon: (Sheet No. 82).

बोधायनकृते सूत्रे दशाध्याय्यामजा(य)त ।
प्रवासोपस्थितेर्व्याख्या तया तुष्यन्तु सज्जनाः ॥

इति बोधायनसूत्रव्याख्यायां सुबोधिन्यां दशाध्याय्यां षष्ठोऽध्यायः ॥

Subject: Bodhāyana śrauta sūtra vyākhyā, otherwise known as Subodhinī, a commentary on the Daśādhyāyī—fourth (third) Praśna—of the Bodhāyanaśrautasūtras.

The contents of this Ms. are as follows:—

1	अग्निहोत्रम्	Adhyāya	2	Sheet	1
2	अग्न्युपस्थानम्	,,	3	,,	30
3	पिण्डपितृयज्ञः	,,	4	,,	40

4	आग्रयणम्	Adhyāya	5	Sheet	57
5	प्रवासोपस्थितिः	,,	6	,,	72
6	अग्निभ्यः प्रवासः	,,	7	,,	82

Remarks:—The Ms. is in good condition.

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2063. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9178 (c). Page 24. Right column. Substance—Palm leaf. Size—16 × $2\frac{1}{2}$ inches. Leaves—143. Lines —10 or 11 to a Page. Script—Grantha. No. of Granthas—4400. Author—Bālādīkṣita. Agniṣṭomavyākhyā—incomplete.

Beginning:

॥ बोधायनाग्निष्टोमचन्द्रिका ॥

श्रीमहागणपतये नमः ॥

सौन्दर्योद्गारसीमा सरसगुणगणोत्सेधसङ्गाभिरामा
पार्श्वद्वन्द्वस्थरामा परशिवहृदयाम्भोजसूर्यांशुभूमा ।
सद्यस्सन्दिष्टकामा भृततातिषु दितेः पुत्रसङ्केति भीमा
पायात्सा देवता मा सकलसुरनुता देवसेनेशनामा ॥

श्रीमद्बोधायनाख्याम्बुधिगळितमहासूत्रपीयूषधारा
दत्ता यैस्संविविच्य स्फुटमिह सवने श्रीमहादेवसंज्ञैः ।
भूदेवेभ्यः प्रकामं मखशतमहितैः द्वैधकर्मान्तयुक्ता
संयुक्तोपानुवाक्याऽभवदमितगुणान्तानहं सम्प्रपद्ये ॥

तस्य विश्वपतिदीक्षितस्स्वगात्पुत्रभावमथ यस्य सन्निधेः ।

वासुदेवमखिलस्समोऽनुजः सर्वतन्त्रनिजतन्त्रतां गतः ॥

....

अग्निष्टोमेन यक्ष्यमाणो भवति ॥ उक्ता हविर्यज्ञाः। अथेदानीमग्निष्टोम आरभ्यते। ज्योतिष्टोम इति कर्मनामधेयं। तस्याग्निष्टोम इति संस्थानाम। अग्निष्टोमस्तोत्रेण समाप्यत इत्यग्निष्टोमः। एवमतिरात्रादयः। तस्य तिस्रस्संस्थाः। अग्निष्टोम उक्थ्योऽतिरात्र इति केचित्। चतस्रः षोडशिना सहेत्यन्ये। तिस्र इति कथं प्रतिपन्ना(ः)। सूत्रालिङ्गात्। सूत्रञ्च कर्मान्तं। यदग्निष्टोमस्य क्रतुकरणं तदत्यग्निष्टोमस्य यदुक्थ्यस्य तत् षोडशिवाजपेययोः यदतिरात्रस्य तदप्तोर्यामस्येति ॥

End :

'परिश्रयन्ति पूर्वां द्वारमपराञ्च'। हविर्धानस्य पूर्वापरे द्वारौ सन्निहितत्वात्। हविर्धानस्योभे द्वाराविव्यापस्तम्बः। परिश्रयन्ति पिदधाति(?)। रुद्रो वा एष यदग्निरिति ब्राह्मणं। 'अथादत्त आदित्यस्थाल्या औपशयं पात्रं तस्मिन्नेतस्य राज्ञस्तृतीयवेळां गृह्णाति य आदित्यस्थाल्यां भवति कदा च न स्तरीरसीत्यनुद्रुत्य उपयामं गृहीतोस्यादित्येभ्यस्त्वा........ ॥

Colophon : (Leaf No. 72)

इति श्रीबौधायनसूत्रव्याख्यानचन्द्रिकायां यज्ञेश्वरदीक्षितोपनामकबाळादीक्षितकृतायां अग्निष्टोमे प्रथमः प्रश्नस्समाप्तः।

श्रीसुब्रह्मण्याय नमो नमः ॥

Subject: Bodhāyana Śrauta Sūtravyākhyā otherwise known as Candrikā.—a commentary on the Agniṣṭomakalpa —8-13 (6-8) Praśnas.

Remarks:— The Ms. is in good condition. This Ms. abruptly ends in the middle of the commentary on the ninth Khaṇḍa of the eighth Praśna. The other works contained in this Ms. are:—

(१) बोधायनश्रौतसूत्रव्याख्या (अग्निचयनव्याख्या) ॥

(2) ,, (यूपैकादशिनीव्याख्या) ॥

The author of this commentary on Bodhāyanāgniṣṭomakalpa is Bālādīkṣita, otherwise known as Yajñeśvara, son of Subrahmaṇya and grandson of Viśvapati of Śāhajirājapura or the modern Tiruviśanalloor near Kumbakonam. According to the introductory verses given above, this Viśvapati is said to be the elder brother of Vāsudeva dīkṣita (the author of Bodhāyanāgnicayanavyākhyā—No. 2064)and the son of Adhvaryu Mahādevavājapeyin (the author of Bodhāyanaśrautasūtravṛtti—Subodhinī. No. 2060), who flourished during the reign of king Śāhaji in Tanjore between 1684—1710 A. D.

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2064. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9178 (a). Page 25. Right column. Substance—Palm leaf. Size—16×2½ inches. Leaves—124 (1-124). Lines—10 to 15 to a Page. Script—Grantha. No. of Granthas—4500. Author—Vāsudevadīkṣita. Agnicayanavyākhyā—complete.

Beginning:

हरिः ॐ ॥ श्रीगणेशाय नमः ॥

बोधायनं प्रणम्याग्नेः कल्पसूत्रं यथामति ।
द्वैधकर्मान्तसूत्राभ्यां सह व्याख्यास्यतेतराम् ॥

अग्नेरनारभ्याधीतत्वादनारभ्याधीतानाञ्च प्रकृतिगामित्वाद्दीक्षादिसम्बन्धाद्दर्शपूर्णमासयोश्च दीक्षाद्यभावात् ज्योतिष्टोमाङ्गताऽध्यवसीयते । दीक्षादिभिर्जो(र्हि ज्यो)तिष्टोमाङ्गं प्रसिद्धम् । तत्सम्बन्धोऽग्नौ भवति । श्रूयते हि 'दीक्षित उक्थ्यं विभक्त्यनूपसदमग्निश्चिनोती'त्यादि । ननु(हि) ज्योतिष्टोमाङ्गमग्निः अपि तु स्वतन्त्र एव । तथाहि—दीक्षादेः सोमाङ्गस्य सतः नाग्नौ सम्बन्धोऽस्ति येन सोमाङ्गव्यतिषङ्गात् सोमाङ्गता अग्नेः प्रसज्येत । अग्न्यङ्गत्वेनैव हि दीक्षादेः श्रवणम् ॥

* * *

अत एव अग्निकल्पसूत्रे आचार्यैरुक्तं 'षड्विधं वा सप्तविधं वे'त्यादि । इत्यास्तां तावत् ॥ श्रीगणेशाय नमः ॥ ऋजुपक्षो वक्रपक्षश्चेति श्येनाचित् द्विविधः । वक्रपक्षोऽपि द्विविधः पञ्चपत्रं षट्पत्रश्चेति । तत्र ऋजुपक्षः पञ्चपत्रवक्रपक्षश्च श्येनचिदग्निः केशवस्वामिविष्णुवृद्धगोपालादिभिः प्रपञ्चितः इति षट्पत्रश्येनचितमधिकृत्याऽग्निकल्पसूत्रं द्वैधकर्मान्तसूत्राभ्यां सह व्याख्यास्यामः—

उखाः सम्भरिष्यन्नुपकल्पयतेऽश्वञ्च गर्दभञ्च तयोरेव रशने मौञ्ज्यौ वा कुशमय्यौ वा + कुशलमिति ॥

अग्निसम्भरणयोग्या स्थाल्य उखाः । ताः निर्वर्तयिष्यन् अश्वादीनि सज्जयति । अश्वगर्दभौ प्रसिद्धौ । तयोः

अश्वगर्दभयोः रशने बन्धनार्थे रज्जू । रज्जुनिर्मिते कुश-
निर्मिते वा ॥

End:

॥ नाग्निश्चित्वा रामामुपेयात् ॥ रामा शूद्रस्त्री तां अग्निचिन्नोपेयात् चतुर्षु वर्णेषु ब्राह्मणस्य विवाहविधानात् शूद्रागमने प्राप्ते निषेधोऽयम् ॥

* * * *

अपि च तद्व्रतश्रुतिर्भवति । संवत्सरसम्मितायै व्रतचर्येति ॥

Colophon:

इति श्रीमत्सन्ततप्रवर्त्यमानश्येनकूर्मसाररथचक्राकाराद्यनेकगुणविराजमानमहाग्निविलसत्प्रौढानेकमहाध्वरस्य श्री(शाह)शरभतुल[सी]जाख्यचोलमहीपालत्रयामात्यधुरन्धरस्य पदवाक्यप्रमाणपारावारीणस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण बाल्य एव तद्दयानिर्वर्तितसाग्निचित्यानेकाध्वरेण तदध्वर्युणा महादेववाजपेययाजिसुतेन अन्नपूर्णागर्भजातेन वासुदेवदीक्षितविदुषा विरचिते महाग्निसर्वस्वे एकोनविंशोऽध्याय: ॥

ஸ்ரீ ஸம்வெவு ருத்ரஉா விசுவாவசு வருஷ ஆடி மீ
எழுதி முடிஞ்சுது.

Subject: Bodhāyanaśrautasūtravyākhyā—otherwise known as Mahāgnisarvasva—a commentary on the first Nineteen Adhyāyas of the fourteenth (tenth) Praśna (Agnicayanakalpa) of the Bodhāyanaśrautasūtras.

Remarks:—The Ms. is in good condition. The other works contained in this Ms. are:—

(1) बोधायनश्रौतसूत्रव्याख्या (यूपैकादशिनीव्याख्या) ॥

(2) बोधायनश्रौतसूत्रव्याख्या (अग्निष्टोमव्याख्या) ॥

The author of this commentary is Vāsudevadīkṣita, son of Adhvaryu Mahādevavājapeyin and Annapūrṇā. This Mahadevavājapeyin is said to have successfully discharged the duty of the Adhvaryu in the sacrifices performed by Ānandarāyamakhin the well-known Minister of Kings Serfoji I and Tulajā I (Tukkoji) of Tanjore between 1711 & 35 A. D. He is also believed to have been the Adhvaryu in the sacrifice performed by Tryambakarāyamakhin of Sāhaji's time between 1684-1710 A. D. [See introductory verses in No. 2060].

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2065. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9178 (b). Substance—Palm leaf. Size—16 × 2½ inches. Leaves—12 (124-135). Lines—10 to 12 to a Page. Script—Grantha. No. of Granthas—400. Author—Vāsudevadīkṣita. Yūpaikādaśinī Vyākhyā only.

Beginning:

अथ यूपैकादशिनीप्रयोगो निरूप्यते । प्रायेण सर्वेषु सोमक्रतुषु एकयूपेन यूपैकादशिनी विकल्प्यते । एकयूपो वैकादशिनी वा अन्येषां यज्ञानां यूपा भवन्ति । 'एकविंशान्यश्वमेधस्ये'ति श्रुतेः । सर्वस्तोमातिरात्रो तु नित्या । साग्निचित्येष्वपि क्रतुषु विकल्प एव । यद्यपि तत्र एकादशरशना आदाय यूपमभ्येतीत्युक्तं कल्पसूत्रे तथापि तत्र यूपमिति जातावेकवचनम् ॥

इयञ्च यूपैकादशिनी कल्पसूत्रे ततिप्रश्ने अतिरात्रानन्तरं आचार्यैः उपनिबद्धा तत्सूत्रं द्वैधकर्मान्तसूत्राभ्यां सह सङ्कल्य्य व्याख्यास्यामः ॥—

एकादशिनीं करिष्यन् यूपाहुतिं हुत्वा तान्दिशमेति यत्न त्रयोदशयूपान्वेत्स्यन्मन्यते ॥ एकादशपरिमाणं अस्या यूपावलेः एकादशिनी। 'शन्शतोर्डिनि'रिति डिनिप्रत्ययः। नान्तत्वात् ङीप्। ताः करिष्यन् यूपाहुतिकाले तन्त्रेण यूपाहुतिं हुत्वा यस्यान्दिशि त्रयोदश यूपान्वेत्स्यन् प्राप्स्यन् मन्यते तान्दिशमेति गच्छति ॥

End:

सन्तिष्ठते पात्नीवतः ॥ सन्तिष्ठत इति वचनात् सर्वसंस्था गम्यते। अतो दशतयोत्सर्गो न भवति। ब्राह्मणतर्पणान्ते पात्नीवते संस्थिते अनुबन्ध्यापशुपुरोडाशादि प्रतिपद्यते ॥

* * * * *

सर्वत्र पदार्धेन परिलेखनं। एवं सति सर्वे यूपावटाः रथाक्षान्तराला भवन्ति अर्धमन्तर्वे(द्य)र्धं बहिर्वेदीति च सर्वेषां सिद्धं भवति ॥

Colophon:

इति श्रीमत्सन्ततसन्तन्यमानद्वयेनकूर्मसाररथचक्राकाराद्यनेकगुणाविराजमानमहाग्निविलसत्प्रौढानेकमहाध्वरस्य श्री(शाह)शरभतुलजाख्यचोलमहीपालवयामात्यधुरन्धरस्य पदवाक्यप्रमाणपारावारीणस्य श्रीमतः आनन्दरायविद्वत्सार्वभौमस्य पत्नपुत्रपौत्र-

ध्येण बाल्य एव तद्दयानिर्वर्तितसाग्निचित्यानेकाध्वरेण तदध्वर्युणा महादेववाजपेययाजिसुतेन वासुदेवदीक्षितविदुषा विरचिते महाग्निसर्वस्वे यूपैकादशिनीव्याख्या सम्पूर्णा ॥

Subject: Bodhāyana Śrauta Sūtra Vyākhyā — otherwise known as Mahāgnisarvasva. This Ms. contains the commentary on Yūpaikādaśinī (17th Praśna) only.

Remarks:—The Ms. is in good condition. The other works contained in this Ms. are:

(1) बोधायनश्रौतसूत्रव्याख्या (अग्निचयनव्याख्या) ॥

(2) „ (अग्निष्टोमव्याख्या) ।

This work is not, however, noticed by Dr. Burnell under this Ms.

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2066. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3748. Page 20. Left column. Substance—Paper. Size—9¼ × 4¼ inches. Sheets—95. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Veṅkaṭeśādhvarin. Karmānta Vyākhyā only.

Beginning:

श्रीसीतारामाभ्यां नमः । श्रीनृसिंहाय नमः ॥

श्रीगणेशाय नमः ॥

उमापतिं रमानाथं बोधायनमुनीश्वरम् ।

गोविन्दाध्वरिणं तातं वन्दे सर्वार्थसिद्धये ॥

कल्पाद्यनुक्तार्थविशेषरूप-
प्रवृत्तकर्मान्तनिबन्धदीपकम् ।
मीमांसया मांसलितञ्च वार्तिकं
श्रीवेङ्कटेशाध्वरिणा वितन्यते ॥

अथ दर्शपूर्णमासयोराग्नीध्रप्रयोगः ॥

आग्नीध्रः । त्वामहं वृण इति श्रुत्वा । वृतोऽस्मि कर्म करिष्यामि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोर्हस्ताभ्यामाददे । शम्यामादाय । इषमावदो(दू)र्जमामावदद्युमद्वदत वयꣳ सङ्घातं जेष्म । दृषदुपले समाहन्ति द्विरेषादि सकृदुपलायां त्रिः सञ्चारयन्नवकृत्वः सम्पातयति । यत्र समाप्तिस्तत्रोपक्रमः । अविदहन्तः श्रपयतेति श्रुत्वा । हवीꣳषि सुशृतानि करोति । तमसो मामेष्ठ इति श्रुत्वा । अरुरुस्ते दिवं मास्कान् न्युप्तमञ्जलिनाभिगृह्णाति । अवबाढꣳरक्षः । न्युप्तं द्वितीयमञ्जलिना गृह्णाति । अववाढोऽघशꣳसः । न्युप्तं तृतीयमञ्जलिनाभिगृह्णाति ॥

End:

सकृदग्निं प्राञ्चम् । अग्नीद्गमयेति श्रुत्वा । त्रिरञ्ज-

लिना विष्वञ्चं प्रस्तरमूर्ध्वमुद्यौति । रोहितेन त्वाग्निर्देव-
तां गमयतु । हरिभ्यां त्वेन्द्रो देवतां गमयत्वेतशेन (?)
त्वा सूर्यो देवतां गमयतु । अनुप्रहरेति अध्वर्युमाह ।
श्रुवासीति श्रुत्वा । अध्वर्युमाह । संवदस्व । अगानग्नीदिति
श्रुत्वा । अगन् । श्रावयेत्युक्ते श्रौषट् । हविश्शेषभ-
क्षणानन्तरं स्फ्यमाज्यस्थालीमुदकमण्डलुञ्चादाय । अप-
रेण गार्हपत्यमूर्ध्वज्ञुरासीनः पत्नीं संया(ज?)यिष्यति ।
षडा अविद्विण्डा(?)वदाने उपहूयमानाज्येडामन्वारभते ।
होतारमन्वारभ्य अयाश्चेत्यादि प्रायश्चित्तानि हुत्वा
ॐचम इत्यादि संस्थाजपान्तं कुर्यात् ॥

Colophon :

इत्याग्नीध्रप्रयोगः ॥

Subject : Āpastambadarśapūrṇamāsāgnīdhraprayoga.

Remarks :—The Ms. is in good condition.

॥ आपस्तम्बदर्शपूर्णमासाग्नीध्रप्रयोगः ॥

2209. ĀPASTAMBADARŚAPŪRṆAMĀSĀ-GNĪDHRAPRAYOGAḤ.

Burnell's Catalogue No. 3894. Page 23. Right column. Substance—Paper. Size—$11\frac{1}{8} \times 4\frac{3}{8}$ inches. Sheets—2. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—(?). A fragment only.

श्रीगणेशाय नमः ॥

आपस्तम्बदर्शपूर्णमासाग्नीध्रप्रयोगप्रारम्भः ।

दर्शपूर्णमासयोराग्नीध्रः स्नात्वा अहतं वासः परिधाय आचम्योत्तरेण विहारं प्रपद्योपविशत्यस्यामिष्ट्या-माग्नीध्रं त्वा वृणे इत्युक्ते वृतोऽस्मि करिष्यामीति ब्रूयात् । उच्चैः समाहन्तवै इत्युक्ते देवस्य त्वा सवितुः प्रसवेऽश्वि-नोर्बाहुभ्यां पूष्णोर्हस्ताभ्यामाददे इति शम्यामादाय । इषमावदूर्जमावदद्युमद्वदत वयꣳ संघातं जेष्म इति शम्य-दृषदुपले समाहन्ति । द्विर्दृषदि सकृदुपलायां नवकृत्वः स-म्पादयति । यत्र समाप्तिस्तत्र पुनरारम्भः । अविदहं द(हन्तः) अपयतेत्युक्ते हवींषि सुश्रृतानि करोति वेदेरुत्करे न्युप्य-माने अररुस्ते दिवं मास्कान् इति प्रथमे । अवबाढꣳ रक्ष इति द्वितीये निवपने । अवबाढोऽघशंसः इति तृतीये । अवबाढा यातुधाना इति चतुर्थे .... ॥

Subject: Āpastambadarśapūrṇamāsāgnīdhraprayoga—a fragment only.

Remarks :—The Ms. is in good condition.

॥ आपस्तम्बदर्शपूर्णमासहौत्रप्रयोगः ॥

2210. ĀPASTAMBADARŚAPŪRṆAMĀSA-HAUTRAPRAYOGAḤ.

Burnell's Catalogue No. 9183 j. Page 24. Left column.

Substance—Palm **leaf**. **Size**—$14\frac{1}{4} \times 1\frac{1}{4}$ **inches**. **Leaves**—15 (44-58). Lines—6 to 8 to a Page. Script—Grantha. No. of Granthas—325. Author—(?). Complete.

Beginning :

हौत्रप्रयोगो लिख्यते ॥

पुरस्तात्सामिधेनीनां होता यजमानेन वृतः । वृतोऽस्मि करिष्यामि । इत्युक्त्वा । अध्वर्युर्होतरेहीत्युक्ते आचम्य तीर्थेन प्रपद्य उत्तरत आहवनीयस्योपविश्य हृदयदेश ऊर्ध्वं प्रादेशं धारयमाणो जपति । मयि गृह्णाम्यग्रे आग्निं रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । मयि प्रजां मयि वर्चो दधाम्यरिष्टास्याम तनुवा सुवीराः । यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्यामाविवेश । तमात्मन् परिगृह्णीमहे वयं मासोऽस्मानवहाय परागात् अन्तराहवनीयमुत्करञ्च प्रतीचीनं गच्छन् जपति । कं प्रपद्ये तं प्रपद्ये यत्ते प्रजापते शरणं छन्दस्तत्प्रपद्ये यावत्ते विष्णो वेद तावत्ते करिष्यामि । नमोऽग्नय उपद्रष्ट्रे नमो वायव उपश्रोत्रे नम आदित्यायानुख्यात्रे जुष्टामद्य देवेभ्यो वाचमुद्यासं स्वधावतीं पितृभ्यः शुश्रूषेण्यां मनुष्येभ्यः प्रशास्त आत्मना प्रजया पशुभिः प्रजापतिं प्रपद्ये भयं मेऽस्तु प्राजापत्यमनुवक्ष्यामि वागार्त्विज्यं करोतु मन आर्त्विज्यं करोतु वाचं प्रपद्ये भूर्भुवःस्व इत्यन्तम् ॥

End:

यं कामयेत पशुः स्यादिति परार्चीं तस्येत्युक्तम् । पदाभ्यासप्रतिषेधस्तु विज्ञायते च इडोपहूतेति तत्पराञ्युपहूतेडेति तत्प्रतीची अध्वर्यव एव । अतोऽन्यानि कर्माणि होतुराम्नातानि भवन्ति । उपदेशादितराणीतराणि ॥ उपहूतामाज्येडां प्राश्याचम्य वेदोऽसि चित्तिरसि चिदेयकर्माणि

करुणमासि क्रियासं सनिरासि सनितासि सनेयं घृतवन्तं कु-
लायिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनम् ॥ वेदं
होता पत्न्या उपस्थे प्रास्यति । निर्द्विषन्तं निरराति नुद ।
प्रास्तं वेदं पत्नी प्रतिनिरस्यति । एवं द्विः । वेदोऽसि +
वाजिनं निर्द्विषन्तं + ति । वेदोऽसि + वाजिनम् । निर्द्विष-
न्तं + यति । तन्तुं तन्वन् ऋजसो भानुमन्विहि ज्योति-
ष्मतः पथो रक्ष धिया कृतान् । अनुल्बणं वयत जोगुवा-
मपो मनुर्भव जनया दैव्यञ्जनम् । दक्षिणेन वेदं गृहीत्वा
सव्येनाहवनीयात्तृणाति । शेषं निदधाति ॥

Colophon:

दर्शपूर्णमासयोः आपस्तम्बेनोक्तहौत्रं समाप्तम् ॥

Subject: Āpastambadarśapūrṇamāsahautraprayoga dealing with the duties of the Hotṛ priest according to the Āpastamba school of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition. Dr. Burnell has placed this Ms. under the heading of Āgrayaṇeṣṭiprayoga and observed that this Ms. contains 'iṣṭiprayoga (Āpastamba).' (It is) 'recent' (and) 'fragmentary'. But on a successful arrangement the leaves of this Ms. the following works are traced out in this Ms. :—

1	अन्वारम्भणीयाप्रयोगः ॥	L. L.	1— 6
2	आग्रयणप्रयोगः ॥	,,	7—13
3	पथिकृद्वैश्वानरीप्रयोगः ॥	,,	14—16
4	वैश्वानरीष्टिप्रयोगः ॥	,,	17—18
5	व्रतपतीष्टिप्रयोगः ॥	,,	19
6	यज्ञविभ्रष्टेष्टिप्रयोगः ॥	,,	20—22
7	पवित्रेष्टिप्रयोगः ॥	,,	23— 32

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2211. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3689. Page 24. Left column.

Substance—Paper. Size—10½ × 5 inches. Sheets—49. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author —(?). Complete.

Beginning :

श्रीगणेशाय नमः ॥ यज्ञेश्वरचरणारविन्दाभ्यां नमः ॥

आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव हविरातञ्चनमुपकल्पयत एकाहेन वा द्व्यहेन वा यदस्त्वमावास्यायां पौर्णमास्यां वा प्रातर्हुतेऽग्निहोत्रे यजमानः केशश्मश्रु वापयित्वा लोमानि संहृत्य नखानि निकृन्तयीत न वा वापयते तीर्थे स्नात्वा अहतं वासः परिधाय नवनीतेनाभ्यञ्जीत मुखमग्रेऽनुलोममङ्गानि त्रैककुदे(?)नाम्येन वाञ्जनेनाङ्क्ते। एवं पत्नी वपनवर्जम्। ऋत्विजश्च स्नाता अहतवाससः कर्माङ्गमन्यद्यज्ञोपवीतमजिनं वासः सूत्रं वा धृत्वा सह यजमानाभ्यां पवनमन्त्राचमनमन्त्रप्रोक्षणानि कुर्वन्ति ॥

End:

अथ यजमानायतने तिष्ठन् यज्ञस्य पुनरालम्भं जपति।

यज्ञो बभूव स आबभूव स प्रजज्ञे स वा वृधे। स देवाना-(म)धिपतिर्बभूव सो अस्माꣳ अधिपतीन् करोतु वयꣳ स्याम पतयो रयीणाम् । अथ प्राङुत्क्रम्य जपति । गोमाꣳ अग्ने विमाꣳ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः । इडा वाꣳ एषो असुरप्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् । ततो ब्राह्मणाꣳ स्तर्पयत वै इति सम्प्रेष्यति । ऋत्विग्व्यतिरिक्ता दश ब्राह्मणा भोजनीयाः । तथा च—

दशौदनाः स्युरिष्टीनां पशौ तु शतमोदनाः ।
सहस्रमोदनाः सोम इत्याहुर्ब्रह्मतर्पणम् ॥

Colophon :

इति श्रीदर्शपूर्णमासप्रयोगः सम्पूर्णतामगात् ॥

Subject: Bodhāyanadarśapūrṇamāsaprayoga, a treatise on the Darśapūrṇamāsa yajña according to the Bodhāyana school of the Black Yajur Veda.

Remarks :—The Ms. is in a very good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2212. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3690. Page 24. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 5$ inches. Sheets—49. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks :—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2213. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3691. Page 24. Left column. Substance—Paper. Size—$10\frac{1}{2}\times 5$ inches. Sheets—46. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks :—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2214. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3694. Page 24. Left column. Substance—Paper. Size—$10\frac{7}{8}\times 4\frac{1}{4}$ inches. Sheets—51. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks :—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2215. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3701. Page 24. Left column. Substance—Paper. Size—$10\frac{5}{8}\times 4\frac{5}{8}$ inches. Sheets—

50. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks :—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2216. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Dr. Burnell's Catalogue No. 3702. Page 24. Left column. Substance—Paper. Size—10¾×4¾ inches. Sheets—49. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2217. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3703. Page 24. Left column. Substance—Paper. Size—10¾×4¾ inches. Sheets—49. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2218. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3704. Page 24. Left column. Substance—Paper. Size—10½ × 5 inches. Sheets—40. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2219. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3705. Page 24. Left column. Substance—Paper. Size—10½ × 5¼ inches. Sheets—41. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2220. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3706. Page 24. Left column. Substance—Paper. Size—10½ × 5 inches. Sheets—58.

Lines—10 to a Page. Script—Telugu. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2221. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3707. Page 24. Left column. Substance—Paper. Size—10½×5 inches. Sheets—67. Lines—8 to 10 to a Page. Script—Telugu. No. of Granthas—850. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2211.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2222. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3697. Page 24. Left column. Substance—Paper. Size—10×4 inches. Sheets—26. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—350. Author—Appādīkṣita(?). Complete.

Beginning:

श्रीगणेशायनमः ॥

याः पुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतश्च याः। ताभिरश्मिप-
वित्राभिः श्रद्धां यज्ञमारभे। देवा गातुविदो गातुं यज्ञाय

विन्दत । मनंमस्पतिना देवेन वाताद्यज्ञः प्रयुज्यताम् । अद्य एहि । सत्येन त्वाह्वयामि । आकूत्यै त्वा कामाय त्वा समृधे त्वा पुरोदधे अमृतत्वाय जीवसे(से) । आकूतीमस्यावसे काममस्य समृद्ध्यै । इन्द्रस्य युञ्जते धियः । अकूतिं देवीं मनसः पुरोदधे यज्ञस्य माता सुहवामे अस्तु । यदीच्छामि मनसा स कामो विदेयमेनद्ध(?)दये निविष्टम् । श्रीपरमेश्वरप्रीत्यर्थं पौर्णमासेन हविषा यक्ष्ये ॥

End :

अग्ने व्रतपते व्रतमचारिषम् । अग्नये ० । वायो व्रतपते ० । वायवे । आदित्य व्रतपते० । आदित्याय० । व्रतानां व्रतपते० । व्रतानां व्रतपत० । पुनः परीषिच्य । यज्ञो बभूव स आ बभूव स प्रजज्ञे स वावृधे । स देवानामधिपतिर्बभूव सो अस्मा॑ऽअधिपतिं(तीन्) करोतु वयं स्याम पतयो रयीणाम् । गोमा॑ऽअग्नेविमा॑ऽअश्वीयज्ञो(ज्ञो) नृवत्सखा सदमिद प्रभृष्या(ष्य)ः । इडावा॑ऽएे(ए?)षो असुरप्रजावान्दीर्घो रयिः प्रथुबुध्नः स्व(स?)भावान् । ब्राह्मणांस्तर्पयत वै ॥

Colophon :

इति दर्शपूर्णमासः । वेलम्भट्टस्य पुस्तकम् ॥

Subject: Bodhāyanadarśapūrṇamāsaprayoga—a treatise on the Darśapūrṇamāsa yajña, according to the Bodhāyana school of the Black Yajur Veda.

Remarks :—The Ms. is in a fairly good condition. It is full of scriptorial errors. The hymns quoted herein are partly accented. The Ms. originally belonged to one Velambhaṭṭa. On the title sheet is given—अप्पादीक्षित ॥

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2223. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3698. Page 24. Left column. Substance—Paper. Size—10×4 inches. Sheets—26 (4th sheet missing). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—280. Author—Appādīkṣita(?). Complete.

Beginning, end, colophon and subject—Same as No. 2222.

Remarks :—The Ms. is in a decaying condition. The ṛks given in this Ms. are fully accented.

॥ बोधायनदर्शपूर्णमासप्रयोगः ॥

2224. BODHĀYANADARŚAPŪRṆAMĀSA-PRAYOGAḤ.

Burnell's Catalogue No. 3709. Page 24. Left column. Substance—Paper. Size—11×4⅝ inches. Sheets—27. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—700. Author—(?). Complete.

Beginning :

श्रीगणेशाय नमः ॥

अथ दर्शपूर्णमासप्रयोगः । आहिताग्निरन्वाधान-
दिने प्रातरग्निहोत्रं हुत्वा श्मश्रुपपक्षकेशलोमनखानि वाप-
यित्वा कृतस्नाननवनीताभ्यञ्जनाञ्जनोऽहतवासाः स्नातैः
पत्न्यधर्या(ध्वर्यो?)दिभिस्सह प्रत्येकं सप्तभिर्दर्भपिञ्जूलैर्मु-
खं नाभिं गुल्फावसम्मृज्य दर्भान्सङ्कुच्चित्य प्रोक्ष्योदङ्नि-

रस्रांति । तत्पवनम् । आपो हि ष्ठेति तिसृभिस्तिस्रः पिबे-
द्व्याहृतिभिर्मुखमुन्मृजेदेतद्वा विपरीतम् । तन्मन्त्राचमनम् ।
ततः शेषं समाप्य मन्त्रप्रोक्षणं करोति । दधिक्राव्णो
अकारिषम् । जिष्णोरश्वस्य वाजिनः । सुरभि नो
मुखाकरत् प्र ण आयू॑ंषि तारिषत् । आपो हि ष्ठा मयोभुव-
स्ता न ऊर्जे दधातन । महरणाय चक्षसे । यो वः शिवतमो
रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा
अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा-
च नः ॥

End:

स देवानामधिपतिर्बभूव सोऽस्मानधिपतीन्करोतु
वय॑ं स्याम पतयो रयीणाम् । प्रागुत्सृत्य गोमतीं जपति ।
गोमा॑ं अग्ने विमा॑ं अश्वी यज्ञो नृवत्सखा सदमिद्प्र-
मृष्यः । इडावान्येषो असुरप्रजावान् दीर्घो रयिः पृथुबुध्नः
सभावान् । उपविश्य ब्राह्मणांस्तर्पयत वै इत्यात्मानं
सम्प्रेष्यति ततोऽन्यर्चनादि ब्राह्मणतर्पणं कुर्यात् । स-
न्तिष्ठेते दर्शपूर्णमासौ ॥

Colophon : Nil.

Subject : Bodhāyanadarśapūrṇamāsaprayoga.

Remarks :—The Ms. is in a fairly good condition. At the end of this Ms. the following verses are given :—

"अनेन प्रीयतां देवो भगवान् मङ्गलेश्वरः ।
लक्ष्मीनृसिंहः पूर्वेषामस्माकं कुलदेवतम् ॥
केशान्मासत्रयादूर्ध्वं धारयेद्गर्भवान्द्विजः ।
वपनः पर्वणोः क्षौरं धारणन्स्याद्विवाहते ॥

आहिताग्नेरियं पर्व द्वादशी च प्रशस्यते ।
पञ्चम्यामथवाष्टम्यां पर्वणोर्यद्यसम्भवः ॥
पर्वणि यत्राग्नयस्तत्र स्वयं वा तत्र चाग्नयः ।
विकल्पः स्वेच्छया कार्य एष धर्मः सनातनः ॥
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं च यः ।
कर्तुमिच्छति दुर्मेधा मोहं तस्य विचेष्टितम् ॥
अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्मकारिणाम् ।
अक्रिया च परोक्ता च तृतीया वा यथा क्रिया ॥
छिन्ने पिष्टे तथा लूने साम्नाय्ये मातृके तथा ।
पञ्चान्मन्त्राः प्रयोक्तव्याः मन्त्राः यज्ञार्थसाधकाः ॥
॥ श्रीकृष्णाय नमः ॥"

॥ बोधायनदर्शपूर्णमासपञ्चप्रयोगः ॥

2225. BODHĀYANADARŚAPŪRṆAMĀSA-PAÑCAPRAYOGAḤ.

Burnell's Catalogue No. 3708. Page 24. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{5}{8}$ inches. Sheets—58. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ बोधायनीयदर्शपूर्णमासयोः पञ्च प्रयोगा उच्यन्ते । आहिताग्निरन्वाधानादिने पुरा प्रातरग्निहोत्रादन्वाधा-

नार्थमग्नीनां समीपे त्रीणि स्थूलकाष्ठान्यासाद्य विहरणपक्षेऽग्नीन्विहृत्य प्रातरग्निं हुत्वा श्मश्रूपपक्षं केशलोमानि वापयित्वा नखानि निकृन्तयित्वा स्नातौ पत्नीयजमानौ अहतवाससौ नवनीतेनाभ्यञ्जितावञ्जनेनाञ्जितौ स्नातैरहतवासोभिर्ऋत्विग्भिः सह लब्धब्राह्मणानुज्ञः पवनादि कुर्युः । तेषां क्रमः । एवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ आत्मनः शुद्ध्यर्थं दर्शपूर्णमासाङ्गत्वेन विहितं पवनादिकर्म करिष्ये इति सङ्कल्प्य एकविंशतिदर्भपिञ्जूलैः सह ऋत्विग्भिः प्रत्येकं त्रिधा विभक्तैः सप्तभिः कण्ठादुपर्युन्मृज्य सप्तभिर्नाभेराकण्ठमवमृज्य तान्दर्भानेकीकृत्याद्भिः प्रोक्ष्योदङ्निरस्याप उपस्पृश्य शुद्ध्यर्थमाचम्य मन्त्रैराचामयेत् ।

End :

पयस्वतीरित्याद्याहवनीयस्य परिषेचनान्तं कृत्वा समिध आदधाति । अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे राधि स्वाहा । वायो व्र० । आदित्यव्र० । व्रतानां व्र० त्यागः पूर्ववत् । आहवनीयं परिषिच्योत्थाय । यज्ञस्य पुनरालम्भं जपति । यज्ञो बभूव स आबभूव स प्रजज्ञे स वावृधे । स देवानामधिपतिर्बभूव सोऽस्माकमधिपतीन् करोतु वयं स्याम पतयो रयीणाम् । अथ प्रागुत्क्रम्य जपति । गोमां अग्ने विमां अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः । इडावां एषो असुरप्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् । आत्मनं सम्प्रेष्यति । ब्राह्मणांस्तर्पयत वै ।

Colophon:

इति बोधायनीयदर्शपूर्णमासयोः पञ्च प्रयोगाः सम्पूर्णाः ॥

Subject: Darśapūrṇamāsapañcaprayoga, according to the Bodhāyana school of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition. After the colophon the following extract is given:

"अग्ने नय सुपथा राये० ऋक् । अग्ने त्वं पारय० ऋक् । प्रकारवो मनना० ऋक् ।

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ १ ॥
प्रायश्चित्तान्यनेकानि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ २ ॥
नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महावेद्यै नमो नमः ॥ ३ ॥

सकृत्ते अग्ने नमः । द्विस्ते नमः । त्रिस्ते नमः । चतुस्ते नमः । पञ्चकृत्वस्ते नमः । दशकृत्वस्ते नमः । शतकृत्वस्ते नमः । आ सहस्रकृत्वस्ते नमः । अपरिमितकृत्वस्ते नमः । नमस्तेऽस्तु मामाहिंसीः ।

काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गरूपाय यज्ञेशाय नमो नमः ॥ ४ ॥

अनृणा अस्मिन्ननृणाः परस्मिंस्तृतीये लोके अनृणाः स्याम ।
ये देवयाना उत पितृयाणाः सर्वान्पथो अनृणा आक्षीयेम ॥
स्वरेण वर्णेन चेद्विहीनं तथैव हीनं क्रिययापि यच्च ।
यच्चातिरिक्तं मम तत् क्षमस्व ततस्तु चाग्ने परिपूर्णमेवत् ॥ ५ ॥

यस्य स्मृत्या० । ६ ।

शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ।
रिपुगर्भस्य यो गर्भः स मे विष्णुः प्रसीदतु ॥ ७ ॥"

॥ बोधायनदर्शपूर्णमासपञ्चप्रयोगः ॥

2226. BODHĀYANADARŚAPŪRṆAMĀSA-PAÑCAPRAYOGAḤ.

Burnell's Catalogue No. 3692. Page 24. Left column. Substance—Paper. Size—9½ × 4¾ inches. Sheets—34. Lines—11 or 12 to a Page. Script—Devanāgarī. No. Granthas—600. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2225.

Remarks :— The Ms. is in a fairly good condition. Only the beginnings of the mantras are given in this Ms.

॥ बोधायनदर्शपूर्णमासपञ्चप्रयोगः ॥

2227. BODHĀYANADARŚAPŪRṆAMĀSA-PAÑCAPRAYOGAḤ.

Burnell's Catalogue No. 3693 a. Page 24. Left column. Substance—Paper. Size—10¾ × 4¾ inches. Sheets—58. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2225.

Remarks :— The Ms. is in a fairly good condition. The other work contained herein is 'Pravāsavidhiprayoga'.

॥ बोधायनदर्शपूर्णमासपञ्चप्रयोगः ॥

2228. BODHĀYANADARŚAPŪRṆAMĀSA-PAÑCAPRAYOGAḤ.

J. L. Collection No. 232. Substance—Paper. Size—8½×4 inches. Sheets—46. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीरामनाथाय नमः ॥

यजमानः परमेश्वरप्रीत्यर्थं दर्शपूर्णमासाङ्गत्वेन विहितं पवनादि करिष्ये ॥ एकविंशतिकुशपिञ्जूलैः सह ऋत्विग्भिस्त्रेधा विभक्तैः सप्तभिर्मुखं सप्तभिर्नाभिं सप्तभिर्गुल्फं तूर्ष्णीं संस्पृश्य तान् दर्भानद्भिः प्रोक्ष्य उदङ्निरस्याप उपस्पृश्य मन्त्राचमनं कुर्यात् ॥

End:

प्रागुद्दीय जपाति । गोमा॰ अग्ने विमा॰ अश्वी यज्ञा नृवत्सखा सदमिदप्रमृष्यः । इडावा॰ एषा असुरप्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् । उपविश्यात्मनः सम्प्रेष्यति ॥ ब्राह्मणा॰ स्तर्पयत वै अग्ने नयेत्यादि विष्णुस्मरणान्तं कृत्वा विभूतिधारणं कृत्वा यस्य स्मृत्येत्यादि दर्शपूर्णमासेन हविषा श्रीयज्ञेश्वरस्वरूपी परमेश्वरः प्रीयताम् ॥

Colophon:

इति बोधायनीयदर्शपूर्णमासशेषीयपञ्चप्रयोगस्समाप्तः ॥

स्वस्ति श्रीमच्छालिवाहनशके १६३८ दुर्मुखिनामसंवत्सरे उत्तरायणे वसन्तर्तौ वैशाखमासे कृष्णपक्षे एकादश्यां भानुवासरे शुभदिवसे

इटकग्रामे(?) श्रीमद्वैद्यनाथभट्टमण्डूकेण लिखितम् । अन्ते समापितं यज्ञेश्वरमण्डूकेण । पञ्चप्रयोगः समापितम(:) । मातृका श्रीमत्पिङ्गणभट्टस्य ॥ श्रीमद्दक्षिणामूर्तये नमः ॥ श्रीराम । श्रीकाशी श्री ॥

Subject : Bodhāyanadarśapūrṇamāsapañcaprayoga.

Remarks :— The Ms. is in good condition. The Ms. is dated Śālivāhana Śaka 1638 or 1716 A. D. The scribes are both Vaidyanāthabhaṭṭa (maṇḍūka) and yajñeśvara (maṇḍūka). This Ms. originally belonged to one Piṅgaṇabhaṭṭa. It is said to have been written in the village called Iṭaka (?).

॥ बोधायनदर्शपूर्णमासपञ्चप्रयोगः ॥

2229. BODHĀYANADARŚAPŪRṆAMĀSA-PAÑCAPRAYOGAḤ.

J. L. Collection No. 233. Substance—Paper. Size—10×4½ inches. Sheets—17 (3-19). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—360. Author—?. Incomplete—(wants beginning and end).

Beginning :

....इमं लोकमथो अमुं कामान् समर्थयन्तु नः । देवीर्देवैस्समाभृताः । पावमानीः स्वस्त्ययनीः । सुदुघा हि घृतश्चुतः । ऋषिभिस्सम्भृता रसः ॥

End :

उत्तमस्वरेण अग्नये स्विष्टकृतेऽनुब्रूहि होता पिप्रीहि देवा उशनोपविष्टविद्वां(?)तुं ऋतुगते यजेह ये देव्या ऋत्विजस्तेभिरग्ने........................

Colophon: Nil.

Subject: Bodhāyanadarśapūrṇamāsapañcaprayoga.

Remarks:—The Ms. is in a decaying condition. This Ms. breaks off in the beginning of the Darśaprayoga.

॥ बोधायनदर्शपूर्णमासयाजमानप्रयोगः ॥

2230. BODHĀYANADARŚAPŪRṆAMĀSA-YĀJAMĀNAPRAYOGAḤ.

Burnell's Catalogue No. 3735. Page 24. Left column.

Substance—Paper. Size—$10\frac{7}{8} \times 4\frac{5}{8}$ inches. Sheets—20. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—270. Author—?. Complete.

Beginning:

अथ बोधायनदर्शपूर्णमासयाजमानप्रयोगः ॥

आमावास्येन पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव हविरातञ्चनमुपकल्पयत एकाहेन वा द्व्यहेन वा यथर्तु चन्द्रमसं वा निर्ज्ञाय सम्पूर्णं वा विज्ञाय पुरा प्रातरग्निहोत्रात्पिठकानुपसादयेदन्वाधानार्थान्हुते प्रातरग्निहोत्रे व्रतोपायनीयं पाचयित्वा तस्य ब्राह्मणं भोजयित्वा शिष्टं जायापती अश्नीतः ॥

End:

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ओं तस्स(त्) ब्रह्मार्पणमस्तीत्यादिकालेऽन्नं संस्कृत्य चतुरवराम्(रो) ब्राह्मणान्भोजयति सन्तिष्ठति(ते) आमावास्यं पौर्णमासं वा हविर्हविः ॥

Colophon:

इति बोधायनीये दर्शपूर्णमासयाजमानप्रयोगः सम्पूर्णः ॥

Subject: Bodhāyanadarśapūrṇamāsayājamānaprayoga giving the duties of Yajamāna in the Darśapūrṇamāsayajña according to the Bodhāyana school of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासयाजमानप्रयोगः ॥

2231. BODHĀYANADARŚAPŪRṆAMĀSA-YĀJAMĀNAPRAYOGAḤ.

Burnell's Catalogue No. 3737. Page 24. Left column. **Substance**—Paper. **Size**—$11\frac{1}{8}\times4\frac{1}{2}$ inches. **Sheets**—20. **Lines**—8 or 9 to a Page. **Script**—Devanāgarī. **No. of Granthas**—270. **Author**—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2230.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासयाजमानमन्त्रानुक्रमणिका ॥

2232. BODHĀYANADARŚAPŪRṆAMĀSA-YĀJAMĀNAMANTRĀNUKRAMAṆIKĀ.

Burnell's Catalogue No. 3820. Page 24. Left column.

Substance—Paper. Size—10⅞×5⅜ inches. Sheets—10. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थमामावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाण आत्मनः शुद्ध्यर्थं पवनमन्त्राचमनमन्त्रप्रोक्षणानि करिष्ये । आपो हि ष्ठा मयोभुवस्ता नं ऊर्जे दधातन। महे रणाय चक्षसे। यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः। तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः । भूर्भुवः सुवः । दधिक्राव्णो(व्णो) अकारिषम् । जिष्णोरश्वस्य वाजिनः सुरभि नो मुखाकरत् प्र ण आयूꣳषि तारिषत् ॥ आपो हि ष्ठा मयो भु० च नः।

End:

अनृणा अस्मिन्ननृणा परस्मिꣳतृतीये लोके अनृणा स्याम। ये देवयाना उत पितृयाणाः सर्वान्पथो अनृणा आ क्षीयेम ।

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥
ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महावेद्यै नमो नमः ॥

काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गदात्रे च यज्ञेशाय नमो नमः ॥

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

Colophon :

इति बोधायनीयदर्शपूर्णमासयाजमानमन्त्रानुक्रमणिका
सम्पूर्णा ॥

Subject : Bodhāyanīyadarśapūrṇamāsayājamānamantrānukramaṇikā, a collection of mantras to be pronounced by Yajamāna in the Darśapūrṇamāsa sacrifice, according to the Bodhāyana school of the Black Yajur-Veda.

Remarks :—The Ms. is in good condition and it is accented.

॥ बोधायनदर्शपूर्णमासाग्नीध्रप्रयोगः ॥

2233. BODHĀYANADARŚAPŪRṆAMĀSĀGNĪDHRAPRAYOGAḤ.

Burnell's Catalogue No. 3764. Page 24. Left column.
Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{8}$ inches. Sheets—9. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—(?). Complete.

Beginning :

अथ बोधायनदर्शपूर्णमासाग्नीध्रप्रयोगः ॥

आर्त्विज्यं करिष्यन्नाग्नीध्रः स्नात्वा अहतं वासः परिधाय कर्माङ्गमन्ययज्ञोपवीतमजिनं वासः सूत्रं वा धृत्वा आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं आर्त्विज्यं करिष्यन्नात्मनः शुद्ध्यर्थे पवनमन्त्राचमनमन्त्रप्रोक्षणानि करिष्य इति सङ्कल्प्य सप्तभिर्दर्भपुञ्जीलैः कण्ठादुपर्युन्मृज्य सप्तभिर्नाभेरुपर्याकण्ठं सप्तभिर्नाभेरथागुल्फमवमृज्य तानि दर्भपुञ्जीलानि सम्मुखित्याङ्गिरभ्युक्ष्योदङ्निरस्याप उपस्पृशेदेतत्पवनम् । आपो हि ष्ठेति तिसृभिः प्रत्यृचमप आचम्य आपो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन महेरणाय चक्षसे । प्रथमम् ।

End :

यदाध्वर्युः प्रस्तरतृणमादायाग्नीध्रमीक्षते अग्नीत् इति तमाहाग्नीध्र संवदस्व इति अगानग्नीत् । इत्याहाध्वर्युः । अगन् इत्याहाग्नीध्रः श्रावयेत्याहाध्वर्युः श्रौषडित्याहाग्नीध्रः । इदं गृहीत्याहाध्वर्युः । अनुप्रहर इत्याहाग्नीध्रः । पत्नीसंयाजे उत्तरेण विहारं प्रदक्षिणमावृत्य प्रत्युक्ना(?)वृत्य उत्तरेण होतारं ऊर्ध्वज्ञुर्दक्षिणामुख उपविश्य सर्वत्र प्रत्याश्रावयति आज्येडायां षडवत्तं भक्षयित्वा मार्जयति । नित्यप्रायश्चित्ते होतारं ब्रह्माणं वा अन्वारभते ॥

Colophon :

इति बोधायनदर्शपूर्णमासाग्नीध्रप्रयोगः सम्पूर्णः ॥

Subject: Bodhāyanadarśapūrṇamāsāgnīdhraprayoga, giving the duties of the Āgnīdhra priest in the Brahmagaṇa in the Darśapūrṇamāsa sacrifice, according to the Baudhāyana school of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासाग्नीध्रप्रयोगः ॥

2234. BODHĀYANADARŚAPŪRṆAMĀSĀGNĪDHRAPRAYOGAḤ.

Burnell's Catalogue No. 3766. Page 24. Left column. Substance—Paper. Size—10⅜ × 5⅛ inches. Sheets—8. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2233.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासाग्नीध्रप्रयोगः ॥

2235. BODHĀYANADARŚAPŪRṆAMĀSĀGNĪDHRAPRAYOGAḤ.

Burnell's Catalogue No. 3767. Page 24. Left column. Substance—Paper. Size—10⅜ × 5⅛ inches. Sheets—8. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2233.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासाग्नीध्रप्रयोगः ॥

2236. BODHĀYANADARŚAPŪRṆAMĀSĀGNĪDHRAPRAYOGAḤ.

Burnell's Catalogue No. 3768. Page 24. Left column. Substance—Paper. Size—11¼ × 4⅜ inches. Sheets—13. Lines—8 to a Page. Script—Telugu. No. of Granthas—150. Author—(?). Complete.

Begininng, end, colophon and subject—Same as No. 2233.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासाग्नीध्रप्रयोगः ॥

2237. BODHĀYANADARŚAPŪRṆAMĀSĀGNĪDHRAPRAYOGAḤ.

T. S. Collection No. 208. Substance—Paper. Size—9⅜ × 5¼ inches. Sheets—3. Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—?. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आर्त्विज्यं करिष्यन्नात्मनः शुध्यर्थं पवनमन्त्राचमनम-
न्त्रप्रोक्षणानि करिष्ये ॥ आपो हि ष्ठा मयो ॥ ० ॥ ऋ ३ ॥
भूर्भुवः स्वः ॥ दधिक्राव्णो(व्णो) अकारिषं जिष्णोरश्वस्य
वाजिनः । सुरभि नो मुखाकरत्प्र ण आयूंषि तारिषत् ।
आपो हि ष्ठा ॥ ० ॥ यच्चिद्धि ते० ऋक् ॥ १ ॥

End:

यो भूतानामधिपतिर्यो रुद्रस्तन्तिचरो वृषा ।

पशून्तस्माकं मा हिंसीरेतदस्तु हुतं तव स्वाहा ॥

संवदस्व । अगन् । श्रौषट् । अनुप्रहर ।

अग्ने नय ॥ ० ॥

Colophon :

बोधायनदर्शपूर्णमासाग्नीध्रप्रयोगः समाप्तः ॥

Subject : Bodhāyanadarśapūrṇamāsāgnīdhraprayoga.

Remarks :—The Ms. is in a very good condition and it is accented.

॥ बोधायनदर्शपूर्णमासाग्नीध्रमन्त्रानुक्रमणिका ॥

2238. BODHĀYANADARŚAPŪRṆIMĀSĀ-GNĪDHRAMANTRĀNUKRAMAṆAKĀ.

Burnell's Catalogue No. 3809.

Substance—Paper. Size—10⅞ × 5⅛ inches. Sheets—4. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—?. Complete.

Beginning :

श्रीगणेशाय नमः ।

आर्त्विज्यं करिष्यन्नात्मनश्शुध्यर्थं पवनमन्त्राचमनमन्त्रप्रोक्षणानि करिष्ये । आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमोरसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥

End :

यो भूतानामधिपती रुद्रस्तन्तिचरो वृषा ।

पशून्तस्माकं मा हिंसीरेतदस्तु हुतं तव स्वाहा ॥

संवदस्व । अगन् । श्रौषट् । अनुप्रहर (आज्येडायां षडवत्तं भक्षयित्वा मार्जयति) अग्ने नय० ॥

Colophon: Nil.

सम्पूर्णम् ॥

Subject: Bodhāyanadarśapūrṇamāsāgnīdhramantrānukramaṇikā giving the mantras to be pronounced by Āgnīdhra of the Brahmagaṇa in the Darśapūrṇamāsayajña.

Remarks:—The Ms. is in a decaying condition. The Mantras are fully given in this Ms. and they are accented. This No. is, however, not found in Dr. Burnell's Catalogue.

॥ बोधायनदर्शपूर्णमासाग्नीध्रमन्त्रानुक्रमणिका ॥

2239. BODHĀYANADARŚAPŪRṆAMĀSĀGNĪDHRAMANTRĀNUKRAMAṆIKĀ.

Burnell's Catalogue No. 3811. Page 24. Left column.

Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{3}{8}$ inches. Sheets—5 Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—(?). Complete.

Beginning, end and subject—Same as No. 2238.

Remarks:—The Ms. is in good condition.

॥ बोधायनदर्शपूर्णमासाग्नीध्रमन्त्रानुक्रमणिका ॥

2240. BODHĀYANADARŚAPŪRṆAMĀSĀGNĪDHRAMANTRĀNUKRAMAṆIKĀ.

Burnell's Catalogue No. 3812. Page 24. Left column.

Substance—Paper. Size—10⅜×4⅛ inches. Sheets—5. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2238.

Remarks :—The Ms. is in a fairly good condition.

॥ बोधायनदर्शपूर्णमासमन्त्रानुक्रमणिका ॥

2241. BODHĀYANADARŚAPŪRṆAMĀSA-MANTRĀNUKRAMAṆIKĀ.

J. L. Collection No. 234. Substance—Paper. Size—10×4 inches. Sheets—25. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—275. Author—(?). Incomplete.

Beginning :

श्रीगणेशाय नमः ॥ श्रीयज्ञेश्वराय नमः ॥

आर्त्विज्यं करिष्यन्नात्मनश्शुध्यर्थं पवनमन्त्राचमन-मन्त्रप्रोक्षणानि करिष्ये ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसः तस्य भाजयते-ह नः । उशतीरिव मातरः ॥

End :

यद्वो देवातिपातयानि वाचा चत्प्रयुती देवहेडनं । अरायो अस्माꣳ अभिदुच्छुनायतेन्यत्रास्मिन्मरुतस्तन्निधेत-नस्वाहा ॥ मरुद्भ्य इदम् ॥ ततं म आपस्तदु तायते पुनः स्वादिष्ठाधीतरुचथायशस्यते । अयꣳ समुद्र उत विश्वभेषजः

स्वाहा कृतस्य समुंतृष्णुतर्द्धवः स्वाहा ॥ ऋधुम्य इदम्...॥

Colophon : Nil.

Subject : Bodhāyanīyadarśapūrṇamāsamantrānukramaṇikā giving the mantras to be pronounced by all priests in the Darśapūrṇamāsa yajña. .

Remarks :—The Ms. is in a decaying condition. Many sheets are found missing in the middle of this Ms. On the title page is given ' अग्निचिद्गङ्गाधरदीक्षितानामिदं पुस्तकम् ॥ i.e. the Ms belonged to one Agnicit Gaṅgādharadīkṣita.

॥ बोधायनदर्शपूर्णमाससमन्त्रार्थः ॥

2242. BODHĀYANADARŚAPŪRṆAMĀSA-MANTRĀRTHAḤ.

J. L. Collection No. 235. Substance—Paper. Size—9⅝ × 3⅞ inches. Sheets—43. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—(?). Complete.

Beginning:

अ ....व्याप्य तिष्ठति ।
तमाद्यमोमहं वन्दे देवं देवयजा(?)वजम् ॥ १ ॥
येन तर्तुमगाधोऽयं पार्यते श्रुतिसागर(:) ।
..............................परन्तपमहेश्वरम् ॥ २ ॥
लब्धवान्यत्प्रसादेन बहुळां कौस्तुभश्रियम् ।
श्रियं सविनयं नौमि तमनन्तपदं गुरुम् ॥ ३ ॥

अथातो दर्शपूर्णमास........व्याख्यातः । 'एकः शब्द-स्सम्यग्ज्ञातस्सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुक् भवती'ति

स्मृतेः । तथा '(यदधीतमविज्ञा)तं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्' ॥

* * * *

श्रद्धा आस्तिकी बुद्धिः वैदिकार्थनिश्चय इत्यर्थः। स चार्थ-ज्ञानं विना न सिध्यति इत्यर्थज्ञानस्यावश्यकत्वात् तत्त-त्कर्मणि विनियुक्तो तत्तन्मन्त्रार्थो निरूप्यते । तत्र सर्व-कर्मारम्भेषु बोधायनेनावश्यकतया स्नानादिपञ्चकवि-धानात् पवनादिविनुयुक्तमन्त्राणामर्थमभिधातुं सर्वम-न्त्रादिप्रयोज्यप्रणवार्थोऽभिधीयते । तच्चोक्तमथर्वब्राह्मणे
-ओङ्कारमग्रे प्रयुञ्जीत एष एव हि पुरस्तादा......
एष एव पश्चात्सर्वत एष एव ज्ञायत इति ॥

End:

बृह०ष्टा ॥ यत एव बृहस्पतिः बृहतो महतः यज्ञस्य पालकः वैगुण्यात्परिरक्षकः ईदृशस्त्व(?)मेव ब्रह्म सदन आ-श्रिष्ट(?)स्थितः। स्थितः सन् बृहस्पते यज्ञं अजूगुपः रक्षित-वान् । स त्वं अवाशिष्टं यज्ञं पाहि रक्ष । पतिं यजमान-ञ्च पाहि । भूर्भुवः स्वः बृहस्पतिप्रसूतः व्याख्यातं । ॐ प्रतिष्ठा । हे अध्वर्यो समिदाधानाय प्रतिष्ठ स्थिरो भव । समिदाधानं कुर्वित्यर्थः । अयाश्चेत्यादीनां व्याख्या हौत्रेण गतार्था ॥

Colophon:

इति ब्रह्ममन्त्रार्थः ॥ अथ हौत्रम्............ ॥

Subject: Bodhāyanadarśapūrṇamāsamantrārtha giving the meaning of the Mantras to be pronounced in the Darśapūrṇamāseṣṭi according to the Bodhāyana

school of the Black Yajur-Veda.

Remarks:—The Ms. is in a decaying condition. The first two sheets are completely worm-eaten.

॥ आश्वलायनाग्रयणहौत्रप्रयोगः ॥

2243. ĀŚVALĀYANĀGRAYAṆAHAUTRA-PRAYOGAḤ.

Dr. Burnell's Catalogue No. 3934. Page 24. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{4}$ inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

आश्वलायनाग्रयणहौत्रप्रयोगः ।

अस्या इष्टेः सप्तदश सामिधेन्यः । वार्तघ्नावाज्यभागौ । इन्द्राग्नी विश्वेदेवाः । सोमो द्यावापृथिवी च प्रधानदेवताः स्विष्टकृत्प्रयाजादयोऽङ्गदेवताः देवा आज्यपाश्च । आपस्तम्बी यजमानश्चेदस्या इष्ट्याः सप्तदश सामिधेन्यः वार्तघ्नावाज्यभागौ । अग्निरिन्द्राग्नी विश्वे देवाः सोमो द्यावापृथिवी च प्रधानदेवताः स्विष्ट॰ ॥ श्र ॥

End:

नाभिमालभेत । अभोसि प्राणा तदृतं ब्रवीम्यमासि सर्वानसि प्रविष्टः । स मे जरां रोगमपनुद्य शरीरादमाम एधि मा मृधाम इन्द्र । मार्जनादिसूक्तवाके विशेषः । अग्निरिदं॰ कृत । सोम इदं ॰ कृत । अग्नेरिदं ॰ कृत ।

इन्द्राग्नीक्रातां विश्वे देवाः इदं हविरविजुषन्तावीवृधन्त
महो ज्यायो क्रातां ॥ सोम इदं॰कृत द्यावापृथिवी क्रातां
देवा आज्यपा इत्यादि संस्थाजपान्तम् ॥

Colophon :

इत्याग्रयणहौत्रप्रयोगः सम्पूर्णः ॥

Subject : Āśvalāyanāgrayaṇahautraprayoga giving the duties of the Hotṛ priest in Āgrayaṇayajña.

Remarks :—The Ms. is in good condition.

॥ आश्वलायनाग्रयणहौत्रप्रयोगः ॥

2244. ĀŚVALĀYANĀGRAYAṆAHAUTRA-PRAYOGAḤ.

Dr. Burnell's Catalogue No. 3935. Page 24. Left column Substance—Paper. Size—$10\frac{1}{3} \times 5\frac{1}{8}$ inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2243.

Remarks :—The Ms. is in a fairly good condition.

॥ आश्वलायनाग्रयणहौत्रप्रयोगः ॥

2245. ĀŚVALĀYANĀGRAYAṆAHAUTRA-PRAYOGAḤ.

Dr. Burnell's Catalogue No. 3936. Page 24. Left column. Substance—Paper. Size—10×5 inches. Sheets—3.

Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2243.

Remarks :—The Ms. is in good condition.

॥ आश्वलायनाग्रयणहौत्रप्रयोगः ॥

2246. ĀŚVALĀYANĀGRAYAṆAHAUTRA-PRAYOGAḤ.

Dr. Burnell's Catalogue No. 3937. Page 24. Left column. Substance—Paper. Size—10¼ × 5½ inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2243.

Remarks :— The Ms. is in good condition.

॥ आश्वलायनाग्रयणहौत्रप्रयोगः ॥

2247. ĀŚVALĀYANĀGRAYAṆAHAUTRA-PRAYOGAḤ.

Dr. Burnell's Catalogue No. 3938. Page 24. Left column. Substance—Paper. Size—10¼ × 5¼ inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2243.

Remarks:—The Ms. is in good condition.

॥ आश्वलायनाग्रयणहौत्रप्रयोगः ॥

2248. ĀŚVALĀYANĀGRAYAṆAHAUTRA-PRAYOGAḤ.

Dr. Burnell's Catalogue No. 3939. Page 24. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 5$ inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2243.

Remarks :—The Ms. is in good condition.

॥ आश्वलाग्रयणहौत्रप्रयोगः ॥

2249. ĀŚVALĀYANĀGRAYAṆAHAUTRA-PRAYOGAḤ.

Burnell's Catalogue No. 3940. Page 24. Right column. Substance—Paper. Size—$10\frac{3}{4} \times 5\frac{1}{8}$ inches. Sheets—3. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2243.

Remarks :— The Ms. is in good condition.

॥ आपस्तम्बाग्रयणप्रयोगः ॥

2250. ĀPASTAMBĀGRAYAṆAPRAYOGAḤ.

Burnell's Catalogue No. 3475(b). Page 27. Left column. Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{3}{4}$ inches. Sheets—5 (6-

10). Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—85. Author—(?). Complete.

Beginning:

अथाग्रयणम् । आग्रयणमिति कर्मनामधेयम् । शरत्काले अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा पत्न्या सह प्राणानायम्य देशकालौ सङ्कीर्त्य परमेश्वरप्रीत्यर्थमाग्रयणेन यक्ष्ये । पत्न्या अपि सङ्कल्पः । तेन परमेश्वरं प्रीणयानि । विद्युदसि ० ऋत्विग्वरणम् । अग्नि(ग्न्य)न्वाधानादि । अद्य यज्ञाय आग्रयणꣳ हविः । ऐन्द्राग्नस्य मुख्यत्वादामावास्यं तन्त्रम् । अन्वाधाय व्रतप्रवेशः ॥

End:

नवयजमानभागप्राशनम् । अग्निः प्रथमः प्राश्नातु स हि वेद यथाहविः शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः श्यामाकं प्राश्नाति । यज्ञशश्रमवर्जं ब्राह्मणतर्पणान्तम् । हरिः ॐ ॥

Colophon:

इत्याग्रयणम् समाप्तम् ॥

Subject: Āgrayaṇaprayoga belonging to the Āpastamba school of the Black Yajur Veda.

Remarks:—The Ms. is in good condition. The other work contained in this Ms. is Āpastambānvārambhaṇīyeṣṭi.

॥ आपस्तम्बाग्रयणप्रयोगः ॥

2251. ĀPASTAMBĀGRAYAṆAPRAYOGAḤ.

Burnell's Catalogue No. 9110 (g).

Substance— Palm leaf. Size—16¼ × 1½ inches. Leaves—

6 (1-6). Lines—5 or 6 to a Page. Script—Telugu. No. of Granthas—100. Author—(?). Complete.

Beginning:

शरदि पौर्णमास्याममा(वा)स्यायां वा प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति । आग्रे(ग्रय)णमारप्स्ये । तेन संवत्सरे संवत्सरे शरदि यक्ष्ये । पुनः प्राणानायम्य । आग्रयणेन यक्ष्ये । विद्युदसि विद्यमे+ग्रुपैमि । अध्वर्युवरणादि । आग्रयणं हविः ।

End:

अनूयाजादिसूक्तवाके । अग्निरिदं साम इदं अग्निरिदं इन्द्राग्नि हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम् । विश्वे देवा इदं हविरजुषन्त + द्यावापृथ्वी हविरिदं हविरजुषेताम् देव आज्यपा इत्यादि संस्थाजपान्तं समानम् ।

Colophon:

आग्रयणं समाप्तम् ॥

श्रीनृसिंहार्पणमस्तु ॥

Subject: Āpastambāgrayaṇeṣṭiprayoga, according to the Āpastamba school of the Black Yajur Veda.

Remarks:—The Ms. is in good condition. After the colophon the following is given:—

'मित्रादिहोमः' beginning with मित्राय स्वाहा । मित्रायेदं + इति मित्रादिहोमः ।

......................द्वयं संसारतारकम् ।

' तयोरन्यतरत्सेव्यं संसारभयभीरुभिः ॥'

This work is not however noticed by Dr. Burnell under this Ms. For the other works contained in this Ms. see the list under Remarks on No. 2099.

॥ आपस्तम्बाग्रयणप्रयोगः ॥

2252. ĀPASTAMBĀGRAYAṆAPRAYOGAḤ.

Burnell's Catalogue No. 9183 (b). Page 24. Left column. Substance—Palm leaf. Size—14½ × 1½ inches. Leaves—7 (7-13). Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—140. Author—(?). Complete.

Beginning:

आग्रयणप्रयोगः । शरदि पौर्णमास्याममावास्यायां वा प्रातरग्निहोत्रं हुत्वा । पत्न्या सह अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिर्विघ्नेश्वरं ध्यात्वा प्राणानायम्य शुभे शोभने मुहूर्ते + परमेश्वरप्रीत्यर्थं आग्रयणेन यक्ष्ये । स्वर्गं लोकमवाप्नवानि । एवं पत्नी । उत्तरतो दर्भनिरसनादि । विद्युदसि + मि । पत्न्या अपि विद्युत् । अग्निमाग्रयणे अध्वर्युं त्वां वृणीमहे । एवं ब्रह्माणं होतारमाग्नी(ध्र)ञ्च वृणोति । अध्वर्युः । अग्नि(?)विहराणि । अद्य यज्ञाय रमताम् । इमामूर्जं पञ्चदशीम् । आग्रयणं हविरिदमेषां मयि । असाधारणदेवतानामैन्द्राग्नस्य मुख्यत्वादामावास्यं तन्त्रम् । अन्वाधाय व्रतप्रवेशः ॥

End:

यजमानभागप्राशनकाले ' सं यज्ञपतिराशिषा ' इति पुराणयजमानभागं प्राश्य आचम्य भद्राश्चः श्रेयः समन·

यिष्ट देवास्त्वया वसे न समशीमहि त्वा । स नो मयोभूः
पितो आ विशस्व शं तोकाय तनुवे स्योनः ॥ नवयजमा-
नभाग्रमग्निः प्रथमः प्राश्नातु । स हि वेद यथा हविः ।
शिवा अस्मभ्यमोषधीः कृणोतु । विश्वचर्षणिः । श्यामा-
कयजमानभागं द्वौ मन्त्रौ सर्वभक्षाणां मन्त्रवतां प्रत्याम्ना-
यौ। उपवेषोद्वासनादि यद्धर्मे कपालमुपचिन्वन्ति वेधसः ।
पूष्णस्तदपि व्रत इन्द्रवायू विमुञ्चतामेककपालमुद्वास-
यति । विष्णुक्रमणादि । यज्ञो बभूव । पुनरालम्भत्वात् ।
न यज्ञशं च मे । वृष्टिरासि + सत्यमुपागाम् । ब्राह्मणांस्त-
र्पयत वै । ततः परं ब्राह्मणा भोजयितव्याः ॥ हरिः ॐ ॥

Colophon:

आग्रयणं समाप्तम् ॥

Subejct: Āgrayanaprayoga, according to the Āpastamba school of Black Yajur-Veda.

Remarks:—The Ms. is in good condition. For the other works contained herein see the list under remarks on No. 2152.

॥ बोधायनाग्रयणप्रयोगः ॥

2253. BODHĀYANĀGRAYAṆAPRAYOGAḤ

Burnell's Catalogue No. 3816. **Page** 24. Left column.

Substance—Paper. **Size**—$10\frac{1}{2} \times 5\frac{1}{4}$ inches. Sheets—7. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas —125. Author—Bālādīkṣita. Complete.

Beginning:

श्रीगणेशाय नमः ॥

बोधायनाग्रयणेष्टिप्रयोगः ॥

प्रणम्य बोधायनसूत्रकारं तदुक्तकर्माचरणाय सम्यक् ।
शिवेन्द्रपृथ्वीपतिबोधितोऽहं करोमि बालाध्वरकृत्प्रयोगम् ॥

आग्रयणं व्याख्यास्यामः ॥ शरद्यमावास्यायां वा
पौर्णमास्यां वा पूर्वपक्षस्य देवनक्षत्रे रेवत्यां वा यजेत ।

पुनर्यज्ञाधिदैवतमित्यादि परमेश्वरप्रीत्यर्थमाग्रयणेन यक्ष्ये
इति मनसा त्रिः सङ्कल्पयते त्रिरुच्चैः ॥

End:

ऐन्द्राग्नस्य वैश्वदेवस्य च यजमानभागं प्राश्नाति ।
भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा ।
स नो मयो भूः पितो आविशस्व शन्तोकाय तनुवे स्योन
इति । अथाचम्य । श्यामाकस्य यजमानभागं प्राश्नाति ।
अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा
अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिरिति ॥ ब्राह्मणसन्तर्प-
णान्ता सन्तिष्ठत एवेष्टिः ॥

Colophon:

इति शाहजीमहाराजपुरवास्तव्यबालाध्वरिकृता-
ग्रयणेष्टिप्रयोगः सम्पूर्णः ॥

Subject: Bodhāyanāgrayaṇeṣṭiprayoga based on the 12th Khaṇḍa of the 3rd Praśna of the Bodhāyanaśrauta-sūtras of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition. The author of this prayoga treatise is Bālādīkṣita of Śāhajipura or the modern

Tiruvisanalloor. For the other details about the author see Remarks on Nos. 2063 & 2067.

॥ बोधायनाग्रयणप्रयोगः ॥

2254. BODHĀYANĀGRAYAṆAPRAYOGAḤ.

Burnell's Catalogue No. 3821. Page 24. Left column. Substance—Paper. Size—10½ × 5¼ inches. Sheets—7. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Bālādīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 2253.

Remarks :—The Ms. is in good condition.

॥ बोधायनाग्रयणप्रयोगः ॥

2255. BODHĀYANĀGRAYAṆAPRAYOGAḤ.

Burnell's Catalogue No. 3822. Page 24. Left column. Substance—Paper. Size—10½ × ¼ inches. Sheets—7. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Bālādīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 2253.

Remarks :—The Ms. is in good condition.

॥ बोधायनाग्रयणप्रयोगः ॥

2256. BODHĀYANĀGRAYAṆAPRAYOGAḤ.

Burnell's Catalogue No. 3477. Page 27. Left column.

Substance—Paper. Size—10½ × 5 inches. Sheets—7. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Bālādīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 2253.

Remarks:—The Ms. is in good condition.

॥ बोधायनाग्रयणप्रयोगः ॥

2257. BODHĀYANĀGRAYAṆAPRAYOGAḤ.

J. L. Collection No. 236. Substance—Paper. Size—9⅛ × 3¾ inches. Sheets—10. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ।

अथ शारदि व्रीह्याग्रयणम् । अमावास्यायां पौर्णमास्यां वाऽपूर्यमाणपक्षस्य पुण्यनक्षत्रे कृत्तिकादिविशाखान्तेषु देवनक्षत्रेषु व्रीह्याग्रयणेन यजेत । सोपवसथस्सद्योयज्ञो वा तस्य प्रथमप्रयोगे पूर्वेद्युर्नान्दीमुखं रात्रावुदकशान्ति प्रतिसरबन्धञ्च कृत्वा श्वोभूते स्नानपवनमन्त्राचमनमन्त्रप्रोक्षणानि कृत्वेन्द्राग्न्यादयः प्रीयन्तामिति पुण्याहं वाचयित्वा । अथ गाः पुरस्तादित्यादि श्यामाकाग्रयणेन सह व्रीह्याग्रयणेन यक्ष्य इति सङ्कल्प्य त्रिरुपांशु त्रिरुच्चैः तन्म ऋध्यतामित्यादि । * * *

शेषञ्च प्रकृतिवदासाद्य अग्नोपवेशनादि वेषाय त्वेति दक्षिणेनाग्निहोत्रहवणीं सव्येन शूर्पमादत्ते ॥

End :

वसन्ते यवानामाग्रयणं श्रीह्याग्रयणवदैन्द्राग्नमेका-
दशकपालं वैश्वदेव्यं चरुं द्यावापृथिव्यमेककपालमिति ।
अत्र न सौम्यश्चरुः । यजमानभागं प्राश्नाति एतमु त्यं मधु-
मां(ना)स(सं)युतं यवं । सरस्वत्या अधिमनावचक्रु(कृ)षुः ।
इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः
सुदानव इति ब्राह्मणतर्पणान्तं समानम् ॥

Colophon :

इत्याग्रयणं बौधायनीयं समाप्तम् ॥

Subject : Āgrayaṇaprayoga based on the 12th Khaṇḍa of the 3rd Praśna of the Bodhāyana Śrauta Sūtras.

Remarks :—The Ms. is in good condition. The title sheet contains

बोधायनोक्ताग्रयणप्रयोगोऽयं अग्निचिद्गङ्गाधरदीक्षितानाम् ॥

i.e. the Ms. originally belonged to Agnicit Gaṅgādhara dikṣita.

॥ बोधायनाग्रयणप्रयोगः ॥

2258. BODHĀYANĀGRAYAṆAPRAYOGAḤ

J. L. Collection No. 237. Substance—Paper. Size—9⅛ × 3⅝ inches. Sheets —6. Lines —6 to a Page. Script—Devanāgarī. No. of Granthas—65. Author—(?). Complete.

Beginning :

श्रीलक्ष्मीनृसिंहाय नमः ।

शरदि व्रीहीणां श्यामाकानाञ्चाग्रयणं करिष्यन्भवति ।
सोपवसथः सद्यो वा पूर्वपक्षे पुण्ये नक्षत्रे पर्वणोर्वाऽऽमावा-
स्येन वा हविषेष्ट्वा प्रथमप्रयोगे पूर्वेद्युर्नान्वादिप्रतिसरान्तं
कृत्वा श्वोभूते स्नानादि इन्द्राग्नी विश्वेदेवाः सोमो द्यावा-

पृथिवी च प्रीयन्तामिति वदन्पुण्याहवचनं कृत्वा भद्रा-
ह्वानादि तिथौ परमेश्वरप्रीत्यर्थं श्यामाकाग्रयणेन सह
व्रीह्याग्रयणेन यक्ष्य इत्यों तथेत्यन्तमाग्रयणेष्टिसम्बन्धि
हविर्नवव्रीहिमयः ॥

End:

अथाचम्य श्यामाकस्य याजमानभागे प्राश्नाति । अग्निः
प्रथमः प्राश्नातु स हि वेद हविः शिवा अस्मभ्यमोषधीः ।
कृणोतु विश्वचर्षणिरिति ब्राह्मणसन्तर्पणान्ता सन्तिष्ठत ए-
वेष्टिः । यदि श्यामाका न लभ्येरन् श्यामाकैः प्रस्तरं कुर्या-
त्त्रीण्येव हवींषि भवन्ति । सन्तिष्ठत आग्रयणेष्टिः ॥

Colophon:

आग्रयणेष्टिः समाप्ता ॥

बोधायनाग्रयणेष्टिः गङ्गाधरदीक्षितानाम् ॥

Subject: Āgrayaṇaprayoga based on the 12th Khaṇḍa of the 3rd Praśna of the Bodhāyana Śrauta Sūtras.

Remarks:—The Ms. is in good condition. It originally belonged to (Agnicit) Gaṅgādharadīkṣita.

॥ बोधायनाग्रयणहौत्रप्रयोगः ॥

2259. BODHĀYANĀGRAYAṆAHAUTRA-PRAYOGAḤ.

Burnell's Catalogue No. 9144 (b). Page 25. Left column. Substance— Palm leaf. Size—16¾ × 1⅝ inches. Leaf—1 (69th). Lines—8 to a Page. Script—Grantha. No. of Granthas—25. Author—(?). Complete.

Beginning:

अस्या इष्टेः समृद्धा सामिधेन्यः । वार्तघ्नावाज्यभागौ । अग्निरिन्द्राग्नी विश्वेदेवास्सोमो द्यावापृथिवी च प्रधान-देवताः । स्विष्टकृत्प्रयाजादयोऽङ्गदेवताः देवा आज्यपाश्च । नमः प्रवक्त इत्यादि । शोचिष्केशस्तमीमहो प्रथुपाजा + हव्यवोन्तं म वाधं + ऊतयो समिद्धो अग्न आहुतय इत्यादि ॥

End:

इळां प्राश्याचम्य । नाभिमालभेत । अमोसि प्राण तमृतं ब्रवीम्यमासि सर्वानासि प्रविष्टः । स मे जरां रोग-मपनुद्य शरीरदमां एधि मामृधां इन्द्रः । अग्निरिदं हविः। सोम इदं हविः । अग्निरिदं । इन्द्राग्नी इदं हविरजुष-ताम् । सोमः । इदं हविः । द्यावापृथिवी । इदं हविरजुषता-मवीवृधेतामहो ज्यायोक्राताम् । देवा आज्यपा इत्यादि । संस्थाजपः ॥ हरिः ॐ ॥

Colophon:

आग्रयणहोत्रस्समाप्तः ॥ शुभमस्तु ॥

श्रीगुरवे नमः । करकृतमपराधं क्षन्तुमर्हति सन्तः ।

श्रीसद्गुरवे नमः ।

Subject: Bodhāyanāgrayaṇahautraprayoga, belonging to the Bodhāyana school of the Black Yajur Veda.

Remarks:—The Ms. is in good condition. It is full of scriptorial blunders. After the colophon the following indices are given:-

"इळे भरेयुर्वोर्द्धियो युवन्धेनुं परिज्मा त्रिमक्षिइरेफकण्वं पञ्च । नरा शरीरा परर्वाक्षर्वातमक्रिरो मनुं पत्नीस्सुवावश्चान्ता तीरर्द्धिरुं

पञ्च। अन्तकं कर्कन्धुवशुचन्तीं प्रभिगुं शचीभिर्वर्तिकां सिन्धुं कुत्संविपक्कावशमं इव्यपञ्च। कृशानुम्मया नरस्थां कुं समुध्न सन्तीमन्प्रंस्वतीं शुभिरक्षुभिः पञ्च। सुद्यानुकं श्रीवन्तं रसाभिशोकस्सूर्यं विप्रं महां पूर्भिर्येवम्र इयइव्यं पञ्च॥"

This Ms. contains the following works:

1	बोधायनाग्निष्टोमप्रयोगः		L. L. 1—68
2	do	आग्रयणहौत्रप्रयोगः	,, 69
3	do	नेष्ट्रप्रयोगः (?)	,, 70—72
4	do	श्रौतसूत्रम्	,, 73—83

Dr. Burnell has grouped this Ms. under 'Genaral Somaprayogas' and wrongly observed that it contains '83 Leaves' and deals with 'Maitrāvaruṇasomaprayoga etc.'

॥ आश्वलायनपिण्डपितृयज्ञप्रयोगः ॥

2260. ĀSVALĀYANAPIṆḌAPITṚYAJÑA-PRAYOGAḤ.

